मन्त्रपुष्पम्

रामकृष्ण मठ, खार, मुम्बई

श्री रामकृष्ण मन्दिरम् - रामकृष्ण मठ, खार (पश्चिम), मुम्बई

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे ।
अवतारवरिष्ठाय रामकृष्णाय ते नमः ।।

- स्वामी विवेकानन्दः

Om. I offer my salutation to you, Ramakrishna, who established dharma (on earth), who is the embodiment of all world religions, and who is the best of avataras.



श्री रामकृष्ण

श्री रामकृष्ण मन्दिरम् - रामकृष्ण मठ, खार (पश्चिम), मुम्बई

हृदयकमलमध्ये राजितं निर्विकल्पं
सदसदखिलभेदातीतम् एकस्वरूपम् ।
प्रकृतिविकृतिशून्यं नित्यमानन्दमूर्तिं
विमलपरमहंसं रामकृष्णं भजामः ।।

- स्वामी अभेदानन्दः

We offer worship to ever pure Ramakrishna dwelling in the lotus of heart as self-effulgent Atman. He is without any modifications, changeless, beyond all differences and limitations, He is one without a second. Devoid of all diversities, He is transcendent, He is the embodiment of Eternal Existence and Divine bliss.

150TH BIRTH ANNIVERSARY OF
SWAMI VIVEKANANDA
YEAR - 2013

मन्त्रपुष्पम्

सस्वराः

उपनिषन्मन्त्राः घनपाठमन्त्राः सामवेदमन्त्राः

अथर्वणवेदमन्त्राः श्रीरुद्रप्रश्नः चमकप्रश्नः अरुणप्रश्नः

शिवमन्त्राः सूक्तानि च दिव्यस्तोत्रम्

पातञ्जल-योगसूत्रपाठः

परिष्कर्ता

स्वामी देवरूपानन्दः

रामकृष्ण मठ

१२ वा रस्ता, खार (पश्चिम),

मुम्बई - ४०० ०५२

Our Own Publication

Published by :
Swami Sarvalokananda
© The Adhyaksha
Ramakrishna Math,
12th Road, Khar (West),
Mumbai - 400 052.
Phones :
022-6181 8000
022-2646 4363
022-2600 7176
E-mail : mumbairkm@gmail.com
mumbairkm@yahoo.com

First Edition : 1989

Ninth Edition : April, 2013
The 150th Birth Anniversary of Swami Vivekananda

PRICE Rs. 225/-

Printed in India.

© All rights reserved by Publisher
Ramakrishna Math, 12th Road, Khar (West), Mumbai.
(A Branch of Ramakrishna Math Belur Math, W.B.)

Printed at :
Creative Printers, Thane (W) - 400 610.
Email: ashokfal@yahoo.com

PREFACE TO THE FIRST EDITION

'Mantrapushpam' in Devanagari script with Swara marks is a Vedic chanting book published for the benefit of reciting the Upanisads and other hymns as a spiritual discipline.

This book contains 16 Upanisads, 13 Suktas, Sri Rudra Prasnah, Sri Chamaka Prasnah, Sri Aruna Prasnah, Ghana-Patha & Sama Veda mantras. 25 stotras on Gods and Goddesses are also included.

Upanisads :

Upanisad means annihilating the ignorance completely. It leads the spiritual seeker nearer to God. The mantras of Upanisads awaken holy thoughts in the mind of the spiritual aspirant. When the mantras are chanted with intonations, a divine atmosphere is created with holy vibrations all around. अणोरणीयान् महतो महीयानात्मा.... The pure Self dwelling in all beings is smaller than the smallest and greater than the greatest.

एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते..... (कठ उपनिषत्)

This Self, hidden in all beings, reveals itself not to all.

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।। (मुण्डक उपनिषत्)

The resplendent Self is attainable by the practice of spiritual disciplines as truth and continence. The chanting of mantras with correct intonations itself is a great spiritual discipline सम्यक् वर्णप्रयोगेन ब्रह्मलोके महीयते One who recites mantras with intonations attains highest merit purifying his body and mind.

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ।। (कठोपनिषत्) He who is endowed with discriminating intellect and has his mind purified by various disciplines and who remains always pure attains that highest Goal from where he will not be reborn. He will be blessed with eternal peace and happiness.

Most thrilling and spiritually gratifying mantras of Upanisads are being chanted every day. This book will be immensely helpful for selecting mantras from different Upanisads for group chanting.

Brihadaranyaka Upanisad with swara marks is an important feature of this book. This Upanisad is full of अनुदात्त swaras. The chanting of this Upanisad has got its own charm and soul-thrilling effect.

There are 108 Upanisads, out of which we have printed in this book 16 Upanisads. (1) Ishavasya Upanisad (2) Narayana Upanisad (3) Mahanarayana Upanisad (4) Taittiriya Upanisad (5) Aitareya Upanisad (6) Brihadaranyaka Upanisad (7) Suryopanisad (8) Ganapathyatharvashirshopanisad with Swara marks.

Other Upanisads such as Katha, Kena, Mundaka, Mandukya, Prasnah, Chandogya, Swetaswatara and Kali-santaranopanisads are printed without Swara marks.

Sri Rudra Prasnah and Sri Chamaka Prasnah:

Lord Shiva destroys the evil and bestows Bliss & Immortality on those who do Rudra Parayana daily. He is आशुतोषिन् easily pleased. The easiest method of propitiating Him is by the chanting of Rudram.

Chant Rudra Prasnah, also called as Namaka, once. Then recite one Anuvaka of Chamaka. Repeat the chanting of Namaka second time along with 2nd Anuvaka of Chamaka. In this way Namaka may be recited 11 times with 11th Anuvaka of Chamaka. This is termed as one Rudra. 121 times of Rudra chanting is called one 'Rudraikadashani'. When Rudra is repeated 1331 times it is named as one Maharudra. 11 Maharudras will make one Atirudra (14641 times).

When 11 persons recite 11 times Rudra daily for a period of 11 days, then it becomes one Maharudra.

Aruna Prasnah:

Lord Surya is God of health. Propitiate Him by chanting Aruna mantra in the early hours of the morning daily. The aspirant will be bestowed with health and prosperity.

Ghana-Patha Mantras & Samaveda Mantras:

These mantras may be chanted in temples on auspicious occasions and also in religious and cultural functions. This is the first time we are printing Ghana-Patha mantras with Swaras.

Most popular mantras on Ganapati and Saraswati and eight mantras of Ishavasyopanisad have been rendered with Ghana-Patha Swaras.

Suktas:

Vedic hymns selected from Sri Rigveda, Yajurveda etc. have been printed with Swara marks. Purusha Suktam, Narayana Suktam and Devi Suktam etc. are extremely popular Vedic hymns which are chanted daily for spiritual upliftment.

Samaveda Mantras:

Gayatri Samaganam, Rathantara Samaganam etc. with Swara marks have been included in this book. With the help of a competent teacher, one should learn the chanting of Samaveda mantras.

Harmonium and other musical instruments must not be used while chanting the Veda mantras.

Divya Stotram:

25 Stotras on different Gods and Goddesses have been added so that

religious aspirants may easily memorise and recite them befitting different occasions.

To hear the chanting of mantras and stotras in Mandirs, Monasteries and homes, by religious aspirants is a unique experience.

We ardently hope that the book 'Mantrapushpam' will create a lot of enthusiasm specially among youngsters who are keen to learn and practise Veda mantras in chorus. We are sure, this edition will be welcomed with great eagerness by the public.

We are grateful to M/s. Triveni Tissues Ltd., Calcutta, who generously donated the entire quantity of paper required for the printing of this book. We express our deep gratitude to all the well-wishers who have donated towards the publication of this book.

We are thankful to Shri R. S. Srikanta for assisting assiduously in proof-reading etc.

Anand Phototype Setters, Wadala, Mumbai, and Printers, Creative Prints, Mumbai, deserve our thanks for beautiful printing and get-up of this book.

October, 1989

RAMAKRISHNA MATH
Khar, Mumbai

॥ ॐ तत्सत् ॥

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥

'Om, Tat, Sat', is the threefold name by which Brahman is spoken of. By that were made the Brâhmanas, Vedas and Yagnas in ancient times. 23

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥२४॥

Therefore the acts of worship, charity, and austerity, enjoined by the scriptures, are always begun by the followers of the Vedas with the utterance of 'Om'. 24

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥२५॥

With the utterance of 'Tat', and without looking for any reward, the various acts of worship, austerity and charity are performed by those who seek liberation. 25

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥

The word 'Sat' is used to denote reality and goodness; and also, O Partha, the word 'Sat' is used for an auspicious act. 26

Bhagavad Gita: Chapter XVII : 23-26

PREFACE TO THE NINTH EDITION

In connection with 150TH BIRTH ANNIVERSARY OF SWAMI VIVEKANANDA- 2013, we have great pleasure to publish the revised 9TH edition of 'MANTRAPUSHPAM' book.

This edition contains 18 Upanishats, Ghanapatha swara-marks on Ganapati, Shiva, Gayatri and Saraswati; whole Ishavasyopanishat with Ghanapatha swara-marks. In addition to these, 21 Suktas, Rudraprashnah, Chamakaprashnah, Arunaprashnah with swara-marks are given. Samaveda Mantras and other 30 slokas (verses) are also added. Patanjali Yogasutrapathah has been rendered with swara-marks to facilitate the traditional way of chanting mantras. Together with this, Divya stotram section in this book contains 61 stotras on Gods and Goddesses. Thus the 9th edition of 'Mantrapushpam' in Devanagari script is the well-known Vedic Chanting book containing Vedic mantras with swara-marks including hymns & prayers.

In human life only, one gets an opportunity for manifestation of Divinity paving the way to attain eternal Peace, Bliss and Supreme Knowledge (Brahman is Sat- Chit – Ananda). By chanting of Vedic Mantras, hymns, prayers to Deities with faith and devotion every day, sins are burnt down. Purity and spiritual enlightenment will be attained through Divine grace. Mantrapushpam book can be utilized for the performance of Vedic chanting and for reciting hymns & prayers in homes, temples, monasteries, and also during sacred festivals and cultural functions. In schools and colleges, the students may be encouraged to learn the chanting of Upanishats and prayers.

We hope that the public will find Mantrapushpam book extremely helpful in their spiritual endeavours. Vedic chanting creates holy atmosphere.

RAMAKRISHNA MATH
12th Road, Khar (West),
Mumbai-400 052.

Publisher

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

May all be happy. May all be free from disease.
May all realise what is good. May none be subject to misery.

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

Worship of the gods (Devas), the twice-born, teachers, and the wise; cleanliness, simplicity, continence and non-injury – these are said to be austerity of the body.

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

Words that cause no offence, and which are truthful, pleasant and benef icial, and also regular recitation of scriptures – these are said to be austerity of speech.

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥

Serenity of mind, gentleness, silence, self-control and purity of heart – these are said to be mental austerity.

Bhagavad Gita: Chapter XVII : 14-16

अनुक्रमणिका

	विषयः	पृष्ठम्
1.	प्रार्थना	1
2.	शान्तिमन्त्राः	4
3.	ईशावास्योपनिषत्	7
4.	नारायणोपनिषत्	10
5.	ऐतरेयोपनिषत्	12
6.	तैत्तिरीयोपनिषत्	17
7.	महानारायणोपनिषत् *	32
8.	बृहदारण्यकोपनिषत्	65
9.	गणेशाथर्वशीर्षम्	168
10.	सूर्योपनिषत्	171
11.	कठोपनिषत्	174
12.	मुण्डकोपनिषत्	187
13.	माण्डूक्योपनिषत्	196
14.	प्रश्नोपनिषत्	198
15.	केनोपनिषत्	206
16.	छान्दोग्योपनिषत्	209
17.	श्वेताश्वतरोपनिषत्	294
18.	कलिसन्तरणोपनिषत्	306
19.	सरस्वतीरहस्योपनिषत्	308
20.	कैवल्योपनिषत्	311
21.	ईशावास्योपनिषत् घनपाठ	315
22.	गणपति-प्रार्थना घनपाठः	335
23.	सरस्वती-प्रार्थना घनपाठः	337
24.	गायत्रीमन्त्रः घनपाठः	338
25.	शिवमन्त्राः घनपाठः	339
26.	शिवपञ्चाक्षरीमन्त्रः घनपाठः	341
27.	मृत्युञ्जय महामन्त्रः घनपाठः	342
28.	रुद्रनमस्कारमन्त्रः घनपाठः	343
29.	गायत्रीसामगानम्	345
30.	रथन्तरसामगानम्	345
31.	बृहत्सामगानम्	346
32.	आरण्यकगानम्	346
33.	श्रीरुद्रप्रश्नः (लघुन्यासः)	348
34.	श्रीरुद्रप्रश्नः (संहितापाठः)	352
35.	श्रीचमकप्रश्नः	360
36.	अरुणप्रश्नः	365
37.	पुरुषसूक्तम्	398
38.	नारायणसूक्तम्	400
39.	विष्णुसूक्तम्	402
40.	श्रीसूक्तम्	403
41.	भूसूक्तम्	407
42.	नीळासूक्तम्	408
43.	दुर्गासूक्तम्	409
44.	देवीसूक्तम्	410
45.	मेधासूक्तम्	411
46.	सरस्वतीसूक्तम्	412
47.	रात्रीसूक्तम्	416
48.	अक्षीभ्यां ते सूक्तम्	419
49.	अग्निसूक्तम्	420
50.	आयुष्यसूक्तम्	421
51.	आ नो भद्राः सूक्तम्	422
52.	नवग्रहसूक्तम्	423
53.	नक्षत्रसूक्तम्	426
54.	नासदीयसूक्तम्	433
55.	पुण्याहवाचनम्	434

*अघमर्षणसूक्तम् (महानारायणोपनिषत्) पृष्ठम् 37

विषयः	पृष्ठम्
56. रोगनिवारणसूक्तम् (अथर्वणवेदः)	436
57. हिरण्यगर्भःसूक्तम्	437
58. सं गच्छध्वं	438
59. भाग्यसूक्तम्	439
60. दशशान्तयः	440
61. मन्त्रपुष्पम्	446
62. क्षमा प्रार्थना	448
63. वेदान्त महावाक्यम्	448
64. गायत्रीमन्त्रः	449

दिव्यस्तोत्रम्

1. श्री महागणेशपञ्चरत्नस्तोत्रम्	452
2. श्री गणेशपञ्चरत्नम्	453
3. गणपतिस्तोत्रम्	454
4. गुरुस्तोत्रम्	454
5. गुर्वष्टकम्	455
6. सुवर्णमालास्तुतिः	457
7. शिवपञ्चाक्षरस्तोत्रम्	459
8. शिवषडक्षरस्तोत्रम्	459
9. शिवाष्टकम्	460
10. द्वादशज्योतिर्लिङ्गस्तोत्रम्	462
11. द्वादशज्योतिर्लिङ्गस्मरणम्	463
12. वेदसारशिवस्तोत्रम्	464
13. शिवजयजयकारध्यानस्तोत्रम्	465
14. दारिद्र्यदहनशिवस्तोत्रम्	466
15. शिवताण्डवस्तोत्रम्	468
16. शिवमानसपूजा	470
17. श्री कैलासपतिप्रार्थना	471
18. श्री उमामहेश्वरस्तोत्रम्	472
19. अर्धनारीश्वरस्तोत्रम्	473
20. श्री महामृत्युञ्जयस्तोत्रम्	474
21. मृतसञ्जीवनस्तोत्रम्	477
22. शिवस्तोत्रम्	480
23. निर्वाणषट्कम्	481
24. कालभैरवाष्टकम्	482
25. आदित्यहृदयम्	484
26. नवग्रहदेवता प्रार्थना	487
27. श्रीरामचन्द्रस्तवः	488
28. कृष्णाष्टकम्	490
29. जगन्नाथाष्टकम्	492
30. श्रीमदनमोहनाष्टकम्	494
31. श्रीवेङ्कटेशप्रपत्तिः	495
32. श्रीवेङ्कटेशमङ्गलाशासनम्	497
33. श्रीजगद्धात्रीस्तोत्रम्	499
34. मीनाक्षीपञ्चरत्नम्	500
35. मीनाक्षीस्तोत्रम्	502
36. अम्बास्तोत्रम्	503
37. अन्नपूर्णास्तोत्रम्	505
38. इन्द्राक्षी स्तोत्रम्	508
39. कनकधारास्तोत्रम् (कनकलक्ष्मीस्तवः)	514
40. महालक्ष्म्यष्टकम्	517
41. श्रीसरस्वतीस्तोत्रम् (या कुन्देन्दु...)	518
42. श्रीगङ्गास्तोत्रम्	520
43. श्रीयमुनाष्टकम्	522

	विषयः	पृष्ठम्
44.	श्रीनर्मदाष्टकम्	524
45.	श्रीरामकृष्णास्तोत्रम्	526
46.	श्रीरामकृष्णध्यानस्तोत्रम्	527
47.	श्रीरामकृष्णप्रणाममन्त्रः	527
48.	श्रीशारदादेवी-ध्यानस्तोत्रम्	528
49.	श्रीशारदादेवीस्तोत्रम्	528
50.	श्रीविवेकानन्दध्यानम्	530
51.	श्रीविवेकानन्दपञ्चकम्	530
52.	श्रीदुर्गादेवीध्यानम्	531
53.	देवीप्रणामः (सर्व-मङ्गल-माङ्गल्ये)	532
54.	श्रीदुर्गासहस्रनामस्तोत्रम्	533
55.	श्रीललितासहस्रनामस्तोत्रम्	551
56.	उपदेशपञ्चकम्	585
57.	आदिदेव नमस्तुभ्यम्	586
58.	षट्पदीस्तोत्रम्	587
*	पातञ्जल-योगसूत्रपाठः	588
59.	त्रिवेणीस्तोत्रम्	597
60.	स्वरूपानुसन्धानम्	598
61.	सरस्वतीस्तोत्रम् (ऐं ऐं ऐं इष्टमन्त्रे...)	599

विविध श्लोकाः

1.	स्थापकाय च धर्मस्य सर्वधर्म स्वरुपिणे	(i)
2.	हृदयकमलमध्ये	(ii)
3.	ॐ तत्सत्	(viii)
4.	सर्वे भवन्तु सुखिनः	(ix)
5.	देवद्विजगुरुप्राज्ञपूजनं	(x)
6.	आत्मस्वरूप कथनम्	9
7.	शान्ताकारं भुजगशयनम्	11
8.	त्वं परं परमं तेजो	186
9.	सर्वशक्तीश्वरस्सर्वः	305
10.	हरेर्नाम हरेर्नाम	307
11.	वाणी गुणानुकथने	307
12.	एकं ब्रह्मैवाद्वितीयम्	310
13.	सत्यव्रतं सत्यपरम्	314
14.	अहं क्रतुरहं यज्ञः	336
15.	जगद्गुरो नमस्तुभ्यम्	340
16.	यं ध्यायन्ति बुधाः	347
17.	नमामीशमीशाननिर्वाणरूपम्	364
18.	यथा बिम्बमेकम्	408
19.	यस्मात् सर्वमिदम्	436
20.	यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः	438
21.	जननीं शारदां देवीं	450
22.	रामकृष्णनमनम्	451
23.	त्वमेव माता च पिता	451
24.	नमस्ते परमं ब्रह्म	599
25.	सर्वस्वरूपे सर्वेशे	599
26.	सत्संगत्वे निस्संगत्वं	599
27.	गीतागङ्गोदकम्	600
28.	दुर्जनः सज्जनो भूयात्	605
29.	नमः श्रीयतिराजाय	606
30.	सर्वस्तरतु दुर्गाणि	607
*	विषयसूची	(602-604)



The wavy waters in the picture are symbolic of Karma, and lotus, of Bhakti and the rising-sun, of Jnana. The encircling serpent is indicative of Yoga and the awakened Kundalini Shakti, while the swan in the picture stands for the Paramatman (Supreme Self). Therefore, the idea of the picture is that, by the union of Karma, Jnana, Bhakti and Yoga, the vision of the Paramatman is obtained.

— **SWAMI VIVEKANANDA**

SRI RAMAKRISHNA

SRI SARADA DEVI



SWAMI VIVEKANANDA

SWAMI BRAHMANANDA

॥ प्रार्थना ॥

ॐ गणानाँ त्वा गणपतिग्ं हवामहे कविं कवीना-मुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥

ॐ हंस हंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयाँत् ॥

ॐ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये ऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ ईशान-स्सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्माऽधिपति-ब्रह्मणोऽधिपति-ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

ॐ भू-र्भुव-स्सुवः ॥ ॐ नमः शाम्भवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

ॐ निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः । भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः । परमाय

नमः । परमलिङ्गाय नमः । एतत्सोमस्यं सूर्यस्य सर्वलिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम् ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नातिभवे भवस्वमाम् । भवोद्भवाय नमः ॥ वामदेवाय नमो ज्येष्ठाय नम-श्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नम-स्सर्व-भूतदमनाय नमो मनोन्मनाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्र-स्सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वो चेम शन्तमग्ं हृदे । सर्वो-ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे । तान् यज्ञस्य मायया सर्वा-नवयजामहे ॥ मृत्यवे स्वाहा मृत्यवे स्वाहा । ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

ॐ शं चं मे मयश्च मे प्रियं चं मेऽनुकामश्चं मे कामश्च मे सौमनसश्चं मे भद्रं चं मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता चं मे धर्ता चं मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्चं मे ज्ञात्रं च मे सूश्चं मे प्रसूश्चं मे सीरं च मे लयश्चं म ऋतं चं मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं चं मेऽनमित्रं च मेऽभयं च मे सुगं चं मे शयनं च मे सूषा चं मे सुदिनं च मे ॥ सदाशिवोम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमय ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्तें च प्रतिष्ठितः । तस्यं प्रकृतिं-लीनस्य यः परंस्स महेश्वरः ॥ सदाशिवोम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ हरिः ॐ तत्सत् ॥ श्रीरामकृष्णार्पणमस्तु ॥

॥ शान्तिमन्त्राः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ३ ॥

ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ४ ॥

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताꣳस्सम्बभूव । स मेन्द्रो मेधयाꣳ स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे

विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ५ ॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ६ ॥

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्मा ऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासग्ं शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्ं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ७ ॥

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्न-
स्सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः ।
मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पति-र्मधुमाग् अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ८ ॥

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठित-
माविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा
प्रहासीरनेनाधीतेनाहोरात्रान् संदधाम्यृतं वदिष्यामि सत्यं
वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु
वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ९ ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय
पूर्णमेवावशिष्यते ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ १० ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानिं शग्ंसिषद्विश्वे
देवाः सूक्तवाचः पृथिविमातर्मा मा हिग्ंसीर्मधु मनिष्ये मधु जनिष्ये
मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्ं-
शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ११ ॥

* * *

॥ ईशावास्योपनिषत् ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय
पूर्णमेवावशिष्यते । ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ईशा वास्यमिदगं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १ ॥
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतगं् समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥
असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तागंस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥
तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥
यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरगं् शुद्धमपापविद्धम् ।

क॒विर्मनी॒षी प॑रि॒भूः स्व॑यम्भू-र्याँथातथ्य॒तोऽर्था॒न्
व्यं॑दधाच्छाश्व॒तीभ्य॒ः समा॑भ्यः ॥ ८ ॥
अ॒न्धं तम॒ः प्रवि॑शन्ति॒ येऽवि॑द्यामु॒पास॑ते ।
तत॒ो भूय॑ इव॒ ते तमो॒ य उ॑ वि॒द्याया॑ग्ं र॒ताः ॥ ९ ॥
अ॒न्यदे॒वाहु॑र्वि॒द्यया॒ऽन्यदा॑हु॒रवि॑द्यया ।
इति॑ शुश्रुम॒ धीरा॑णां॒ ये न॒स्तद्वि॑चचक्षि॒रे ॥ १० ॥
वि॒द्यां चावि॑द्यां च॒ यस्तद्वेदो॒भय॑ग्ं स॒ह ।
अवि॑द्यया मृ॒त्युं ती॒र्त्वा वि॒द्यया॒ऽमृत॑मश्नुते ॥ ११ ॥
अ॒न्धं तम॒ः प्रवि॑शन्ति॒ येऽस॑म्भू॒तिमु॒पास॑ते ।
तत॒ो भूय॑ इव॒ ते तमो॒ य उ॒ सम्भू॑त्याग्ं र॒ताः ॥ १२ ॥
अ॒न्यदे॒वाहु॒ः सम्भ॑वाद॒न्यदा॑हु॒रस॑म्भवात् ।
इति॑ शुश्रुम॒ धीरा॑णां॒ ये न॒स्तद्वि॑चचक्षि॒रे ॥ १३ ॥
सम्भू॑तिं च वि॒नाशं॑ च॒ यस्तद्वेदो॒भय॑ग्ं स॒ह ।
वि॒नाशे॑न॒ मृत्यु॑ं ती॒र्त्वा सम्भू॑त्या॒ऽमृत॑मश्नुते ॥ १४ ॥
हि॒र॒ण्मये॑न॒ पात्रे॑ण स॒त्यस्यापि॑हि॒तं मुख॑म् ।
तत्त्वं पू॑ष॒न्नपा॑वृणु स॒त्यध॑र्माय दृ॒ष्टये॑ ॥ १५ ॥
पूष॑न्नेकर्षे यम सूर्य॒ प्राजा॑पत्य व्यू॒ह र॒श्मीन्
समू॑ह॒ तेजो॒ यत्ते॑ रू॒पं कल्या॑णतम॒ं तत्ते॑ पश्यामि ।
यो॒ऽसाव॒सौ पुरु॑ष॒ः सो॒ऽहम॑स्मि ॥ १६ ॥

वायुरनिलममृतमथेदं भस्मान्तगं् शरीरम् ।
ॐ ३ क्रतो स्मरं कृतगं् स्मर क्रतो स्मरं कृतगं् स्मर ॥ १७ ॥
अग्ने नयं सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ शान्तिः शान्तिः शान्तिः ॥

आत्मस्वरूप कथनम्

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियोदर्शने
किं तत्राहमतो भवान्परमकं ज्योतिस्तदस्मि प्रभो।।

- श्री शङ्कराचार्य कृतम्

Q. Through which light do you perceive the objects of the world ?

Ans. I perceive the objects of the world through the light of the Sun in the day-time and through the Lamp-lights etc. in the night-time.

Q. Through the aid of which light do you observe that " This is sun; This is lamp-light etc.?"

Ans. I recognize them through the Eyes.

Q. How do you know them when the eyes are closed ?

Ans. I understand them through the Intellect.

Q. How does the intellect get activated with the knowledge of perceiving the objects ?

Ans. I am indeed the cause for the perception in my intellect.

Q. Oh then, are you not the source of divine light through which the sun, lamp, eye, intellect, get illumination ?

Ans. Yes Lord, I am the self-effulgent Atman.

॥ नारायणोपनिषत् ॥

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि-नावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति। नारायणात्प्राणो जायते। मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणाद्-ब्रह्मा जायते। नारायणाद्-रुद्रो जायते। नारायणादिन्द्रो जायते। नारायणात्प्रजापतयः प्रजायन्ते। नारायणाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि च छन्दाग्ंसि। नारायणादेव समुत्पद्यन्ते। नारायणे प्रवर्तन्ते। नारायणे प्रलीयन्ते॥

ओम्। अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। द्यावापृथिव्यौ च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। ऊर्ध्वश्च नारायणः। अधश्च नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदग्ं सर्वम्। यद्भूतं यच्च भव्यम्। निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति कश्चित्। य एवं वेद। स विष्णुरेव भवति स विष्णुरेव भवति॥

ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि।

एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवस्सर्वमायुरेति । विन्दते प्राजापत्यग्ं रायस्पोषं गौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । य एवं वेद ॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् । अकार उकार मकार इति । तानेकधा समभरत्तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ॐ नमो नारायणायेति मन्त्रोपासकः । वैकुण्ठभुवनलोकं गमिष्यति । तदिदं परं पुण्डरीकं विज्ञानघनम् । तस्मात्तदिदावन्मात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम् । सर्वभूतस्थमेकं नारायणम् । कारणरूपमकार परब्रह्मोम् । एतदथर्व शिरोयोऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात्प्रमुच्यते । सर्व वेद पारायण पुण्यं लभते । नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

*

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

॥ ऐतरेयोपनिषत् ॥

ऋग्वेदः ऐतरेयद्वितीयारण्यकम्

प्रथमोऽध्यायः

प्रथमः खण्डः

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठित-माविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति ॥ १ ॥ स इमांल्लोकानसृजताम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः । पृथिवी मरो या अधस्तात्ता आपः ॥ २ ॥ स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति । सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ॥ ३ ॥ तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाऽण्डम् मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुषः आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्-निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥ ४ ॥

द्वितीयः खण्डः

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन्तमशनाया-पिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति ॥ १ ॥ ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति । ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमल-मिति ॥ २ ॥ ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतं । ता अब्रवीद्यथायतनं प्रविशतेति ॥ ३ ॥ अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वा ऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन् ॥ ४ ॥तमशनायापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति। ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति। तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्याम-शनाया पिपासे भवतः ॥ ५ ॥

तृतीयः खण्डः

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥ १ ॥ सोऽपोऽभ्यं-तपत्ताभ्योऽभितप्ताभ्यो मूर्ति-रजायत । या वै सा मूर्तिरजायतान्नं वै तत् ॥ २ ॥ तदेनत्सृष्टं पराङ्त्यजिघांसत्तद्वाचा ऽजिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुं स यद्धैनद्वाचाऽग्रहैष्यदभिव्याहृत्य

हैवान्नंमत्र॒प्स्यत् ॥ ३ ॥ तत्प्रा॒णेनाजिघृक्षत्तन्नाशक्नोत्प्रा॒णेन ग्रं॑हीतुं स यद्धैनत्प्रा॒णेनाग्रं॑हैष्यद॒भिप्राण्य हैवान्नंमत्र॒प्स्यत् ॥ ४ ॥ तच्च॒क्षुषा ऽजिघृक्षत्तन्नाशक्नोच्च॒क्षुषा ग्रं॑हीतुं स यद्धैनच्च॒क्षुषाऽग्रं॑हैष्यद्दृ॒ष्ट्वा हैवान्नंमत्र॒प्स्यत् ॥ ५ ॥ तच्छ्रो॒त्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रो॒त्रेण ग्रं॑हीतुं स यद्धैन॒च्छ्रोत्रेणाग्रहैष्यच्छ्रु॒त्वा हैवान्नंमत्र॒प्स्यत् ॥ ६ ॥ तत्त्व॒चा ऽजिघृक्षत्तन्नाशक्नोत्त्व॒चा ग्रं॑हीतुं स यद्धैनत्त्व॒चाऽग्रहैष्यत् स्पृ॒ष्ट्वा हैवान्नंमत्र॒प्स्यत् ॥ ७ ॥ तन्म॒नसाऽजिघृ॒ऽक्षत्तन्नाशक्नोन्म॒नसा ग्रं॑हीतुं स यद्धैनन्म॒नसाऽग्रहैष्यद्ध्या॒त्वा हैवान्नंमत्र॒प्स्यत् ॥ ८ ॥ तच्छि॒श्नेना जिघृक्षत्तन्नाशक्नोच्छि॒श्नेन ग्रं॑हीतुं स यद्धैनच्छि॒श्नेनाग्रहैष्यद्विसृ॒ज्य हैवान्नंमत्र॒प्स्यत् ॥ ९ ॥ तद॒पानेनाजिघृक्षत्तदावयत्सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा ए॒ष यद्वा॒युः ॥ १० ॥ स ईक्षत कथं न्विदं मदृते स्यादि॒ति स ईक्षत कतरेण प्रपद्या इ॒ति । स ईक्षत यदि वा॒चाऽभिव्याहृ॑तं यदि प्रा॒णेनाभिप्राणितं यदि च॒क्षुषा दृ॒ष्टं यदि श्रो॒त्रेण श्रु॒तं यदि त्व॒चा स्पृ॒ष्टं यदि म॒नसा ध्या॒तं यद्व॒पानेनाभ्यपानितं यदि॑ शि॒श्नेन विसृ॒ष्टमथ को॑ऽहमि॒ति ॥ ११ ॥ स एतमेव सीमानं विदार्यैतया द्वारा प्रा॑प॒द्यत। सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनन्तस्य त्रय आवसथास्त्रयः॑ स्व॒प्ना अ॒यमावसथो ऽयमावसथोऽयमावस॑थ इ॒ति ॥ १२ ॥ स जातो भूतान्यभिव्यै॒रव्यत् किमिहान्यं वावदिषदि॒ति । स एतमेव पुरुषं ब्रह्म ततममपश्यदिदम-

दर्शमिती ३ ॥ १३ ॥ तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥ १४ ॥

द्वितीयोऽध्यायः

प्रथमः खण्डः

ॐ पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतमात्मन्येवाऽऽत्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति तदस्य प्रथमं जन्म ॥ १ ॥ तत् स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा तस्मादेनां न हिनस्ति साऽस्यैतमात्मानमत्र गतं भावयति ॥ २ ॥ सा भावयित्री भावयितव्या भवति तं स्त्री गर्भं बिभर्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येषां लोकानां सन्तत्या एवं सन्तता ह्येमे लोकास्तदस्य द्वितीयं जन्म ॥ ३ ॥ सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयतेऽथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म ॥ ४ ॥ तदुक्तमृषिणा-गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच ॥ ५ ॥ स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्या-मुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्समभवत् ॥ ६ ॥

तृतीयोऽध्यायः

प्रथमः खण्डः

ॐ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादुचास्वादु च विजानाति ॥ १ ॥ यदेतद्धृदयं मनश्चैतत् संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥ २ ॥ एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रम् प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥ ३ ॥ स एतेन प्रज्ञेनाऽऽत्मनाऽस्माल्लोका-दुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवदित्योम् ॥ ४ ॥

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठित-माविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ तैत्तिरीयोपनिषत् ॥

प्रथमा शीक्षावल्ली

ॐ शं नो मित्र-श्शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णु-रुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॑। ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

शिक्षाशास्त्रार्थसङ्ग्रहः

शीक्षां व्याॅख्यास्यामः। वर्ण-स्स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्त-श्शीॅक्षाध्यायः ॥ २ ॥

संहितोपासनम्

सह नौ यशः। सह नौ ब्रह्मवर्चसम्। अथातस्सग्ंहिताया उपनिषदं व्याॅख्यास्यामः। पञ्चस्वधिकरणेषु। अधिलोकमधि-ज्यौतिष-मधिविद्य-मधिप्रजं-मध्यात्मम्। ता महासग्ंहिता इत्याचक्षते। अथाधिलोकम्। पृथिवी पूॅर्वरूपम्। द्यौ रुत्तररूपम्। आकाश-स्सन्धिः ॥ ३ ॥

वायु-स्सन्धानम्। इत्यधिलोकम्। अथाधिज्यौतिषम्। अग्निः पूॅर्वरूपम्। आदित्य उत्तररूपम्। आपस्सन्धिः। वैद्युतस्सन्धानम्। इत्यधिज्यौतिषम्। अथाधिविद्यम्। आचार्यः पूॅर्वरूपम् ॥ ४ ॥

अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनग्ं सन्धानम्।

इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजासन्धिः । प्रजननगं् सन्धानम् । इत्यधिप्रजम् ॥ ५ ॥

अथाध्यात्मम् । अधराहनुः पूर्वरूपम् । उत्तराहनुरुत्तररूपम् । वाक्सन्धिः । जिह्वासन्धानम् । इत्यध्यात्मम् । इतीमामहासगं्हिताः । य एवमेता महासगं्हिता व्याख्यांता वेद । सन्धीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ६ ॥

मेधादि-सिद्ध्यर्था आवहन्तीहोम-मन्त्राः

यश्छन्दसा-मृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताꣳस्संबभूव । स मेन्द्रो मेधयाँ स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोसि मेधया पिहितः । श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥ ७ ॥

कुर्वाणा चीरं-मात्मनः । वासागं्सि मम गावश्च । अन्नपाने चं सर्वदा । ततो मे श्रिय-मावह । लोमशां पशुभिस्सह स्वाहाँ । आमायन्तु ब्रह्मचारिणस्स्वाहाँ । विमाऽऽयन्तु ब्रह्मचारिणस्स्वाहाँ । प्रमाऽऽयन्तु ब्रह्मचारिणस्स्वाहाँ । दमायन्तु ब्रह्मचारिणस्स्वाहाँ । शमायन्तु ब्रह्मचारिणस्स्वाहाँ ॥ ८ ॥

यशो जनेऽसानि स्वाहाँ । श्रेयान् वस्यसोऽसानि स्वाहाँ । तं त्वा भग प्रविशानि स्वाहाँ । स मा भग प्रविश स्वाहाँ । तस्मिन् सहस्रशाखे । निभगाऽहं त्वयि मृजे स्वाहाँ । यथाऽऽपः

प्रवंताऽऽयन्तिं । यथा मासां अहर्जरम् । एवं मां ब्रह्मचारिणंः । धात-रायंन्तु सर्वत-स्स्वाहाँ । प्रतिवेशोंऽऽसि प्रमांभाहि प्रमांपद्यस्व ॥ ९ ॥

व्याहृत्युपासनम्

भू-र्भुव-स्सुव-रिति वा एता-स्तिस्रो व्याहृंतयः । तासांमुहस्मै तां चंतुर्थीम् । माहांचमस्यः प्रवेंदयते । मह इतिं । तद्ब्रह्मं । स आत्मा । अङ्गाँन्यन्या देवताँः । भूरिति वा अयं लोकः । भुव इत्यन्तरिंक्षम् । सुव-रित्यसौ लोकः ॥ १० ॥

मह इत्यांदित्यः । आदित्येन वाव सर्वें-लोका महींयन्ते । भूरिति वा अग्निः । भुव इतिं वायुः । सुव-रित्यांदित्यः । मह इतिं चन्द्रमाँः । चन्द्रमंसा वाव सर्वांणि ज्योतींग्ंषि महींयन्ते । भू-रिति वा ऋचंः । भुव इति सामांनि । सुव-रिति यजूग्ंषि ॥ ११ ॥

मह इति ब्रह्मं । ब्रह्मंणा वाव सर्वें वेदा महींयन्ते । भूरिति वै प्राणः । भुव इत्यंपानः । सुव-रितिं व्यानः । मह इत्यन्नम्ँ । अन्नेंन वाव सर्वें प्राणा महींयन्ते । ता वा एताश्चतंस्रश्चतुर्धा । चतंस्रश्चतस्रो व्याहृंतयः । ता यो वेदं । स वेंद ब्रह्मं । सर्वेंऽस्मैदेवा बलिमावंहन्ति ॥ १२ ॥

मनोमयत्वादि-गुणक-ब्रह्मोपासनया स्वाराज्य-सिद्धिः

स य एषोंऽन्त-र्हृदय आकाशः । तस्मिंन्नयं पुरुषो मनोमयंः । अमृंतो हिरण्मयंः । अन्तंरेण तालुंके । य एषस्तनं इवावलम्बंते । सेंन्द्रयोनिः । यत्रासौ केंशान्तो विवर्तते । व्यपोह्यं शीर्षकपाले ।

भूरित्यग्नौ प्रतिंतिष्ठति । भुव इतिं वायौ ॥ १३ ॥

सुवरित्यांदित्ये । मह इति ब्रह्मंणि । आप्नोति स्वाराँज्यम् । आप्नोति मनंस्पतिम्ँ । वाक्पंतिश्चक्षुंष्पतिः । श्रोत्रंपति-र्विज्ञानंपतिः । एतत्ततों भवति । आकाशशंरीरं ब्रह्म । सत्यात्मं प्राणारांमं मनं आनन्दम् । शान्तिंसमृद्ध-ममृतम्ँ । इतिं प्राचीन योग्योपाँस्व ॥ १४ ॥

पृथिव्याद्युपाधिक-पञ्च-ब्रह्मोपासनम्

पृथिव्यंन्तरिंक्षं द्यौ-र्दिशोंऽवान्तरदिशाः । अग्निर्वायुरांदित्य-श्चन्द्रमा नक्षंत्राणि । आप ओषंधयो वनस्पतंय आकाश आत्मा । इत्यंधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोंऽपान उंदानस्संमानः । चक्षुश्श्रोत्रं मनो वाक् त्वक् । चर्ममाग्ंसग्ग् स्नावाऽस्थिं मज्जा । एत-दंधिविधाय ऋषि-रवोंचत् । पाङ्क्तं वा इदग्ं सर्वम्ँ । पाङ्क्तेंनैव पाङ्क्तग्ं स्पृणोतीतिं ॥ १५ ॥

प्रणवोपासनम्

ओ-मिति ब्रह्म । ओमितीदग्ं सर्वम्ँ । ओमित्येत-दंनुकृति हस्म वा अप्योश्रांवयेत्याश्रांवयन्ति । ओ-मिति सामांनि गायन्ति । ओग्ं शो-मितिं शस्त्राणिं शग्ंसन्ति । ओमित्यंध्वर्युः प्रंतिगरं प्रतिंगृणाति । ओ-मिति ब्रह्मा प्रसौंति । ओ-मित्यंग्निहोत्र-मनुंजानाति । ओमितिं ब्राह्मणः प्रंवक्ष्यन्नांह ब्रह्मोपाँप्नवानीतिं । ब्रह्मैवोपाँप्नोति ॥ १६ ॥

स्वाध्याय-प्रशंसा

ऋतं च स्वाध्यायप्रवंचने च । सत्यं च स्वाध्यायप्रवंचने च । तपश्च स्वाध्यायप्रवंचने च । दमश्च स्वाध्यायप्रवंचने च । शमश्च स्वाध्यायप्रवंचने च । अग्नयश्च स्वाध्यायप्रवंचने च । अग्निहोत्रं च स्वाध्यायप्रवंचने च । अतिथयश्च स्वाध्यायप्रवंचने च । मानुषं च स्वाध्यायप्रवंचने च । प्रजा च स्वाध्यायप्रवंचने च । प्रजनश्च स्वाध्यायप्रवंचने च । प्रजातिश्च स्वाध्यायप्रवंचने च । सत्यमिति सत्यवचा राथी तरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्याय प्रवचने एवेति नाको मौद्गल्यः । तद्धि तपः-स्तद्धि तपः ॥ १७ ॥

ब्रह्मज्ञान-प्रकाशक-मन्त्रः

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरे-रिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतं-मस्मि । द्रविणगुं सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥ १८ ॥

शिष्यानुशासनम्

वेदमनूच्याचार्योऽन्तेवासिन-मनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १९ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो

भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकग्ं सुचरितानि । तानि त्वयोपास्यानि ॥ २० ॥

नो इतराणि । ये के चास्मच्छ्रेयाग्ंसो ब्राह्मणाः । तेषां त्वयाऽऽसने न प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ २१ ॥

ये तत्र ब्राह्मणा-स्सम्मर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्म-कामास्स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणा-स्सम्मर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्म-कामास्स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमुचैतदुपास्यम् ॥ २२ ॥

उत्तरशान्तिपाठः

शं नो मित्र-श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्व-मेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ॥

द्वितीया ब्रह्मानन्दवल्ली

ॐ सह नाव-ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीत-मस्तु मा विद्विषावहै ।

ॐ शान्तिः शान्तिः शान्तिः ॥

उपनिषत्सारसंग्रहः

ॐ ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः । वायो-रग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तस्येदं-मेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

पञ्चकोशविवरणम्

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीग्श्रिताः । अथो अन्नेनैव जीवन्ति । अथैन-दपियन्त्यन्ततः । अन्नग्ं हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नग्ं हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मा-दन्नरसमयात् ।

अन्योऽन्तर आत्माँ प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविंध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राणं एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोंको भवति ॥ २ ॥

प्राणं देवा अनुप्राणंन्ति । मनुष्याँः पशवंश्च ये । प्राणो हि भूताना-मायुः । तस्माँ-त्सर्वायुषमुंच्यते । सर्व-मेव त आयुं-र्यन्ति । ये प्राणं ब्रह्मोपासंते । प्राणो हि भूतांना-मायुः । तस्मात्सर्वायुषमुच्यंत इति । तस्यैष एव शारीर आत्मा । यंः पूर्वस्य । तस्माद्वा एतस्माँत् प्राणमयात् । अन्योऽन्तर आत्मां मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविंध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुंरेव शिरः । ऋग्दक्षिंणः पक्षः । सामोत्तंरः पक्षः । आदेंश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोंको भवति ॥ ३ ॥

यतो वाचो निवंर्तन्ते । अप्राँप्य मनंसा सह । आनन्दं ब्रह्मंणो विद्वान् । न बिभेति कदांचनेति । तस्यैष एव शारीर आत्मा । यंः पूर्वस्य । तस्माद्वा एतस्मांन्मनोमयात् । अन्योऽन्तर आत्मा विंज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविंध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रंद्धैव शिरः । ऋतं दक्षिंणः पक्षः । सत्यमुत्तंरः पक्षः । योंग आत्मा । महः पुच्छं प्रतिष्ठा । तदप्येष श्लोंको भवति ॥ ४ ॥

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपिं च । विज्ञानं देवास्सर्वे" । ब्रह्म ज्येष्ठमुपासते । विज्ञान् ब्रह्म चेद्वेदं । तस्माच्चेन्न प्रमाद्यंति । शरीरें पाप्मनो हित्वा । सर्वान् कामान् समश्नुत इति । तस्यैष एव शारीर आत्मा । यंः पूर्वस्य । तस्माद्वा एतस्माद्विंज्ञान-मयात् । अन्योऽन्तर आत्मांऽऽनन्दमयः । तेनैंष पूर्णः । स वा एष पुरुषविंध एव । तस्य पुरुंषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियं-मेव शिरः । मोदो दक्षिंणः पक्षः । प्रमोद उत्तंरः पक्षः । आनंन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोंको भवति ॥ ५ ॥

असंन्नेव सं भवति । असद्-ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेतिं चेद्वेद । सन्त-मेनं ततो विंदु-रिति । तस्यैष एव शारीर आत्मा । यंः पूर्वस्य । अथातोंऽनुप्रश्नाः । उताविद्वा-नमुं लोकं प्रेत्यं । कश्चन गंच्छती ३ । आहों विद्वा-नमुं लोकं प्रेत्यं । कश्चित्समंश्नुता ३ उ । सोंऽकामयत । बहुस्यां प्रजांयेयेतिं । स तपोंऽतप्यत । स तपं-स्तप्त्वा । इदगं्-सर्वं-मसृजत । यदिदं किञ्चं । तत्सृष्ट्वा । तदेवानुप्राविंशत् । तदंनुप्रविश्यं । सच्च त्यच्चांभवत् । निरुक्तं चानिंरुक्तं च । निलयंनं चानिंलयनं च । विज्ञानं चाविंज्ञानं च । सत्यं चानृतं च संत्य-मभवत् । यदिंदं किंच । तत्सत्य-मित्याचक्षते । तदप्येष श्लोंको भवति ॥ ६ ॥

अभयप्रतिष्ठा

असद्वा इद-मग्रं आसीत् । ततो वै सदंजायत । तदात्मानग्ं

स्वयं-मकुरुत । तस्मा-त्तत्सुकृतमुच्यंत इति । यद्वै तत्सुकृतम् । रंसो वै सः । रसग्ग् ह्येवायं लब्ध्वाऽऽनंन्दी भवति । को ह्येवान्याँत् कः प्राण्यात् । यदेष आकाश आनंन्दो न स्यात् । एष ह्येवानंन्दयाति । यदा ह्येंवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते ऽनिलयनेऽभयं प्रतिंष्ठां विन्दते । अथ सोऽभयं गंतो भवति । यदा ह्येंवैष एतस्मिन्नुदर-मन्तंरं कुरुते । अथ तस्य भंयं भवति । तत्त्वेव भयं विदुषोऽमंन्वानस्य । तदप्येष श्लोंको भवति ॥ ७ ॥

ब्रह्मानन्दमीमांसा

भीषाऽस्मा-द्वातंः पवते । भीषोदेंति सूर्यंः । भीषाऽस्मादग्निं-श्चेन्द्रश्च । मृत्युर्धावति पञ्चंम इति । सैषाऽऽनन्दस्य मीमाग्ंसा भवति । युवा स्यात्साधुयुंवाऽध्यायकः । आशिष्ठो दृढिष्ठों बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्यं पूर्णा स्यात् । स एको मानुषं आनन्दः । ते ये शतं मानुषां आनन्दाः । स एको मनुष्यगन्धर्वाणां-मानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतं मनुष्यगन्धर्वाणां-मानन्दाः । स एको देवगन्धर्वाणां-मानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतं देवगन्धर्वाणां-मानन्दाः । स एकः पितृणां चिरलोक-लोकानांमानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतं पितृणां चिरलोक लोकानां-मानन्दाः । स एक आजानजानां देवानां-मानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतमाजानजानां देवानां-मानन्दाः । स एकः कर्मदेवानां देवानां-

मानन्दः । ये कर्मणा देवानंपियन्ति । श्रोत्रियस्य चाकामंहतस्य । ते ये शतं कर्मदेवानां देवानांमानन्दाः । स एको देवानां मानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतंदेवानां-मानन्दाः । स एक इन्द्रंस्यानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतमिन्द्रंस्यानन्दाः । स एको बृहस्पतें-रानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतं बृहस्पतें-रानन्दाः । स एकः प्रजापतें-रानन्दः । श्रोत्रियस्य चाकामंहतस्य । ते ये शतं प्रजापतें-रानन्दाः । स एको ब्रह्मणं आनन्दः । श्रोत्रियस्य चाकामंहतस्य । स यश्चांयं पुरुषे । यश्चासांवादित्ये । स एकंः । स यं एवंवित् । अस्माल्लोंकात्प्रेत्य । एतमन्नमय-मात्मान-मुपंसंक्रामति । एतं प्राणमय मात्मान-मुपंसंक्रामति । एतं मनोमय-मात्मान-मुपंसंक्रामति । एतं विज्ञानमय-मात्मान-मुपंसंक्रामति । एतमानन्द-मय-मात्मान-मुपंसंक्रामात । तदप्येष श्लोंको भवति ॥ ८ ॥

यतो वाचो निवंर्तन्ते । अप्राँप्य मनंसा सह । आनन्दं ब्रह्मंणो विद्वान् । न बिभेति कुतंश्चनेति । एतगं् ह वावं न तपति । किमहगं् साधुं नाकरवम् । किमहं पाप-मकरंव-मिति । स य एवं विद्वा-नेते आत्मांनग्ग् स्पृणुते । उभे ह्येंवैष एते आत्मांनग्ग् स्पृणुते । य एवं वेदं । इत्युंपनिषंत् ॥ ९ ॥

ॐ सह नांववतु .....ॐ शान्तिः शान्तिः शान्तिंः ॥

तृतीया भृगुवल्ली

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीतमस्तु मा विद्विषावहै" ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ब्रह्मजिज्ञासा

भृगु-र्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत् प्रोवाच । अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति । तग् होवाच । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

पञ्चकोशान्तःस्थित-ब्रह्मनिरूपणम्

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तग् होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ २ ॥

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तग् होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३ ॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तगं् होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ४ ॥

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तगं् होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ५ ॥

आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिः-ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ६ ॥

अन्नब्रह्मोपासनम्

अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेत-दन्न-मन्ने प्रतिष्ठितम् । स य एत-दन्न-मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा-नन्नादो भवति । महान् भवति प्रजया पशुभिः-

ब्रह्मवर्चसेनं । महान् कीर्त्या ॥ ७ ॥

अन्नं न परिंचक्षीत । तद्व्रतम् । आपो वा अन्नम्ँ । ज्योतिंरन्नादम् । अप्सु ज्योतिः प्रतिंष्ठितम् । ज्योतिष्यापः प्रतिंष्ठिताः । तदेत-दन्न-मन्ने प्रतिंष्ठितम् । स य एत-दन्न-मन्ने प्रतिंष्ठितं वेद प्रतिंतिष्ठति । अन्नंवा-नन्नादो भंवति । महान् भंवति प्रजयां पशुभिं-ब्रह्मवर्चसेनं । महान् कीर्त्या ॥ ८ ॥

अन्नं बहु कुंर्वीत । तद्व्रतम् । पृथिवी वा अन्नम्ँ । आकाशोंऽन्नादः । पृथिव्यामांकाशः प्रतिंष्ठितः । आकाशे पृंथिवी प्रतिंष्ठिता । तदेत-दन्न-मन्ने प्रतिंष्ठितम् । स य एत-दन्न-मन्ने प्रतिंष्ठितं वेद प्रतिंतिष्ठति । अन्नंवा-नन्नादो भंवति । महान् भंवति प्रजयां पशुभिं-ब्रह्मवर्चसेनं । महान् कीर्त्या ॥ ९ ॥

सदाचारप्रदर्शनम् । ब्रह्मानन्दानुभवः

न कंचन वसतौ प्रत्यांचक्षीत । तद्व्रतम् । तस्माद्यया कया च विधया बह्वंन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतोंऽन्नगं् राद्धम् । मुखतोऽस्मा अंन्नगं् राध्यते । एतद्वै मध्यतोंऽन्नगं् राद्धम् । मध्यतोऽस्मा अंन्नगं् राध्यते । एतद्वा अन्ततोंऽन्नगं् राद्धम् । अन्ततोऽस्मा अंन्नगं् राध्यते । य एंवं वेद । क्षेम इंति वाचि । योगक्षेम इति प्रांणापानयोः । कर्मेंति हस्तयोः । गति-रिंति पादयोः । विमुक्ति-रिंति पायौ । इति मानुषीं-रसमाज्ञाः । अथ दैवीः । तृप्ति-रिंति वृष्टौ । बल-मिंति

विद्युति । यश इंति पशुषु । ज्योतिरिति नंक्षत्रेषु । प्रजाति-रमृत-मानन्द इंत्युपस्थे । सर्व-मिंत्याकाशे । तत् प्रतिष्ठेत्युंपासीत । प्रतिष्ठांवान् भवति । तन्मह इत्युंपासीत । मंहान् भवति । तन्मन इत्युंपासीत । मानंवान् भवति । तन्नम इत्युंपासीत । नम्यन्तेंऽस्मै कामाः । तद्ब्रह्मेत्युंपासीत । ब्रह्मंवान् भवति । तद्ब्रह्मणः परिमर इत्युंपासीत । पर्येणं म्रियन्ते द्विषन्तं-स्सपत्नाः । परि येंऽप्रियांभ्रातृव्याः । स यश्चांयं पुरुषे । यश्चासांवादित्ये । स एकंः । स यं एवंवित् । अस्माल्लोंकात् प्रेत्य । एत-मन्नमय-मात्मान-मुपंसंक्रम्य । एतं प्राणमय-मात्मान-मुपंसंक्रम्य । एतं मनोमय-मात्मान-मुपंसंक्रम्य । एतं विज्ञानमय-मात्मान-मुपंसंक्रम्य । एतमानन्दमय-मात्मान-मुपंसंक्रम्य । इमान् लोकान् कामान्नी काम-रूप्यंनुसंचरन् । एतत्साम गांयन्नास्ते । हा ३ वु हा ३ वु हा ३ वुं । अहमन्न-महमन्न-महमन्नम् । अहमन्नादो २ ऽहमन्नादो २ ऽहमन्नादः । अहग् श्लोककृ-दहग् श्लोककृ-दहग् श्लोककृत् । अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भाइ । योमा ददाति स इदेव मा ३ वाः । अह-मन्नमन्नं-मदन्तमा ३ द्मि । अहं विश्वं भुवंन-मभ्यंभवाम् । सुवर्न ज्योतींः । य एवं वेदं । इत्युंपनिषंत् ॥ १० ॥

ॐ सह नांववतु .....ॐ शान्तिः शान्तिः शान्तिंः ॥

महानारायणोपनिषत्

चतुर्थः प्रश्नः

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।

ॐ शान्तिः शान्तिः शान्तिः ॥

अम्भस्यपारे [1]

अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्। शुक्रेण ज्योतीगंषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः। यस्मिन्निदगं सं च विचैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः। तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्। येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसाच। यमन्त-स्समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः। यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचसर्ज भूम्याम्। यदोषधीभिः पुरुषान् पशूगश्च विवेश भूतानि चराचराणि। अतः परं नान्यदणीयसगं हि पराात्परं यन्महतो महान्तम्। यदेक-मव्यक्त-मनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥

तदेवर्तं तदु सत्यमाहु-स्तदेव ब्रह्म परमं कवीनाम्। इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः। तदेवाग्निस्तद्वायु-स्तत्सूर्यस्तदु चन्द्रमाः। तदेव शुक्रममृतं तद्ब्रह्म

तदाप-स्स प्रजापतिः । सर्वे-निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतव-स्संवत्सरश्च कल्पन्ताम् । स आपः प्रदुघे उभे इमे अन्तरिक्ष-मथो सुवः । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् । न तस्येशे कश्चन तस्य नाम महद्यशः ॥

न संदृशे तिष्ठति रूप-मस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति । अद्भ्य-स्सम्भूतो हिरण्यगर्भ इत्यष्टौ । एष हि देवः प्रदिशोऽनुसर्वाः पूर्वोहि जात-स्स उ गर्भे अन्तः । सविजायमान-स्सजनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति संपतत्रै-र्द्यावापृथिवी जनयन् देव एकः । वेन-स्तत्पश्य-न्विश्वा भुवनानि विद्वान् यत्र विश्वं भवत्येकनीळम् । यस्मिन्निदगं् सं च विचैकगं् स ओतः प्रोतश्च विभुः प्रजासु । प्रतद्वोचे अमृतं नु विद्वान् गन्धर्वो नाम निहितं गुहासु ॥

त्रीणि पदा निहिता गुहासु यस्तद्वेद सवितुः पितासत् । स नो बन्धु-र्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यत्र देवा अमृतमानशाना-स्तृतीये धामन्यभ्यैरयन्त । परिद्यावापृथिवी यन्ति सद्यः परि लोकान् परि दिशः परि सुवः । ऋतस्य तन्तुं

विततं विचृत्य तदपश्यत्तदभवत् प्रजासु । परीत्य लोकान् परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्यात्मनाऽऽत्मानमभि-संबभूव । सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् । उद्दीप्यस्व जातवेदो ऽपघ्नन्निर्ऋतिं मम ॥

पशूग्श्च मह्यमावह जीवनं च दिशोदिश । मानो हिग्ंसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥

गायत्रीमन्त्राः

पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् । तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो नन्दिः प्रचोदयात् । तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नःषण्मुखः प्रचोदयात् । तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् । वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् । नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । वज्रनखाय विद्महे तीक्ष्णदग्ंष्ट्राय धीमहि । तन्नो नारसिग्ंहः प्रचोदयात् ॥

भास्कराय॑ विद्महे॑ महद्युतिकराय॑ धीमहि । तन्नो॑ आदित्यः प्रचो॒दया॑त् । वैश्वानराय॑ विद्महे॑ लाली॒लाय॑ धीमहि । तन्नो॑ अग्निः प्रचो॒दया॑त् । कात्या॒यनाय॑ विद्महे॑ कन्यकुमारि॑ धीमहि । तन्नो॑ दुर्गिः प्रचो॒दया॑त् ॥

दूर्वासूक्तम्

स॒ह॒स्र॒पर॑मा दे॒वी श॒तमू॑ला श॒ताङ्कु॑रा । सर्वं॑ हरतु॑ मे पा॒पं दू॒र्वा दु॑स्स्वप्न॒नाश॑नी । काण्डा॑त्काण्डात् प्र॒रोह॑न्ती॒ परु॑षः परुष॒ः परि॑ । एवानो॑ दूर्वे॒ प्रत॑नु स॒हस्रे॑ण श॒तेन॑ च । या श॒तेन॑ प्रत॒नोषि॑ स॒हस्रे॑ण वि॒रोह॑सि । तस्या॑स्ते देवीष्टके वि॒धेमं॑ ह॒विषा॑ व॒यम् । अश्व॑क्रान्ते॒ रथ॑क्रान्ते वि॒ष्णुक्रा॑न्ते व॒सुन्ध॑रा । शिरसा॑ धार॑यिष्यामि॒ र॒क्ष॒स्व मा॑ पदे॒पदे ॥

मृत्तिकासूक्तम्

भूमि-र्धे॑नुर्धरणी लो॑कधा॒रिणी । उ॒द्धृता॑ऽसि वरा॒हे॒ण॒ कृ॒ष्णे॒न शं॑त-बा॒हुना । मृ॒त्तिके॑ हन॑ मे पा॒पं॑ यन्म॒या दु॑ष्कृ॒तं॑ कृतम् । मृ॒त्तिके॑ ब्रह्म॑दत्ता॒ऽसि॒ का॒श्यपे॑नाभि॒मन्त्रि॑ता । मृ॒त्तिके॑ देहि॑ मे पु॒ष्टिं॑ त्व॒यि सं॑र्वं॑ प्र॒तिष्ठि॑तम् ॥

मृ॒त्तिके॑ प्रतिष्ठि॑ते स॒र्वं॑ त॒न्मे नि॑र्णु॒द॒ मृत्ति॑के । तया॑ ह॒तेन॑ पापे॒न॒ ग॒च्छा॒मि पं॑रमां॒ गतिम् ॥

शत्रुजयमन्त्राः

यतं इन्द्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्नं ऊतये विद्विषो विमृधो जहि । स्वस्तिदा विशस्पतिं-वृत्रहा विमृधोवशी । वृषेन्द्रः पुर एतु न-स्स्वस्तिदा अभयङ्करः । स्वस्ति न इन्द्रो वृद्धश्रवा-स्स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि-स्स्वस्ति नो बृहस्पतिं-र्दधातु । आपाँन्तमन्यु-स्तृपलप्रभर्मा धुनि-श्शिमीवा-ञ्छरुमाग्ं ऋजीषी । सोमो विश्वाँन्यतसावनानि नार्वागिन्द्रं प्रतिमानानिदेभुः ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ता-द्विसीमत-स्सुरुचो वेन आवः । सबुध्नियां उपमा अस्य विष्ठा-स्सतश्च योनि-मसतश्च विवः । स्योना पृथिवि भवा नृक्षरा निवेशनी । यच्छा नश्शर्म सप्रथाँः । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीँम् । ईश्वरीग्ं सर्व-भूतानां तामिहोपह्वये श्रियम् । श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु । विष्णु-मुखा वै देवाश्छन्दोभिरिमाल्लोका-ननपजय्य-मभ्यजयन् । महाग्ं इन्द्रो वज्रबाहुष्षोडशी शर्म यच्छतु ॥

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योँऽस्मान्द्वेष्टि । सोमानग्ं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजम् । शरीरं यज्ञशमलं कुसीदं तस्मिन्थ्सीदतु योँऽस्मान्द्वेष्टि । चरणं पवित्रं वितंतं पुराणं येन पूत स्तरति दुष्कृतानि । तेन पवित्रेण

शुद्धेनं पूता अतिं पाप्मान-मरातिं तरेम । सजोषा इन्द्र सगंणो मरुद्भिस्सोमं पिब वृत्रहञ्छूर विद्वान् । जहि शत्रूगं्ं रप मृधो नुदस्वाथाभंयं कृणुहि विश्वतोंनः । सुमित्रान आप ओषंधय-स्सन्तु दुर्मित्रास्तस्मैं भूयासु-र्योंस्मान् द्वेष्टि यं चं वयं द्विष्मः । आपोहिष्ठा मंयोभुवस्तानं ऊर्जे दंधातन ॥

महेरणांय चक्षंसे । योवं-श्शिवतंमो रस-स्तस्यं भाजयते हनंः । उशती-रिंव मातरंः । तस्मा अरंगमामवो यस्यक्षयांय जिन्वंथ । आपों जनयंथा च नः ॥

अघमर्षणसूक्तम्

हिरंण्यशृङ्गं वरुंणं प्रपंद्ये तीर्थं मे देहि याचितः । यन्मयां भुक्त-मसाधूंनां पापेभ्यंश्च प्रतिग्रंहः । यन्मे मनंसा वाचा कर्मणा वा दुंष्कृतं कृतम् । तन्न इन्द्रो वरुंणो बृहस्पतिं-स्सविता चं पुनन्तु पुनंः पुनः । नमोऽग्नयेंऽप्सुमते नम इन्द्रांय नमो वरुंणाय नमो वारुण्यैं नमोऽद्भ्यः ॥

यदपां क्रूरं यदंमेध्यं यदंशान्तं तदपंगच्छतात् । अत्याशना-दंतीपाना-द्यच्च उग्रात् प्रंतिग्रहांत् । तन्नो वरुंणो राजा पाणिनाँह्यवमर्शतु । सोंऽहमंपापो विरजो निर्मुक्तो मुंक्तकिल्बिषः । नाकंस्य पृष्ठ-मारुंह्य गच्छेद्ब्रह्मसलोकताम् । यश्चाप्सु वरुंणस्स पुनात्वंघमर्षणः । इमं मे गङ्गे यमुने सरस्वति शुतुंद्रि-स्तोमगं्ं

सचता परुष्णिया । असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया । ऋतं च सत्यं चाभीद्धा-त्तपसोऽध्यजायत । ततो रात्रिरजायत ततः-स्समुद्रो अर्णवः ॥

समुद्रादर्णवा दधि संवथ्सरो अजायत । अहोरात्राणि विदध-द्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्व-मकल्पयत् । दिवं च पृथिवीं चान्तरिक्ष-मथो सुवः । यत्पृथिव्याग्ं रजस्स्व-मान्तरिक्षे विरोदसी । इमाग् स्तदापो वरुणः पुनात्वघमर्षणः । पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः । एष भूतस्य मध्ये भुवनस्य गोप्ता । एष पुण्यकृतां लोकानेष मृत्योर् हिरण्मयम् । द्यावापृथिव्योर्हिरण्मयग्ं सग्ग् श्रितग्ं सुवः ॥

सन-स्सुव-स्सग्ंशिशाधि । आर्द्रं ज्वलति ज्योतिर-हमस्मि । ज्योतिर्ज्वलति ब्रह्माह-मस्मि । योऽह-मस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माह-मस्मि । अहमेवाहं मां जुहोमि स्वाहा । अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः । वरुणो ऽपामघमर्षण-स्तस्मात् पापात्प्रमुच्यते । रजोभूमिं-स्त्वमागं् रोदयस्व प्रवदन्ति धीराः । आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा । वृषा पवित्रे अधिसानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः ॥

दुर्गासूक्तम् [2]

जातवेदसे सुनवाम सोमं मरातीयतो निदहाति वेदः । स नः पर्षदतिं दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः । तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीग्ं शरणमहं प्रपद्ये सुतरसि तरसे नमः । अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्ति-भिरतिं दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः । विश्वानि नो दुर्गहा जातवेद-स्सिन्धुं न नावा दुरिताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् । पृतनाजितग्ं सहमानमुग्रमग्निग्ं हुवेम पर माथ्सधस्थात् । स नः पर्षदतिं दुर्गाणि विश्वा क्षामद्देवो अतिं दुरिताऽत्यग्निः । प्रत्नोषिं कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व । गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम । नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

[ॐ कात्यायनायं विद्महे कन्यकुमारिं धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥]

व्याहृति-होममन्त्राः [3-5]

भू-रन्नं-मग्नयें पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय

स्वाहा॒ सुव॒रन्न॑-मादि॒त्याय॑ दि॒वे स्वाहा॒ भू-र्भुव॒स्सुव॒-रन्नं॑ च॒न्द्रम॑से दि॒ग्भ्य-स्स्वाहा॒ नमो॑ दे॒वेभ्य॑-स्स्व॒धा पि॒तृभ्यो॒ भू-र्भुव॒स्सुव॒-रन्न॒मोम् ॥

भू-र॒ग्नये॑ पृथि॒व्यै स्वाहा॒ भुवो॑ वा॒यवे॒ऽन्तरि॑क्षाय॒ स्वाहा॒ सुव॑रादि॒त्याय॑ दि॒वे स्वाहा॒ भू-र्भुव॒स्सुव॑-श्च॒न्द्रम॑से दि॒ग्भ्य-स्स्वाहा॒ नमो॑ दे॒वेभ्य॑-स्स्व॒धा पि॒तृभ्यो॒ भू-र्भुव॒स्सुव॒-रग्न॒ ओम् ॥

भू-र॒ग्नये॑ च पृथि॒व्यै च॑ मह॒ते च॒ स्वाहा॒ भुवो॑ वा॒यवे॑ चा॒न्तरि॑क्षाय च मह॒ते च॒ स्वाहा॒ सुव॑रादि॒त्याय॑ च दि॒वे च॑ मह॒ते च॒ स्वाहा॒ भू-र्भुव॒स्सुव॑-श्च॒न्द्रम॑से च॒ नक्ष॑त्रेभ्यश्च दि॒ग्भ्यश्च॑ मह॒ते च॒ स्वाहा॒ नमो॑ दे॒वेभ्य॑-स्स्व॒धा पि॒तृभ्यो॒ भू-र्भुव॒स्सुव॒-र्मह॒रोम् ॥

ज्ञानप्राप्त्यर्था-होममन्त्राः [6-7]

पाहि नो अग्न एन॑से स्वा॒हा । पाहि नो विश्ववेद॑से स्वा॒हा । यज्ञं॑ पाहि विभाव॑सो स्वा॒हा । सर्वं॑ पाहि शतक्रतो स्वा॒हा ॥

पा॒हि नो॑ अग्न॒ एक॑या । पा॒ह्युत द्वि॒तीय॑या । पा॒ह्यू॒र्जं तृ॒तीय॑या । पा॒हि गी॒र्भिश्च॑ त॒सृभि॑-र्वसो स्वाहा॑ ॥

वेदाविस्मरणाय जपमन्त्राः [8-9]

यश्छन्द॑सा-मृष॒भो वि॒श्वरू॑प-श्छ॒न्दो॑भ्य-श्छ॒न्दाग्॑-स्यावि॒वेश॑ । सचाग्॑ शिक्यः पुरो वाचो॑पनि॒ष-दिन्द्रो॑ ज्ये॒ष्ठ इ॑न्द्रि॒याय॒ ऋषि॑भ्यो॒ नमो॑ दे॒वेभ्य॑-स्स्व॒धा पि॒तृभ्यो॒ भू-र्भुव॒स्सुव॒-श्छन्द॒ ओम् ॥

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयो-श्श्रुतं मा च्यौढ्वं ममामुष्य ओम् ॥

तपः प्रशंसा [10]

ऋतं तप-स्सत्यं तप-श्श्रुतं तप-श्शान्तं तपो दम-स्तप-श्शम-स्तपो दानं तपो यज्ञं तपो भू-र्भुव-स्सुव-र्ब्रह्मैतदुपास्यैतत्तपः ॥

विहिताचरणप्रशंसा निषिद्धाचरणनिन्दा च [11]

यथा वृक्षस्य संपुष्पितस्य दूरा-द्गन्धो वात्येवं पुण्यस्य कर्मणो दूरा-द्गन्धो वाति यथाऽसिधारां कर्तेऽवहिता-मवक्रामे यद्युवे युवे हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येव-ममृता-दात्मानं जुगुप्सेत् ॥

दहरविद्या [12]

अणो-रणीयान्महतो महीया-नात्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्। सप्त प्राणाः प्रभवन्ति तस्मा-थ्सप्तार्चिषस्समिध-स्सप्त जिह्वाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया-न्निहिता-स्सप्त सप्त। अतस्समुद्रा गिरयश्च सर्वेऽस्माथ्स्यन्दन्ते सिन्धव-स्सर्वरूपाः। अतश्च विश्वा ओषधयो रसाश्च येनैष भूत-स्तिष्ठत्यन्तरात्मा। ब्रह्मा देवानां पदवीः कवीना-मृषि-र्विप्राणां महिषो मृगाणाम्। श्येनो गृद्धाणाग् स्वधिति-र्वनानागं सोमः पवित्रमत्येति रेभन्।

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीग्ं सरूपाम्। अजो ह्येकों जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥

हग्ंस-श्शुचिष-द्वसु-रन्तरिक्षस-द्धोता वेदिषदतिथिर्दुरोणसत्। नृष-द्वरस-दृतस-द्व्योमस-दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। घृतं मिमिक्षिरे घृतमस्य योनिं-र्घृते श्रितो घृत-मुवस्य धामं। अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्। समुद्रा-दूर्मिर्मधुमाग्ं उदार-दुपाग्ंशुना समममृतत्व-मानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानां-ममृतस्य-नाभिः। वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामा नमोभिः। उपं ब्रह्मा शृणवच्छस्यमानं चतुश्शृङ्गोऽवमीद्गौर एतत्। चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याग्ं आविवेश॥

त्रिधा हितं पणिभिं-र्गुह्यमानं गविं देवासों घृतमन्वविन्दन्। इन्द्र एकग्ं सूर्य एकं जजान वेना-देकग्ग्ं स्वधया निष्टतक्षुः। यो देवानाँ प्रथमं पुरस्ताद्विश्वाधियों रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानग्ं सनों देव-श्शुभया स्मृत्या संयुनक्तु। यस्मात्परं नापरमस्ति किंचि-द्यस्मान्नाणींयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठ-त्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानशुः। परेण

नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति। वेदान्तविज्ञान-सुनिश्चितार्था-स्संन्यास योगाद्यतयश्शुद्धसत्त्वाः। ते ब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे। दहं विपापं परमेऽश्मभूतं यत्पुण्डरीकं पुरमध्यसग्स्थम्। तत्रापि दहं गगनं विशोक-स्तस्मिन् यदन्तस्त-दुपासितव्यम्। यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृति-लीनस्य यः परस्स महेश्वरः॥

नारायणसूक्तम् [13]

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्। विश्वं नारायणं देवमक्षरं परमं पदम्। विश्वतः परमान्नित्यं विश्वं नारायणग्ं हरिम्। विश्वमेवेदं पुरुष-स्तद्विश्व-मुपजीवति। पतिं विश्वस्यात्मेश्वरग्ं शाश्वतग्ं शिव-मच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। नारायण परो ज्योतिरात्मा नारायणः परः। नारायण परं ब्रह्म तत्त्वं नारायणः परः। नारायणपरो ध्याता ध्यानं नारायणः परः। यच्च किञ्चिज्जगथ्सर्वं दृश्यते श्रूयतेऽपि वा॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण-स्स्थितः। अनन्तमव्ययं कविग्ं समुद्रेऽन्तं विश्वशम्भुवम्। पद्मकोश-प्रतीकाशग्ं हृदयं चाप्यधोमुखम्। अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति। ज्वालमालाकुलं भाती विश्वस्यायतनं महत्। सन्ततग्ं शिलाभिस्तु

लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्थ्सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्नि-र्विश्वार्चि-र्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः । तिर्यगूर्ध्व-मधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वं देहमापादतलमस्तकः । तस्य मध्ये वह्निशिखा अणीयोऽर्ध्वा व्यवस्थितः । नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः-शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिव-स्स हरि-स्सेन्द्र-स्सोऽक्षरः परम-स्स्वराट् ॥

आदित्यमण्डले परब्रह्मोपासनम् [14]

आदित्यो वा एष एतन्मण्डलं तपति तत्रता ऋचस्तद्रूचा मण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुष-स्तानि यजूꣳषि स यजुषा मण्डलꣳ स यजुषां लोक-स्सैषा त्रय्येवं विद्वा तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ॥

आदित्यपुरुषस्य सर्वात्मकत्वप्रदर्शनम् [15]

आदित्यो वै तेज ओजो बलं यश-श्चक्षु-श्श्रोत्रमात्मा मनो मन्यु-र्मनुर्मृत्यु-स्सत्यो मित्रो वायु राकाशः प्राणो लोकपालः कः किं कं तथ्सत्यमन्न-ममृतो जीवो विश्वः कतम-स्स्वयम्भु ब्रह्मैत-

दमृंत एष पुरुष एष भूतान-मधिंपति-ब्रह्मंण-स्सायुंज्यगं् सलोकतां-माप्नोत्येतासांमेव देवतांनागं् सायुंज्यगं् सार्ष्टितागं् समानलोकतां-माप्नोति य एवं वेदे"-त्युपनिषत् ॥

शिवोपासन-मन्त्राः [16]

निधंनपतये नमः । निधंनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः । भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः । परमाय नमः । परमलिङ्गाय नमः । एतथ्सोमस्यं सूर्यस्य सर्व-लिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम् ॥

पश्चिमवक्त्र-प्रतिपादकमन्त्रः [17]

सद्योजातं प्रंपद्यामि सद्योजाताय वै नमो नमंः । भवे भंवे नातिंभवे भवस्व माम् । भवोद्भंवाय नमंः ॥

उत्तरवक्त्र-प्रतिपादकमन्त्रः [18]

वामदेवाय नमों ज्येष्ठाय नमं-श्श्रेष्ठाय नमों रुद्राय नमः कालांय नमः कलंविकरणाय नमो बलंविकरणाय नमो बलांय नमो बलंप्रमथनाय नम-स्सर्व-भूतदमनाय नमों मनोन्मंनाय नमंः ॥

दक्षिणवक्त्र-प्रतिपादकमन्त्रः [19]

अघोरे॑भ्योऽथ घोरे॑भ्यो घोरघोरतरेभ्यः। सर्वे॑भ्य-स्सर्वशर्वे॑भ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

प्राग्वक्त्र-प्रतिपादकमन्त्रः [20]

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥

ऊर्ध्ववक्त्र-प्रतिपादकमन्त्रः [21]

ईशान-स्सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्माऽधिपति-र्ब्रह्मणोऽधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

नमस्कारार्थ-मन्त्राः [22-25]

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये ऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्र-स्सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वो चेम शन्तमग्ं हृदे। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

अग्निहोत्रहवण्याः उपयुक्तस्य वृक्षविशेषस्याभिधानम् [26-27]

यस्य वै कङ्कत्यग्निहोत्रहवंणी भवति प्रत्येवा-स्याहुंतय-स्तिष्ठन्त्यथो प्रतिंष्ठित्यै ॥ कृणुष्व पाज इति पञ्चं ॥

भूदेवताकमन्त्रः [28]

अदिंति-र्द्यौवा गंन्धर्वा मंनुष्याँः पितरोऽसुंरा-स्तेषाग्ं सर्वभूतानाँ माता मेदिनीं महता मही सांवित्री गांयत्री जगंत्युर्वी पृथ्वी बंहुला विश्वां भूता कंतमा काया सा सत्येत्यमृतेतिं वसिष्ठः ॥

सर्वा देवता आपः [29]

आपो वा इदग्ं सर्वं विश्वां भूतान्यापंः प्राणा वा आपंः पशव आपोऽन्न-मापोऽमृंत-मापं-स्सम्राडापों विराडापं-स्स्वराडाप-श्छन्दाग्स्यापो ज्योतीग्-ष्यापो यजूग्-ष्यापं-स्सत्यमाप-स्सर्वा देवता आपो भूर्भुव-स्सुव-राप ओम् ॥

सन्ध्यावन्दनमन्त्राः [30-32]

आपंः पुनन्तु पृथिवीं पृंथिवी पूता पुंनातु माम् । पुनन्तु ब्रह्मंणस्पति-र्ब्रह्मंपूता पुंनातु माम् । यदुच्छिंष्ट-मभोंज्यं यद्वा दुश्चरिंतं मम । सर्वं पुनन्तु मामापोंऽसतां चं प्रतिग्रहग्ग् स्वाहाँ ॥

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युंकृतेभ्यः । पापेभ्यों रक्षन्ताम् । यदह्ना पापंमकार्षम् । मनसा वाचां हस्ताभ्याम् ।

पद्भ्यामुदरेंण शिश्ना । अहस्त-दंवलुम्पतु । यत्किञ्च दुरितं मयिं । इदमहं माममृंतयोनौ । सत्ये ज्योतिषि जुहोंमि स्वाहा ॥

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युंकृतेभ्यः । पापेभ्यों रक्षन्ताम् । यद्रात्रिया पापंमकार्षम् । मनसा वाचां हस्ताभ्याम् । पद्भ्यामुदरेंण शिश्ना । रात्रि-स्तदंवलुम्पतु । यत्किञ्च दुरितं मयिं । इदमहं माममृंतयोनौ । सूर्ये ज्योतिषि जुहोंमि स्वाहा ॥

प्रणवस्य ऋष्यादिविवरणम् [33]

ओमित्येकाक्षंरं ब्रह्म । अग्निर्देवता ब्रह्मं इत्यार्षम् । गायत्रं छन्दं परमात्मं सरूपम् । सायुज्यं विंनियोगम् ॥

गायत्र्यावाहनमन्त्राः [34-35]

आयांतु वरंदा देवी अक्षरं ब्रह्मसंमितम् । गायत्रीं छन्दंसां मातेदं ब्रह्म जुषस्वं मे । यदह्नात्कुरुंते पापं तदह्नात्प्रतिमुच्यंते । यद्रात्रियात्कुरुंते पापं तद्रात्रियात्प्रतिमुच्यंते । सर्व वर्णे महादेवि सन्ध्याविंद्ये सरस्वंति ॥

ओजोंऽसि सहोंऽसि बलंमसि भ्राजोंऽसि देवानां धामनामांसि विश्वंमसि विश्वायु-स्सर्वंमसि सर्वायु-रभिभूरों गायत्री-मावांहयामि सावित्री-मावांहयामि सरस्वती-मावांहयामि छन्दर्षी-नावांहयामि श्रिय-मावांहयामि गायत्रिया गायत्रीच्छन्दो विश्वामित्रऋषिस्सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्-हृदयगं् रुद्र-श्शिखा

पृथिवीयोनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा साङ्कृत्यायनसगोत्रा गायत्री चतुर्विंगृंशत्यक्षरा त्रिपदा षट्कुक्षिः पञ्च-शीर्षोपनयने विंनियोग ओं भूः। ओं भुवः। ओगृं सुवः। ओं महः। ओं जनः। ओं तपः। ओगृं सत्यम्। ओं तथ्सवितुर्वरेँण्यं भर्गो देवस्यं धीमहि। धियो यो नंः प्रचोदयाँत्। ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्-भुव-स्सुव-रोम्॥

गायत्री-उपस्थानमन्त्राः [36]

उत्तमें शिखंरे जाते भूम्यां पंर्वतमूर्धनि। ब्राह्मणेँभ्योऽभ्यनुज्ञाता गच्छदेंवि यथासुंखम्। स्तुतो मया वरदा वेंदमाता प्रचोदयन्ती पवनेँ द्विजाता। आयुः पृथिव्यां द्रविणं ब्रंह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रंह्मलोकम्॥

आदित्यदेवतामन्त्रः [37]

घृणि-स्सूर्य आदित्यो न प्रभां वात्यक्षंरम्। मधुंक्षरन्ति तद्रंसम्। सत्यं वै तद्रस-मापो ज्योती रसोऽमृतं ब्रह्म भूर्-भुव-स्सुव-रोम्॥

त्रिसुपर्णमन्त्राः [38-40]

ब्रह्मं-मेतु माम्। मधुं-मेतु माम्। ब्रह्मं-मेव मधुं-मेतु माम्। यास्तें सोम प्रजावथ्सोऽभिसो अहम्। दुष्वंप्नहन् दुंरुष्वह। यास्तें सोम प्राणाग् स्ताञ्जुंहोमि। त्रिसुंपर्ण-मयांचितं ब्राह्मणायं दद्यात्। ब्रह्महत्यां वा एते घ्नंन्ति। ये ब्राँह्मणा-स्त्रिसुंपर्णं पठंन्ति। ते सोमं प्राप्नुंवन्ति। आसहस्रात् पङ्क्तिं पुनंन्ति। ओम्॥

ब्रह्म॑ मे॒धया॑। मधु॑ मे॒धया॑। ब्रह्म॑मे॒व मधु॑ मे॒धया॑। अ॒द्या नो॑ देव सवितः प्र॒जाव॑त्सावी॒-स्सौभ॑गम्। परा॑ दु॒ष्वप्न्ि॑यग्ं सुव। विश्वा॑नि देव सवित-र्दु॒रि॒ता॒नि॒ परा॑सुव। यद्भ॒द्रं तन्म॒ आसु॑व। मधु॒वाता॑ ऋताय॒ते मधु॑क्षरन्ति॒ सिन्ध॑वः। माध्वी॑र्न-स्स॒न्त्वोष॑धीः। मधु॒ नक्त॑मु॒तोष॑सि॒ मधु॑मत्पार्थि॑वग्ं॒ रजः॑। मधु॒द्यौर॑स्तु नः पि॒ता। मधु॑मान्नो॒ व॒न॒स्पति॒-र्मधु॑माग्ं अस्तु॒ सूर्यः॑। माध्वी॒र्गावो॑ भवन्तु नः॥ य इ॒मं त्रिसु॑पर्ण॒-मया॑चितं ब्राह्म॒णाय॑ दद्यात्। भ्रू॒ण॒ह॒त्यां वा ए॒ते घ्न॑न्ति। ये ब्रा॑ह्म॒णा-स्त्रिसु॑पर्ण॒ं पठ॑न्ति। ते सोम॑ं प्राप्नुवन्ति। आ॒स॒ह॒स्रात् प॒ङ्क्तिं पु॒न॑न्ति। ओम्॥

ब्रह्म॑ मे॒धवा॑। मधु॑ मे॒धवा॑। ब्रह्म॑-मे॒व मधु॑ मे॒धवा॑। ब्रह्मा॑ दे॒वाना॑ं पद॒वीः क॑वी॒ना-मृषि॒-र्विप्रा॑णां महि॒षो मृ॒गाणा॑म्। श्ये॒नो गृ॒द्धा॑णाग्ं स्वधि॑ति॒-र्वना॑नाग्ं सोम॑ः प॒वित्र॒मत्ये॑ति॒ रेभ॑न्। ह॒ग्ं॒स-श्शु॑चि॒ष-द्व॑सु॒-रन्तरि॑क्षस-द्धोता॑ वेदि॒ष-दति॑थि॒र्दु॒रो॒ण॒सत्। नृ॒ष-द्व॑र॒स-दृ॒त॒स-द्व्यो॑म॒स-द॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत्। ऋ॒चे त्वा॑ रु॒चे त्वा॒ समि॑-थ्स्रवन्ति स॒रितो॒ न धेना॑ः। अ॒न्तर्ह॒दा मन॑सा पू॒यमा॑नाः। घृ॒तस्य॒ धारा॑ अ॒भिचा॑कशीमि। हि॒र॒ण्ययो॑ वेत॒सो मध्य॑ आसाम्। तस्मि॑न्थ्सु॒प॒र्णो म॑धु॒कृत् कु॑ला॒यी भज॑-न्नास्ते मधु॒-दे॒व॒ता॑भ्यः। तस्या॑सते हर॑य-स्स॒प्ततीरे॑ स्व॒धां दुहा॑ना अ॒मृत॑स्य॒ धारा॑म्। य इ॒दं त्रिसु॑पर्ण॒-मया॑चितं ब्राह्म॒णाय॑ दद्यात्। वी॒र॒ह॒त्यां

वा एते घ्नन्ति । ये ब्राह्मणा-स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति । ओम् ॥

मेधासूक्तम् [41-44]

मेधादेवी जुषमाणा न आगाँ-द्विश्वाचीं भद्रा सुमनस्यमाना। त्वया जुष्टा नुदमाना दुरुक्ताँन् बृहद्वदेम विदथे सुवीराँः। त्वया जुष्टं ऋषि-र्भवति देवि त्वया ब्रह्माऽऽगतश्रीं-रुत त्वयाँ। त्वया जुष्ट-श्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभा-वाधत्तां पुष्करस्रजा। अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवीं मेधा सरस्वती सा माँ मेधा सुरभि-र्जुषताग् स्वाहाँ ॥

आमाँ मेधा सुरभि-र्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा माँ मेधा सुप्रतीका जुषन्ताम् ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

मृत्युनिवारणमन्त्राः [45-53]

अपैतु मृत्यु-रमृतं न आगन्वैवस्वतो नो अभयं कृणोतु। पर्ण वनस्पते-रिवाभिन-श्शीयताग् रयि-स्सचता-न्न-श्शचीपतिः ॥

परं॑ मृत्यो॒ अनु॒परे॑हि॒ पन्थां॑ यस्ते॒ स्व इत॑रो देव॒यान॑ात्।
चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि॒ मा नः॑ प्र॒जाग्ं रीं॑रिषो॒ मोत वी॒रान्॥

वातं॑ प्रा॒णं मन॑सा॒ऽन्वार॑भामहे प्र॒जाप॑तिं॒ यो भुव॑नस्य गो॒पाः।
स नो॑ मृ॒त्योस्त्रा॑यतां पात्वग्ं॒हसो॒ ज्योग्जी॒वा ज॒रा-म॑शीमहि॥

अमु॑त्र॒ भूया॒-दध॒ यद्य॒मस्य॒ बृह॑स्पते॒ अभि॑शस्ते॒रमु॑ञ्चः।
प्रत्यौ॑हताम॒श्विना॑ मृ॒त्यु-म॑स्मा-द्दे॒वाना॑-मग्ने भि॒षजा॒ शची॑भिः॥

हरि॑ग्ं॒ हर॑न्त॒-मनु॑यन्ति दे॒वा विश्व॑स्येशा॑नं वृष॒भं म॑ती॒नाम्।
ब्रह्म॒ सरू॑प॒-मनु॑मे॒द-माग॒-दय॑न॒ं मा विव॑धी॒-र्विक्र॑मस्व॥

शल्कै॑र॒ग्नि-मि॑न्धा॒न उ॒भौ लो॒कौ सं॑ने॒महम्। उ॒भयो॑र्लो॒कयो॒र्ऋध्वाऽति॑ मृ॒त्युं त॑राम्य॒हम्॥

मा छि॑दो मृत्यो॒ मा व॑धी॒र्मा मे॒ बल॑ं विवृ॑हो॒ मा प्रमो॑षीः। प्र॒जां मा मे॑ रीरिष॒ आयु॑-रुग्र नृ॒चक्ष॑सं त्वा ह॒विषा॑ विधेम॥

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम्। मा नो॑ वधीः पि॒तर॑ं॒ मोत मा॒तर॑ं॒ प्रिया मा न॑स्त॒नुवो॑ रुद्र रीरिषः॥

मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः। वी॒रान्मा नो॑ रुद्र भामि॒तो व॑धीर्-ह॒विष्म॑न्तो॒ नम॑सा विधेम ते॥

प्रजापतिप्रार्थनामन्त्रः [54]

प्रजांपते न त्वदेतान्यन्यो विश्वां जातानि परिता बंभूव । यत्कांमास्ते जुहुमस्तन्नों अस्तु वयग्ं स्यांम पतंयो रयीणाम् ॥

इन्द्रप्रार्थनामन्त्रः [55]

स्वस्तिदा विशस्पतिं-वृत्रहा विमृधों वशी । वृषेन्द्रंः पुर एंतु नस्स्वस्तिदा अंभयङ्करः ॥

मृत्युञ्जयमन्त्राः [56-58]

त्र्यंम्बकं यजामहे सुगन्धिं पुंष्टिवर्धनम् । उर्वारुकमिंव बन्धंनान्मृत्योर्मुक्षीय माऽमृतांत् ॥

ये तें सहस्रं-मयुतं पाशा मृत्यो मर्त्यांय हन्तंवे । तान् यज्ञस्यं मायया सर्वा-नवंयजामहे ॥ मृत्यवे स्वाहां मृत्यवे स्वाहाँ ॥

पापनिवारका मन्त्राः [59]

देवकृतस्यैनंसोऽवयजंन-मसि स्वाहाँ । मनुष्यं-कृतस्यैनंसो ऽवयजंन-मसि स्वाहाँ । पितृकृतस्यैनंसोऽवयजंन-मसि स्वाहाँ । आत्मकृतस्यैनंसोऽवयजंन-मसि स्वाहाँ । अन्यकृतस्यैनंसो ऽवयजंन-मसि स्वाहाँ । अस्मत्कृतस्यैनंसोऽवयजंन-मसि स्वाहाँ । यद्दिवा च नक्तं चैनंश्चकृम तस्यांवयजंन-मसि स्वाहाँ । यथ्स्वपन्तंश्च जाग्रंतश्चैनंश्चकृम तस्यांवयजंन-मसि स्वाहाँ ।

यथ्सुषुप्तंश्च जाग्रंतश्चैनंश्चकृम तस्यांवयजंन-मसि स्वाहाँ । यद्दिद्वाग्ंस-श्चाविंद्वाग्ंस-श्चैनंश्चकृम तस्यांवयजंन-मसि स्वाहाँ । एनस एनसोऽवयजन-मंसि स्वाहा ॥

वसुप्रार्थनामन्त्रः [60]

यद्वों देवाश्चकृम जिह्वयां गुरुमनंसो वा प्रयुंती देव हेडंनम् । अरांवा यो नों अभिदुंच्छुनायते तस्मिन्तदेनों वसवो निधेंतन स्वाहाँ ॥

कामोऽकार्षीत्-मन्युरकार्षीत् मन्त्रः [61-62]

कामोऽकार्षीन्नमो नमः । कामोऽकार्षीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामंः कारयिता नाहं कारयिता एष ते काम कामांय स्वाहा ॥

मन्यु-रकार्षीन्नमो नमः । मन्यु-रकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युंः कारयिता नाहं कारयिता एष ते मन्यो मन्यंवे स्वाहा ॥

विरजाहोममन्त्राः [63-66]

तिलाञ्जुहोमि सरसाग्ं सपिष्टान् गन्धार मम चित्ते रमंन्तु स्वाहा । गावो हिरण्यं धन-मन्नपानग्ं सर्वेषाग् श्रिंयै स्वाहा । श्रियं च लक्ष्मिं च पुष्टिं च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बंहुपुत्रताम् । श्रद्धामेधे प्रजा-स्सन्ददांतु स्वाहा ॥

तिलाः कृष्णा-स्तिंला-श्वेता-स्तिला-स्सौम्या वंशानुगाः ।

तिलाः पुनन्तु मे पापं यत्किञ्चिद्दुरितं मयि स्वाहा । चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः । गोस्तेयग्ं सुरापानं भ्रूणहत्या तिला शान्तिग्ं शमयन्तु स्वाहा । श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रज्ञातु जातवेद-स्सन्ददातु स्वाहा ॥

प्राणापान-व्यानोदान-समाना मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । वाङ्मन-श्चक्षुश्श्रोत्र-जिह्वाघ्राण-रेतो-बुद्ध्याकूति-स्संकल्पा मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । त्वक्चर्म-मागंस-रुधिर-मेदो-मज्जा-स्नायवो ऽस्थीनि मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । शिरःपाणि-पाद-पार्श्व-पृष्ठोरूदर-जङ्घ-शिश्नोपस्थ-पायवो मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । उत्तिष्ठ पुरुष हरितपिङ्गल लोहिताक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ ॥

पृथिव्याप-स्तेजो-वायु-राकाशा मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । शब्द-स्पर्श-रूप-रस-गन्धा मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । मनो-वाक्काय-कर्माणि मे शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । अव्यक्तभावै-रहंकारै-र्ज्योतिं-रहं विरजां

विपाप्मा भूयासग्ं स्वाहाँ । आत्मा में शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । अन्तरात्मा में शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । परमात्मा में शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ । क्षुधे स्वाहाँ । क्षुत्पिपासाय स्वाहाँ । विविट्ट्यै स्वाहाँ । ऋग्विधानाय स्वाहाँ । कषोँत्काय स्वाहाँ । क्षुत्पिपासामलं ज्येष्ठा-मलक्ष्मी-र्नाशयाम्यहम् । अभूति-मसमृद्धिं च सर्वा-न्निर्णुद मे पाप्मानग्ं स्वाहा । अन्नमय-प्राणमय-मनोमय-विज्ञानमय-मानन्दमय-मात्मा में शुध्यन्तां ज्योतिं-रहं विरजां विपाप्मा भूयासग्ं स्वाहाँ ॥

वैश्वदेवमन्त्राः [67-68]

अग्नये स्वाहाँ । विश्वेँभ्यो देवेभ्य-स्स्वाहाँ । ध्रुवायं भूमाय स्वाहाँ । ध्रुवक्षितंये स्वाहाँ । अच्युतक्षितंये स्वाहाँ । अग्नयेँ स्विष्टकृते स्वाहाँ । धर्माय स्वाहाँ । अधर्माय स्वाहाँ । अद्भ्य-स्स्वाहाँ । ओषधिवनस्पतिभ्य-स्स्वाहाँ ॥

रक्षोदेवजनेभ्य-स्स्वाहाँ । गृह्याँभ्य-स्स्वाहाँ । अवसानेँभ्य-स्स्वाहाँ । अवसानंपतिभ्य-स्स्वाहाँ । सर्व-भूतेभ्य-स्स्वाहाँ । कामाय स्वाहाँ । अन्तरिक्षाय स्वाहाँ । यदेजति जगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहाँ । पृथिव्यै स्वाहाँ । अन्तरिक्षाय

स्वाहा॑ ॥

दि॒वे स्वाहा॑ । सूर्या॑य॒ स्वाहा॑ । च॒न्द्रम॑से॒ स्वाहा॑ । नक्ष॑त्रेभ्य॒-स्स्वाहा॑ । इन्द्रा॑य॒ स्वाहा॑ । बृह॒स्पत॑ये॒ स्वाहा॑ । प्र॒जाप॑तये॒ स्वाहा॑ । ब्रह्म॑णे॒ स्वाहा॑ । स्व॒धा पि॒तृभ्य॒-स्स्वाहा॑ । नमो॑ रु॒द्राय॑ पशु॒पत॑ये॒ स्वाहा॑ ॥

दे॒वेभ्य॒-स्स्वाहा॑ । पि॒तृभ्य॑-स्स्व॒धाऽस्तु॑ । भू॒तेभ्यो॒ नम॑: । मनु॒ष्ये॑भ्यो॒ हन्ता॑ । प्र॒जाप॑तये॒ स्वाहा॑ । प॒र॒मेष्ठि॑ने॒ स्वाहा॑ । यथा॑ कू॒प-श्श॒तधा॑र-स्स॒हस्र॑धारो॒ अक्षि॑तः । ए॒वा मे॑ अस्तु धा॒न्यग्ं॑ स॒हस्र॑धार॒मक्षि॑तम् । धन॑धान्यै॒ स्वाहा॑ । ये भू॒ताः प्र॒चर॑न्ति॒ दिवा॒नक्तं॑ बलि॑-मि॒च्छन्तो॑ वि॒तुद॑स्य॒ प्रेष्या॑: । तेभ्यो॑ ब॒लिं पु॑ष्टि॒कामो॑ हरामि॒ मयि॒ पुष्टिं॑ पुष्टि॑पति-र्दधातु॒ स्वाहा॑ ॥

ओ॑ तद्ब्रह्म । ओ॑ तद्वा॒युः । ओ॑ तदा॒त्मा । ओ॑ तथ्स॒त्यम् । ओ॑ तथ्सर्वम्॑ । ओ॑ तत्पुरो॒-र्नमः । अन्तश्च॑रति॑ भू॒तेषु॒ गुहा॑यां वि॑श्व मू॒र्तिषु॑ । त्वं यज्ञस्त्वं वषट्कार-स्त्वमिन्द्र-स्त्वग्ं रुद्र-स्त्वं विष्णु-स्त्वं ब्रह्म त्वं॑ प्रजा॒पतिः । त्वं त॑दाप॒ आपो॒ ज्योती॒ रसो॒ऽमृत॑ं ब्रह्म॒ भू-र्भुव॒-स्सुव॒-रोम् ॥

प्राणाहुतिमन्त्राः [69]

श्र॒द्धाया॑ प्रा॒णे नि॒वि॑ष्टो॒ऽमृत॑ं जुहोमि । श्र॒द्धाया॑मपा॒ने नि॒वि॑ष्टो॒ऽमृत॑ं जुहोमि । श्रद्धाया॑ व्या॒ने नि॒वि॑ष्टो॒ऽमृत॑ं जुहोमि । श्र॒द्धाया॑मुदा॒ने

निविंष्टोऽमृतं जुहोमि । श्रद्धायाग्ं समाने निविंष्टोऽमृतं जुहोमि। ब्रह्मणि म आत्माऽमृतत्वायं । अमृतोपस्तरंणमसि । श्रद्धायाँ प्राणे निविंष्टोऽमृतं जुहोमि। शिवो मां विशाप्रंदाहाय। प्राणाय स्वाहाँ ॥

श्रद्धायांमपाने निविंष्टोऽमृतं जुहोमि। शिवो मां विशाप्रंदाहाय। अपानाय स्वाहाँ। श्रद्धायाँ व्याने निविंष्टोऽमृतं जुहोमि। शिवो मां विशाप्रंदाहाय । व्यानाय स्वाहाँ । श्रद्धायां-मुदाने निविंष्टोऽमृतं जुहोमि । शिवो मां विशाप्रंदाहाय । उदानाय स्वाहाँ । श्रद्धायाग्ं समाने निविंष्टोऽमृतं जुहोमि । शिवो मां विशाप्रंदाहाय । समानाय स्वाहाँ । ब्रह्मणि म आत्माऽमृतत्वायं । अमृतापिधानमंसि ॥

भुक्तान्नाभिमन्त्रणमन्त्राः [70]

श्रद्धायाँ प्राणे निविंश्यामृतग्ं हुतम् । प्राणमन्नेंनाप्यायस्व । श्रद्धायांमपाने निविंश्यामृतग्ं हुतम् । अपान-मन्नेंनाप्यायस्व । श्रद्धायाँ व्याने निविंश्यामृतग्ं हुतम् । व्यान-मन्नेंनाप्यायस्व । श्रद्धायां-मुदाने निविंश्यामृतग्ं हुतम् । उदान-मन्नेंनाप्यायस्व । श्रद्धायाग्ं समाने निविंश्यामृतग्ं हुतम्। समान-मन्नेंनाप्यायस्व ॥

भोजनान्ते आत्मानुसन्धानमन्त्राः [71]

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं चं समाश्रितः । ईशस्सर्वस्य जगतः प्रभुः प्रीणातिं विश्वभुक् ॥

अवयवस्वस्थता-प्रार्थनामन्त्रः [72]

वाङ्म॑ आसन्। न॒सोः प्रा॒णः। अ॒क्ष्यो-श्चक्षुः॑। कर्ण॑यो॒श्श्रोत्र॑म्। बा॒हु॒वो-र्बल॑म्। ऊ॒रु॒वो-रोज॑ः। अरि॑ष्टा॒ विश्वा॒न्यङ्गा॑नि त॒नूः। त॒नुवा॑ मे स॒ह नम॑स्ते अस्तु मा मा॑ हिꣳसीः॥

इन्द्रसप्तर्षि-संवादमन्त्रः [73]

वय॑-स्सुप॒र्णा उप॑सेदु-रिन्द्रं॑ प्रि॒यमे॑धा॒ ऋष॑यो॒ नाध॑माना॒ः। अप॑ध्वा॒न्तमू॒र्णु॒हि पू॒र्धि चक्षु॑-र्मुमु॒ग्ध्य॑स्मान्नि॒धये॑ऽव ब॒द्धान्॥

हृदयालंभनमन्त्रः [74]

प्राणानां ग्रन्थिरसि रुद्रो मा॑ विशा॒न्तक॒ः। तेनान्ने॑नाऽप्याय॒स्व॥

देवताप्राणनिरूपणमन्त्रः [75]

नमो रुद्राय विष्णवे मृत्यु॑र्मे पा॒हि॥

अग्निस्तुतिमन्त्रः [76]

त्वम॑ग्ने द्यु॒भि-स्त्व-मा॑शुशु॒क्षणि॒-स्त्व-म॒द्भ्य-स्त्व-मश्म॑न॒स्परि॑। त्वं व॒ने॒भ्य॒-स्त्वमोष॑धीभ्य॒-स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः॥

अभीष्टयाचनामन्त्रः [77]

शि॒वेन॑ मे॒ सं॑ति॑ष्ठस्व स्यो॒नेन॑ मे॒ सं॑ति॑ष्ठस्व सुभू॒तेन॑ मे॒ सं॑ति॑ष्ठस्व ब्रह्मवर्च॒सेन॑ मे॒ सं॑ति॑ष्ठस्व य॒ज्ञस्यर्धि॒-मनु॒ सं॑ति॑ष्ठ॒स्वोप॑ ते यज्ञ॒ नम॒ उप॑ ते॒ नम॒ उप॑ ते॒ नम॑ः॥

परतत्त्व-निरूपणम् [78]

सत्यं परं परगं् सत्यग् सत्येन न सुवर्गा-ल्लोकाच्च्यवन्ते कदाचन सताग् हि सत्यं तस्माँत् सत्ये रमन्ते तप इति तपो नानशानात्परं यद्धि परं तप-स्तद्दुर्धर्षं तद्दुराधर्षं तस्मा-त्तपसि रमन्ते दम इति नियतं ब्रह्मचारिण-स्तस्मा-द्दमे रमन्ते शम इत्यरण्ये मुनय-स्तस्माच्छमे रमन्ते

दान-मिति सर्वाणि भूतानि प्रशग्ंसन्ति दाना-न्नाति दुश्चरं तस्माँ-द्दाने रमन्ते धर्म इति धर्मेण सर्व-मिदं परिगृहीतं धर्मान्नातिदुष्करं तस्माँ-द्धर्मे रमन्ते

प्रजन इति भूयाग्ंस-स्तस्माद्भूयिंष्ठाः प्रजायन्ते तस्माद्भूयिंष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मा-दग्नय आधातव्या

अग्निहोत्र-मित्याह तस्मा-दग्निहोत्रे रमन्ते यज्ञ इति यज्ञो हि देवा-स्तस्माँद्यज्ञे रमन्ते मानस-मिति विद्वाग्ंस-स्तस्माँ-द्विद्वाग्ंस एव मानसे रमन्ते

न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि परागं्सि न्यास एवात्यरेचयद्य एवं वेदँ-त्युपनिषत् ॥

ज्ञानसाधन-निरूपणम् [79]

प्राजापत्यो हारुणि-स्सुपर्णेयः प्रजापतिं पितर-मुपससार किं

भगंवन्तः पंरमं वंदन्तीति तस्मै प्रोंवाच

सत्येनं वायु-रावांति सत्येनांदित्यो रोंचते दिवि सत्यं वाचः प्रंतिष्ठा सत्ये सर्वं प्रतिंष्ठितं तस्मांत् सत्यं पंरमं वदंन्ति तपंसा

देवा देवता-मग्रं आयन् तपसर्षयस्सुवरन्वंविन्दन् तपंसा सपत्नान् प्रणुंदामारांती-स्तपंसि सर्वं प्रतिंष्ठितं तस्मात्तपः परमं वदंन्ति दमेंन दान्ताः किल्बिषं-मवधून्वन्ति दमेंन ब्रह्मचारिण-स्सुवंरगच्छन् दमों भूतानींं दुराधर्षं दमें सर्वं प्रतिंष्ठितं तस्माद्दमः परमं वदंन्ति शमेंन शान्ता-श्शिव-माचरंन्ति शमेंन नाकं मुनयोऽन्वविंन्दञ्छमों भूतानींं दुराधर्षञ्छमें सर्वं प्रतिंष्ठितं तस्माच्छमंः परमं वदंन्ति

दानं यज्ञानां वरूथं दक्षिणा लोके दातारगं् सर्वभूतान्युंपजीवन्तिं दानेनारांती-रपांनुदन्त दानेनं द्विषन्तो मित्रा भंवन्ति दाने सर्वं प्रतिंष्ठितं तस्मांं-द्दानं पंरमं वदंन्ति

धर्मो विश्वंस्य जगंतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उंपसर्पन्तिं धर्मेणं पाप-मंपनुदंति धर्मे सर्वं प्रतिंष्ठितं तस्मांं-द्धर्मं पंरमं वदंन्ति

प्रजनंनं वै प्रंतिष्ठा लोके साधुप्रजायांं-स्तन्तुं तंन्वानः पिंतृणा-मंनृणो भवंति तदेंव तस्या अनृंणं तस्मांत् प्रजनंनं परमं वदंन्त्यग्नयो वै त्रयीं विद्या

देंवयानः पन्थां गार्हपत्य ऋक्पृंथिवी रंथन्तर-मंन्वाहार्यपचंनं

यजुं-रन्तरिक्षं वामदेव्य-मांहवनीयस्सामं सुवर्गो लोको बृहत्तस्मां-दग्नीन् पंरमं वदंन्त्यग्निहोत्रग्ं सांयं प्रातर्गृहाणां निष्कृंति-स्त्विंष्टग्ं सुहुतं यंज्ञक्रतूनां प्रायंणग्ं सुवर्गस्यं लोकस्य ज्योति-स्तस्मां-दग्निहोत्रं पंरमं वदंन्ति

यज्ञ इतिं यज्ञेन हि देवा दिवं गता यज्ञेनासुंरा-नपांनुदन्त यज्ञेनं द्विषन्तो मित्रा भंवन्ति यज्ञे सर्वं प्रतिंष्ठितं तस्माँद्यज्ञं पंरमं वदंन्ति मानसं वै प्रांजापत्यं पवित्रं मानसेन मनंसा साधु पंश्यति मानसा ऋषंयः प्रजा अंसृजन्त मानसे सर्वं प्रतिंष्ठितं तस्मांन्मानसं पंरमं वदंन्ति

न्यास इत्याहुंर्मनीषिणोंँ ब्रह्माणं ब्रह्मा विश्वंः कतम-स्स्वंयम्भु प्रजापंति-स्संवथ्सर इतिं संवथ्सरोंऽसावांदित्यो य एष आंदित्ये पुरुंष-स्स पंरमेष्ठी ब्रह्मात्मा

याभिंरादित्य-स्तपंति रश्मिभिस्ताभिंः पर्जन्यों वर्षति पर्जन्येंनौषधि-वनस्पतयः प्रजांयन्त ओषधिवनस्पतिभि-रन्नं भवत्यन्नेंन प्राणाः प्राणैं-बलं बलेंन तप-स्तपंसा श्रद्धा श्रद्धया मेधा मेधयां मनीषा मंनीषया मनो मनंसा शान्ति-श्शान्त्यां चित्तं चित्तेन स्मृतिग्ं स्मृत्या स्मारग्ं स्मारेंण विज्ञानं विज्ञानेंनात्मानं वेदयति तस्मां-दन्नं ददन्त्सर्वांण्येतानिं ददात्यन्नांत् प्राणा भंवन्ति

भूतानांँ प्राणैं-र्मनो मनंसश्च विज्ञानं विज्ञानां-दानन्दो

ब्रह्मयोनि-स्स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्व-मिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्व-मिदं जगथ्स सभूतगं् स भव्यं जिज्ञासक्लृप्त ऋतजा-रयिष्ठा

श्रद्धा सत्यो महस्वान् तपसो परिष्टाद् ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्यु-मुपयाहि विद्वान् तस्माँन्न्यास-मेषां तपसा-मतिरिक्तमाहु-र्वसुरण्वो विभूरसि प्राणे त्वमसि सन्धाता

ब्रह्मन् त्वमसि विश्वधृत्तेजोदा-स्त्वमस्यग्नि-रसि वर्चोदा-स्त्वमसि सूर्यस्य द्युम्नोदा-स्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा

महस ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेदं ब्रह्मणो महिमानं-माप्नोति तस्माद्ब्रह्मणो महिमानं-मित्युपनिषत् ॥

ज्ञानयज्ञः [80]

तस्यैवं विदुषो यज्ञस्यात्मा यजमान-श्श्रद्धापत्नी शरीर-मिध्ममुरो वेदि-र्लोमानि बर्हि-र्वेद-श्शिखा हृदयं यूपः काम आज्यं मन्युः पशु-स्तपोऽग्नि-र्दम-श्शमयिता दक्षिणा-वाग्घोता प्राण उद्गाता

चक्षुरध्वर्यु-र्मनो ब्रह्मा श्रोत्रमग्नी-द्यावद्भ्रियते सा दीक्षा यदश्नाति तद्ध-र्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो

यथ्सं॑च-र॑त्युप॒विश॑त्युत्ति॒ष्ठ॑ते च॒ सप्र॑व॒र्ग्यो॑ यन्मुख॑ं तदा॑हव॒नीयो॒ या व्याह्रा॑ति-राहु॒ति-र्यदे॑स्य

वि॒ज्ञान॑ं तज्जु॒होति॒ यथ्सा॒यं प्रा॒तर॑त्ति॒ तथ्स॒मिध॑ं यत्प्रा॒तर्म॒ध्यन्दि॑नग्ं सा॒यं च॒ तानि॒ सव॑नानि॒ ये अ॑होरा॒त्रे ते द॑र्॒शपूर्णमा॒सौ ये॑ऽर्धमा॒सा॒श्च॒ मासा॑श्च॒ ते चा॑तुर्मा॒स्यानि॒ य ऋ॒तव॒स्ते प॑शुब॒न्धा ये सं॑वथ्स॒राश्च॑ परिवथ्स॒राश्च॒ तेऽह॑र्गणास्स॒र्ववे॑दसं वा

ए॒तथ्स॒त्रं यन्मर॑ण॒ं तद॑व॒भृथ॑ं ए॒तद्वै ज॑रामर्यमग्निहो॒त्रग्ं स॒त्रं य एवं वि॒द्वा-नु॑द॒गय॑ने प्र॒मीय॑ते दे॒वानां॒मेव म॑हि॒मान॑ं ग॒त्वाऽऽदि॒त्यस्य॒ सायु॑ज्यं

गच्छ॒त्यथ॒ यो द॑क्षि॒णे प्र॒मीय॑ते पितृ॒णा-मे॒व म॑हि॒मान॑ं ग॒त्वा च॒न्द्रम॑स॒स्सायु॑ज्यग्ं सलो॒कता॑-माप्नोत्ये॒तौ वै सू॒॑र्याचन्द्र॒मसो॑-र्महि॒मानौ॑ ब्राह्म॒णो वि॒द्वा-न॒भिज॑यति॒ तस्मा॒॑द्ब्रह्म॑णो॑ महि॒मान॑ं माप्नोति॒ तस्मा॒॑द्ब्रह्म॑णो॑ महि॒मान॑म्॑ ॥

ॐ स॒ह नाव॑वतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्विना॒वधी॑तमस्तु मा वि॑द्विषा॒वहै॑ ।

ॐ शान्ति॒-श्शान्ति॒-श्शान्ति॑: ॥

॥ बृहदारण्यकोपनिषत् ॥

प्रथमोऽध्यायः

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ । उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मागंसान्यूवध्यगं् सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचञ्जघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥

अहर्वा अश्वं पुरस्तान्महिमाऽन्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमाऽन्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः संबभूवतु-र्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वाऽसुरानश्वो मनुष्यान्समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ २ ॥

इति प्रथमं ब्राह्मणम् ॥

नैवेह किंचनाग्र आसीन्मृत्यु-नैवेदमावृतमासी-दशनायया ऽशनाया हि मृत्युस्तन्मनोऽकुरुताऽऽत्मन्वी स्यामिति सोऽर्चन्न-

चरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कगं् ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥

आपो वा अर्कस्तद्यदपागं् शार आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्तताग्निः ॥ २ ॥

स त्रेधाऽऽत्मानं व्यकुरुताऽऽदित्यं तृतीयं वायुं तृतीयगं् स एष प्राणस्त्रेधा विहितस्तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मावथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः स एषोऽप्सुप्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥

सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनगं् समभवदशनाया मृत्युस्तद्रेत आसीत्स संवत्सरोऽभवन्नह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभर्यावान्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥ ४ ॥

स ऐक्षत यदि वा इममभिमगं्स्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेनाऽऽत्मनेदगं् सर्वमसृजत यदिदं किंचर्चो यजूगंषि सामानिच्छन्दागंसि यज्ञान्प्रजाः पशून्स यद्यदेवासृजत तत्तद-

त्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वग् सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥ ५ ॥

सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरग् श्वयितुमध्रियत तस्य शरीर एव मन आसीत् ॥ ६ ॥

सोऽकामयत मेध्यं म इदग् स्यादात्मन्व्यनेन स्यामिति ततो ऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वा अश्वमेधं वेद य एनमेवं वेद तमनवरुद्ध्यैवामन्यत तग् संवत्सरस्य परस्तादात्मन आलभत पशून्देवताभ्यः प्रत्यौहत्तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्त एष ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्माऽयमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्याऽऽत्मा भवत्येतासां देवतानामेको भवति ॥ ७ ॥ **इति द्वितीयं ब्राह्मणम् ॥**

द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥

ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायद्यो

वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ २ ॥

अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥ ३ ॥

अथ ह चक्षुरूचुस्त्वं न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायद्य-श्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥ ४ ॥

अथ ह श्रोत्रमूचुस्त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणगं् शृणोति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपगं् शृणोति स एव स पाप्मा ॥ ५ ॥

अथ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणगं् संकल्पयति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मना

ऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपगं् संकल्पयति स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पाप्मना ऽविध्यन् ॥ ६ ॥

अथ हेममास्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविव्यत्सन्स यथाऽश्मानमृत्वा लोष्टो विध्वगं्सेतैवगं् हैव विध्वगं्समाना विष्वञ्चो विनेशुस्ततो देवा अभवन्पराऽसुरा भवत्यात्मना पराऽस्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥

ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानागं् हि रसः ॥ ८ ॥

सा वा एषा देवता दूर्नाम दूरगं् ह्यस्या मृत्युर्दूरगं् ह वा अस्मान्मृत्यु-र्भवति य एवं वेद ॥ ९ ॥

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रा ऽऽसां दिशामन्तस्तद्गमयांचकार तदासां पाप्मनो विन्यदधात्तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १० ॥

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्युमत्यवहत् ॥ ११ ॥

स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥

अथ प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १३ ॥

अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदित्यो ऽभवत्सोऽसा वादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १४ ॥

अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवगंस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १५ ॥

अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्येवगं ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥ १६ ॥

अथाऽऽत्मनेऽन्नाद्यमागायद्यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥

ते देवा अब्रुवन्नेतावद्वा इदगं सर्वं यदन्नं तदात्मन आगासीरनु नोऽस्मिन्नन्न आभजस्वेति ते वै माऽभिसंविशतेति तथेति तगं समन्तं परिण्यविशन्त तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येवगं ह वा एनगं स्वा अभिसंविशन्ति भर्ता स्वानागं श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद य उ हैवंविदगं स्वेषु प्रति प्रतिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनुभवति यो वैतमनु भार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥ १८ ॥

सोऽयास्य आङ्गिरसोऽङ्गानागं हि रसः प्राणो वा अङ्गानागं

रसः प्राणो हि वा अङ्गानाग्ं रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अङ्गानाग्ं रसः ॥ १९ ॥

एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ॥ २० ॥

एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥ २१ ॥

एष उ एव सामवाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वम् यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यग्ं सलोकतां य एवमेतत्साम वेद ॥ २२ ॥

एष उ वा उद्गीथः प्राणो वा उत्प्राणेन हीदग्ं सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः ॥ २३ ॥

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाचायं त्यस्य राजा मूर्धानं विपातयताद्यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥ २४ ॥

तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसंपन्नयाऽऽर्त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एवाथो

यस्य स्वं भवति भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥ २५ ॥

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः ॥ २७ ॥

अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्त्यथ यानीतराणि स्तोत्राणि तेष्वात्मने ऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तगं् स एष एवंविदुद्गाताऽऽत्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशाऽस्ति य एवमेतत्साम वेद ॥ २८ ॥ **इति तृतीयं ब्राह्मणम् ॥**

आत्मैवेदमग्र आसीत्पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनो ऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्या-मन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यन्नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥ १ ॥

सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षां चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्यद्-द्वितीयाद्वै भयं भवति ॥ २ ॥

स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत्स हैतावानास यथा स्त्रीपुमाग्ंसौ संपरिष्वक्तौ स इममेवाऽऽत्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव स्व इति ह स्माऽऽह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव ताग्ं समभवत्ततो मनुष्या अजायन्त ॥ ३ ॥

सो हेयमीक्षां चक्रे कथं नु माऽऽत्मन एव जनयित्वा संभवति हन्त तिरोऽसानीति सा गौरभवदृषभ इतरस्ताग्ं समेवाभवत्ततो गावोऽजायन्त वडवेतराऽभवदश्ववृष इतरो गर्दभीतरा गर्दभइतरस्ताग्ं समेवाभवत्तत एकशफमजायताजेतराऽभवद्वस्त इतरोऽविरितरा मेष इतरस्ताग्ं समेवाभवत्ततोऽजावयोऽजायन्तैवमेव यदिदं किंच मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥

सोऽवेदहं वाव सृष्टिरस्म्यहꣳ हीदꣳ सर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्याꣳ हास्यैतस्यां भवति य एवं वेद ॥ ५ ॥

अथेत्यभ्यमन्थत्स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभय-मलोमक-मन्तरतोऽलोमका हि योनिरन्त-रतस्तद्यदिद-माहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदꣳ सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टिर्य च्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टि-रतिसृष्ट्याꣳ हास्यैतस्यां भवति य एवं वेद ॥ ६ ॥

तद्धेदं तर्ह्य-व्याकृतमासीत्तन्नाम-रूपाभ्यामेव व्याक्रियतासौ-नामाऽयमिदꣳरूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियते ऽसौनामाऽयमिदꣳरूप इति स एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलाये तं न पश्यन्त्यकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति वदन्वाक्पश्यꣳश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव स योऽतएकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्माऽनेन ह्येतत्सर्वं वेद यथा ह

वै पदेनानुविन्देदेवं कीर्तिग्ं श्लोकं विन्दते य एवं वेद ॥ ७ ॥

तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियग्ं रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ ८ ॥

तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ ९ ॥

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणांतद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहंमनुरभवग्ं सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदग्ं सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषाग्ं स भवत्यथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवग्ं स देवानाम् यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ १० ॥

ब्रह्म वा इदमग्र आसीदेकमेव तदेकग्ं सन्न व्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति तस्मात्क्षत्रात्परं नास्ति

तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनग्ं हिनस्ति स्वाग्ं स योनिमृच्छति स पापीयान्भवति यथा श्रेयाग्ंसग्ं हिग्ंसित्वा ॥ ११ ॥

स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ॥ १२ ॥

स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयग्ं हीदग्ं सर्वं पुष्यति यदिदं किंच ॥ १३ ॥

स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयाग्ंसमाशग्ंसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तग्ं सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति ॥ १४ ॥

तदेतद्ब्रह्म क्षत्रं विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याग्ं हि रूपाभ्यां ब्रह्माभवदथयो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतं

यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवाऽऽत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवाऽऽत्मनो यद्यत्कामयते तत्तत्सृजते ॥ १५ ॥

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः सयज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितॄणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाग्ंस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवग्ं हैवंविदे सर्वाणि भूतान्यरिष्टि-मिच्छन्ति तद्वा एतद्विदितं मीमाग्ंसितम् ॥ १६ ॥

आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छग्ंश्चनातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता मन एवास्याऽऽत्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषाहि तद्विन्दते श्रोत्रं दैवग्ं श्रोत्रेण हि

तच्छृणोत्यात्मैवास्य कर्माऽऽत्मना हि कर्म करोति स एष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदगं् सर्वं यदिदं किंच तदिदगं् सर्वमाप्नोति य एवं वेद ॥ १७ ॥ **इति चतुर्थं ब्राह्मणम् ॥**

यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् । तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन । स देवानपिगच्छति स ऊर्जमुपजीवतीति श्लोकाः ॥ १ ॥

यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेति मेधया हि तपसाजनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रगं् ह्येतत् द्वे देवानभाजयदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथो आहुर्दर्शपूर्णमासाविति तस्मान्नेष्टियाजुकः स्यात् पशुभ्य एकं प्रायच्छदिति तत्पयः पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्त्यथ वत्सं जातमाहुरतृणाद इति तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदगं् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं

विद्वान्सर्वग्ं हि देवेभ्योऽन्नाद्यं प्रयच्छति कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्व-देति पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते यो वैतामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्स देवानपिगच्छति स ऊर्जमुपजीवतीति प्रशग्ंसा ॥ २ ॥

त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भी-रित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सैषा ह्यन्तमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥

त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकःप्राणोऽसौ लोकः ॥ ४ ॥

त्रयो वेदा एत एव वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ ५ ॥

देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः प्राणो मनुष्याः ॥ ६ ॥

पिता माता प्रजैत एव मन एव पिता वाङ्माता प्राणः प्रजा ॥ ७ ॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किंच विज्ञातं वाचस्तद्रूपं वाग्धि विज्ञाता वागेनं तद्भूत्वाऽवति ॥ ८ ॥

यत्किंच विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वाऽवति ॥ ९ ॥

यत्किंचाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति ॥ १० ॥

तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ ११ ॥

अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनगं् समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥ १२ ॥

अथैतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रस्त एते सर्व एव समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवन्तगं् स लोकं

जयत्यथ यो हैताननन्तानुपास्तेऽनन्तगं् स लोकं जयति ॥ १३ ॥

स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदशकला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवाऽऽच पूर्यतेऽप च क्षीयते सोऽमावास्यागं् रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेतागं् रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥

यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवं वित्पुरुषस्तस्य वित्तमेव पञ्चदशकला आत्मैवास्य षोडशी कला स वित्तेनैवाऽऽच पूर्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनाऽगादित्येवाऽऽहुः ॥ १५ ॥

अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानागं् श्रेष्ठस्तस्माद्विद्यां प्रशगंसन्ति ॥ १६ ॥

अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ये वै के च यज्ञास्तेषागं् सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषागं् सर्वेषां लोक

इत्येकतैतावद्वा इदगं् सर्वमेतन्मा सर्वगं् सन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवं-विदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किंचिदक्षण्याऽकृतं भवति तस्मादेनगं् सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा अमृता आविशन्ति ॥ १७ ॥

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥ १८ ॥

दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनाऽऽनन्द्येव भवत्यथो न शोचति ॥ १९ ॥

अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः संचरगंश्चासंचरगंश्च न व्यथतेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवगं् स यथैतां देवतागं् सर्वाणि भूतान्यवन्त्येवगं् हैवंविदगं् सर्वाणि भूतान्यवन्ति यदु किंचेमाः प्रजाः शोचन्त्यमैवाऽऽसां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति ॥ २० ॥

अथातो व्रतमीमागंसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योन्येनास्पर्धन्त वदिष्याम्येवाहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि

यथाकर्म तानि मृत्युः श्रमो भूत्वोपयेमे तान्याप्नोत्तान्याप्त्वा मृत्युरवारुन्ध तस्माच्छ्राम्यत्येव वाक्श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाऽऽप्नोद्योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरेऽयं वै नः श्रेष्ठो यः संचरगंश्चासंचरगंश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवगंस्तस्मादेत एतेनाऽऽख्यायन्ते प्राणा इति तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्धते ऽनुशुष्यत्यनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मम् ॥ २१ ॥

अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तपस्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एवमन्या देवता यथादैवतगं् स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुर्लोचन्ति ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता यद्वायुः ॥ २२ ॥

अथैष श्लोको भवति यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मगं् स एवाद्य स उश्व इति यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्युचरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यगं् सलोकतां जयति ॥ २३ ॥ **इति पञ्चमं ब्राह्मणम् ॥**

त्रयं वा इदं नाम रूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो

हि सर्वाणि नामान्युत्तिष्ठन्ति एतदेषाग्ं सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥

अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषाग्ं सामैतद्धि सर्वैं रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥

अथ कर्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषाग्ं सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयग्ं सदेकमयमात्माऽऽत्मो एकः सन्नेतत् त्रयं तदेतदमृतग्ं सत्त्येन च्छन्नं प्राणो वा अमृतं नामरूपे सत्त्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥ **इति षष्ठं ब्राह्मणम् ॥**

॥ इति बृहदारण्यकोपनिषदि प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः

ॐ दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥ १ ॥

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥ २ ॥

स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥

स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ॥ ४ ॥

स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठो ऽपराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भव-त्यन्यतस्त्यजायी ॥ ६ ॥

स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह भवति

विषासहिर्हास्य प्रजा भवति ॥ ७ ॥

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपगं् हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥

स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः संनिगच्छति सर्वागं्स्तानति रोचते ॥ ९ ॥

स होवाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा असुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वगं् हैवास्मिँल्लोक आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १० ॥

स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्गणश्छिद्यते ॥ ११ ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं

ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वगं् हैवास्मिँल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥

स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्त आत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥ १३ ॥

स होवाचा जातशत्रुरेतावन्नू ३ इत्येतावद्धीति नैतावता विदितं भवतीति स होवाच गार्ग्य उप त्वा यानीति ॥ १४ ॥

स होवाचाजातशत्रुः प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषगं् सुप्तमाजग्मतुस्तमैतै-र्नामभिरामन्त्रयांचक्रे बृहन्पाण्डरवासः सोम राजन्निति स नोत्तस्थौ तं पाणिनाऽऽपेषं बोधयांचकार स होत्तस्थौ ॥ १५ ॥

स होवाचा जातशत्रुर्य त्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः ॥ १६ ॥

स होवाचाजातशत्रुर्य त्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय

आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग्गृहीतं चक्षुर्गृहीतग्ं श्रोत्रं गृहीतं मनः ॥ १७ ॥

स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥ १८ ॥

अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥ १९ ॥

स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥ **इति प्रथमं ब्राह्मणम् ॥**

यो ह वै शिशुग्ं साधानग्ं सप्रत्याधानग्ं सस्थूणग्ं सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणध्ययं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाऽऽधानमिदं प्रत्याधानं प्राणः स्थूणाऽन्नं दाम ॥ १ ॥

तमेताः सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षन्लोहिन्यो

राजयस्ताभिरेनग्ं रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनका तयाऽऽदित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रोऽधरयैनं वर्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥

तदेष श्लोको भवति । अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम् । तस्याऽऽसत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति । अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्याऽऽसत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्ह्यष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥

इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥ **इति द्वितीयं ब्राह्मणम् ॥**

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च ॥ १ ॥

तदेतन्मूर्तं यदन्यद्वायो-श्चान्तरिक्षाच्चैतन्मर्त्य-मेतत्स्थित-मेतत्

सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥ २ ॥

अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यं तस्यैतस्या मूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम् ॥ ३ ॥

अथाध्यात्ममिदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश एतन्मर्त्य-मेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः ॥ ४ ॥

अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः ॥ ५ ॥

तस्य हैतस्य पुरुषस्य रूपमं यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तगं् सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयगं् सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ ६ ॥

इति तृतीयं ब्राह्मणम् ॥

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात् स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ १ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णास्यात्कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥ २ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥

स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा

अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदगं् सर्वं विदितम् ॥ ५ ॥

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद क्षत्रं तं परादाद्यो ऽन्यत्राऽऽत्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्राऽऽत्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद भूतानि तं परादुर्योऽन्यत्राऽऽत्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्रा ऽऽत्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदगं् सर्वं यदयमात्मा ॥ ६ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय शङ्खस्यतु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥

स यथाऽऽर्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदो ऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनु-

व्याख्यानानि व्याख्यानान्यस्यैवैतानि निःश्वसितानि ॥ १० ॥

स यथा सर्वासामपाग्ं समुद्र एकायनमेवग्ं सर्वेषाग्ं स्पर्शानां त्वगेकायनमेवग्ं सर्वेषां गन्धानां नासिकै कायनमेवग्ं सर्वेषाग्ं रसानां जिह्वैकायनमेवग्ं सर्वेषाग्ं रूपाणां चक्षुरेकायनमेवग्ं सर्वेषाग्ं शब्दानाग्ं श्रोत्रमेकायनमेवग्ं सर्वेषाग्ं संकल्पानां मन एकायनमेवग्ं सर्वासां विद्यानाग्ं हृदयमेकायनमेवग्ं सर्वेषां कर्मणाग्ं हस्तावेकायनमेवग्ं सर्वेषामानन्दानामुपस्थ एकायनमेवग्ं सर्वेषां विसर्गाणां पायुरेकायनमेवग्ं सर्वेषामध्वनां पादावेकायनमेवग्ं सर्वेषां वेदानां वागेकायनम् ॥ ११ ॥

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेवस्याद्यतो यतस्त्वादद्दीत लवणमेवैवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥

सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञाऽस्तीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय ॥ १३ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरग्ं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन

कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कगं् शृणुयात्तत्केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयात् येनेदगं् सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥ **इति चतुर्थं ब्राह्मणम् ॥**

इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मगं् शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ १ ॥

इमा आपः सर्वेषां भूतानां मध्वासामपागं् सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मगं् रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ २ ॥

अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ ३ ॥

अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं

ब्रह्मेदगं् सर्वम् ॥ ४ ॥

अयमादित्यः सर्वेषां भूतानां मध्वस्याऽऽदित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ ५ ॥

इमा दिशः सर्वेषां भूतानां मध्वासां दिशागं् सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मगं् श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ ६ ॥

अयं चन्द्रः सर्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिगंश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ ७ ॥

इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ ८ ॥

अयगंस्तनयित्नुः सर्वेषां भूतानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो

यश्चायमध्यात्मग्ं शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदग्ं सर्वम् ॥ ९ ॥

अयमाकाशः सर्वेषां भूतानां मध्वस्याऽऽकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मग्ं हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदग्ं सर्वम् ॥ १० ॥

अयं धर्मः सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदग्ं सर्वम् ॥ ११ ॥

इदग्ं सत्यग्ं सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मग्ं सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदग्ं सर्वम् ॥ १२ ॥

इदं मानुषग्ं सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदग्ं सर्वम् ॥ १३ ॥

अयमात्मा सर्वेषां भूतानां मध्वस्याऽऽत्मनः सर्वाणि भूतानि

मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदगं् सर्वम् ॥ १४ ॥

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानाग्ं राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ १५ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । तद्वां नरा सनये दग्ंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् । दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥ १६ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । आथर्वणायाश्विनौ दधीचेऽश्व्यग्ं शिरः प्रत्यैरयतम् । स वां मधु प्रवोचदृता यन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ १७ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशादिति । स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृतं नैनेन किंचनासंवृतम् ॥ १८ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः

पश्यन्नवोचत् । रूपगुं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनु शासनम् ॥ १९ ॥ **इति पञ्चमं ब्राह्मणम् ॥**

अथ वगंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥

आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानभिम्लात आनभिम्लातादानभिम्लात आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्यागं सैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो बैजवापायनाद्बैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चाऽऽसुरायणस्त्रैवणे-स्त्रैवणि-रौपजन्धने-रौपजन्धनि-रासुरे-रासुरिर्भारद्वाजा-द्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्या-

त्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्या-द्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपा-द्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रा-द्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणो ऽथर्वणो दैवाददथर्वा दैवो मृत्योः प्राध्वग्ंसनान्मृत्युः प्राध्वग्ंसनः प्रध्वग्ंसनात्प्रध्वग्ंसन एकर्षे-रेकर्षि-र्विप्रचित्ते-र्विप्रचित्ति-र्व्यष्टे-र्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥

इति षष्ठं ब्राह्मणम् ॥

॥ इति बृहदारण्यकोपनिषदि द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः

ॐ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कःस्विदेषां ब्राह्मणानामनूचानतम इति स ह गवाग्ं सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥

तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव

ब्रह्मचारिणमुवाचैताः सोम्योदज सामश्रवा३ इति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेत्यथ ह जनकस्य वैदेहस्य होताऽश्वलो बभूव स ह वैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयग्ं स्म इति तग्ं ह तत एव प्रष्टुं दध्रे होताऽश्वलः ॥ २ ॥

याज्ञवल्क्येति होवाच यदिदग्ं सर्वं मृत्युनाऽऽप्तग्ं सर्वं मृत्युनाऽभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति होत्रर्त्विजाऽग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक्सोऽयमग्निः स होता स मुक्तिः साऽतिमुक्तिः ॥ ३ ॥

याज्ञवल्क्येति होवाच यदिदग्ं सर्वमहोरात्राभ्यामाप्तग्ं सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्यध्वर्युणर्त्विजा चक्षुषाऽऽदित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः साऽतिमुक्तिः ॥ ४ ॥

याज्ञवल्क्येति होवाच यदिदग्ं सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तग्ं सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षापरपक्षयो-राप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः साऽतिमुक्तिः ॥ ५ ॥

याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्बणमिव केनाऽऽक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षा अथ संपदः ॥ ६ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होताऽस्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति ॥ ७ ॥

याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोकः ॥ ८ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥ ९ ॥

याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रियाः

स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्याऽपानो याज्या व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकगं् शस्यया ततो ह होताऽश्वल उपरराम ॥ १० ॥

इति प्रथमं ब्राह्मणम् ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ १ ॥

प्राणौ वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति ॥ २ ॥

वाग्वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ३ ॥

जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति ॥ ४ ॥

चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥

श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति ॥ ६ ॥

मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते ॥ ७ ॥

हस्तौ वै ग्रहः स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्याग्ं हि कर्म करोति ॥ ८ ॥

त्वग्वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ॥ ९ ॥

याज्ञवल्क्येति होवाच यदिदग्ं सर्वं मृत्योरन्नं कास्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति ॥ १० ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥ ११ ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥ १२ ॥

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वाग्प्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीग्ं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य

हस्तमार्तभागाऽऽवामेवैतस्य वेदिष्यावो न नावेतत्सजन इति तौ होत्क्रम्य मन्त्रयांचक्राते तौ ह यदूचतुः कर्म हैव तदूचतुरथ यत्प्रशशगंसतुः कर्म हैव तत्प्रशशगंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥ १३ ॥ **इति द्वितीयं ब्राह्मणम् ॥**

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्याऽऽसीदुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति तं यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन्स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥ १ ॥

स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति क्व न्वश्वमेधयाजिनो गच्छन्तीति द्वात्रिगंशतं वै देवरथाह्यान्ययं लोकस्तगं समन्तं पृथिवी द्विस्तावत्पर्येति तागं समन्तं पृथिवी द्विस्तावत्समुद्रः पर्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाऽऽकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्नित्येवमिव वै स वायुमेव प्रशशगंस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद

ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥ **इति तृतीयं ब्राह्मणम् ॥**

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा सर्वान्तरो यो व्यानेन व्यानिति स त आत्मा सर्वान्तरो य उदानेनोदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥ १ ॥

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारग्ं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥

इति चतुर्थं ब्राह्मणम् ॥

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं

चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतस्तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्तं ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥

इति पञ्चमं ब्राह्मणम् ॥

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदगं् सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्र लोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापति लोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच

गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि माऽतिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥ **इति षष्ठं ब्राह्मणम् ॥**

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्याऽऽसीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकागंश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकागंश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकगं् सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पञ्चलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकागंश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वागंस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रग्ंसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहीति ॥ २ ॥

यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ३ ॥

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्याऽऽपः शरीरं योऽपोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ४ ॥

योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ५ ॥

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षग्ं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ६ ॥

यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ७ ॥

यो दिवि तिष्ठन्दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ८ ॥

य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद

यस्याऽऽदित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ९ ॥

यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १० ॥

यश्चन्द्रतारके तिष्ठग्ंश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्रतारकग्ं शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ११ ॥

य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याऽऽकाशः शरीरं य आकाशमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १२ ॥

यस्तमसि तिष्ठग्ंस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरं यस्तमोऽन्तरोयमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १३ ॥

यस्तेजसि तिष्ठग्ंस्तेजसोऽन्तरो यं तेजो न वेद यस्य तेजः शरीरं यस्तेजोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥

यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यग्ं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिभूतमथाध्यात्मम् ॥ १५ ॥

यः प्राणे तिष्ठन्प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं

यः प्राणमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १६ ॥

यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ्न वेद यस्य वाक्शरीरं यो वाचमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १७ ॥

यश्चक्षुषि तिष्ठग्ंश्चक्षुषोऽन्तरो यं चक्षुर्न वेदयस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १८ ॥

यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यग्ं श्रोत्रं न वेद यस्य श्रोत्रग्ं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १९ ॥

यो मनसि तिष्ठन्मनसोन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २० ॥

यस्त्वचि तिष्ठग्ंस्त्वचोऽन्तरो यं त्वङ्न वेद यस्य त्वक्शरीरं यस्त्वचमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २१ ॥

यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानग्ं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मा ऽन्तर्याम्यमृतः ॥ २२ ॥

यो रेतसि तिष्ठन्रेतसोऽन्तरो यग्ं रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्माऽन्तर्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक

आरुणिरुपरराम ॥ २३ ॥ **इति सप्तमं ब्राह्मणम् ॥**

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति पृच्छ गार्गीति ॥ १ ॥

सा होवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥ २ ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिगंस्तदोतं च प्रोतं चेति ॥ ३ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥

सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥ ५ ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिगंस्तदोतं च प्रोतं चेति ॥ ६ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥

स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूल मनण्वह्रस्व-मदीर्घमलोहित-मस्नेहमच्छाय-मतमोऽवाय्वनाकाश-मसङ्गमरस-मगन्धमचक्षुष्क-मश्रोत्रमवागमनोऽतेजस्क-मप्राणममुख ममात्रमनन्तर-मबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ॥ ८ ॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशगंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः ॥ ९ ॥

यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतग्ं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ११ ॥

सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ततो ह वाचक्नव्युपरराम ॥ १२ ॥ **इत्यष्टमं ब्राह्मणम् ॥**

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिग्ंशादित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥

स होवाच महिमान एवैषामेते त्रयस्त्रिग्ंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिग्ंशादित्यष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्यास्त एकत्रिग्ंशादिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिग्ं शाविति ॥ २ ॥

कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदंवसु सर्वग्ं हितमिति तस्माद्वसव इति ॥ ३ ॥

कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशास्ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥

कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्या एते हीदग्ं सर्वमाददाना यन्ति ते यदिदग्ं सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥ ६ ॥

कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च द्यौश्चैते षडेते हीदग्ं सर्वग्ं षडिति ॥ ७ ॥

कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति ॥ ८ ॥

तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदग्ं सर्वमध्याध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स

ब्रह्म त्यदित्याचक्षते ॥ ९ ॥

पृथिव्येव यस्याऽऽयतनमग्निर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायग्ं शारीरः पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यमृतमिति होवाच ॥ १० ॥

काम एव यस्याऽऽयतनग्ं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥ ११ ॥

रूपाण्येव यस्याऽऽयतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवाच ॥ १२ ॥

आकाश एव यस्याऽऽयतनग्ं श्रोत्रं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं

यमात्थ य एवायग्ं श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥ १३ ॥

तम एव यस्याऽऽयतनग्ं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायं छायामयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मृत्युरिति होवाच ॥ १४ ॥

रूपाण्येव यस्याऽऽयतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायमादर्शे पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यसुरिति होवाच ॥ १५ ॥

आप एव यस्याऽऽयतनग्ं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञंवल्क्य वेद वा अहं तं पुरुषग्ं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष वदैव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥ १६ ॥

रेत एव यस्याऽऽयतनग्ं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणग्ं स वै वेदिता स्याद्याज्ञवल्क्य वेद

वा अहं तं पुरुषगं् सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायं पुत्रमयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच ॥ १७ ॥

शाकल्येति होवाच याज्ञवल्क्यस्त्वागं्स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥ १८ ॥

याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥

किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्ती-त्येवमेवैतद्याज्ञवल्क्य ॥ २० ॥

किंदेवतोऽस्यां दक्षिणायां दिश्यसीति यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायागं् ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां

जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवती त्येवमेवै-तद्याज्ञवल्क्य ॥ २१ ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्वापः प्रतिष्ठिता इति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥

किंदेवतोऽस्यामुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवती-त्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥

किंदेवतोऽस्यां ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक्प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥

अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्धये-तदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयागंसि वैनद्विमथ्नीरन्निति ॥२५॥

कस्मिन्नु त्वं चात्माच प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु

प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति तग्ं ह न मेने शाकल्यस्तस्य ह मूर्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥ २६ ॥

अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

तान्हैतैः श्लोकैः पप्रच्छ । यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा । तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥ १ ॥

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः । तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाऽऽहतात् ॥ २ ॥

माग्ंसान्यस्य शकराणि किनाटग्ं स्नाव तत्स्थिरम् । अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥ ३ ॥

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः । मर्त्यः स्विन्मृत्युना

वृक्णः कस्मान्मूलात्प्ररोहति ॥ ४ ॥

रेतस इति मा वोचत जीवतस्तत्प्रजायते। धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य संभवः ॥ ५ ॥

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत्। मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ६ ॥

जात एव न जायते को न्वेनं जनयेत्पुनः। विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति ॥ ७ ॥..... ॥ २८ ॥

इति नवमं ब्राह्मणम् ॥

॥ इति बृहदारण्यकोपनिषदि तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः

ॐ जनको ह वैदेह आसांचक्रेऽथ ह याज्ञवल्क्य आवव्राज तꣳ होवाच याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानित्युभयमेव सम्राडिति होवाच ॥ १ ॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य वागेवाऽऽयतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्राडिति होवाच वाचा वै सम्राड्बन्धुः

प्रज्ञायत ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट्प्रज्ञायन्ते वाग्वै सम्राट्परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभगं् सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदङ्कः शौल्बायनः प्राणौ वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किगं् स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवाऽऽयतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट्कामायायाज्यं याजयत्य-प्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट्कामाय प्राणो वै सम्राट्परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभगं् सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे बर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथामातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तद्वार्ष्णो ऽब्रवीच्चक्षुर्वै ब्रह्मेत्य पश्यतोहि किग्ं स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवाऽऽयतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट्पश्यन्तमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट्परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभग्ं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किग्ं स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवाऽऽयतनमाकाशः प्रतिष्ठाऽनन्त इत्येनदुपासीत काऽनन्तता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशो दिशो वै सम्राट् श्रोत्रग्ं श्रोत्रं वै सम्राट्परमं

ब्रह्म नैनग्ं श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभग्ं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किग्ं स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवाऽऽयतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत काऽऽनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट्स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट्परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभग्ं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ६ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किग्ं स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा

एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवाऽऽयतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राट् सर्वेषां भूतानामायतनगं् हृदयं वै सम्राट् सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट्-सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनगं् हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभगं् सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥ **इति प्रथमं ब्राह्मणम् ॥**

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन्रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्माऽस्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥ १ ॥

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एतमिन्धगं् सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥

अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट्तयोरेष

सगं्स्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्येताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः ॥ ३ ॥

तस्य प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहोऽभयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमस्मि ॥ ४ ॥ **इति द्वितीयं ब्राह्मणम् ॥**

जनकगं् ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तगं् हास्मै ददौ तगं् ह सम्राडेव पूर्वं पप्रच्छ ॥ १ ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इत्यादित्यज्योतिः सम्राडिति

होवाचाऽऽदित्येनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ २ ॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ३ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव

स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः सगंसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयगं स्वप्नस्थानं तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं चाथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनन्दागंश्च पश्यति स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति ॥ ९ ॥

न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते न तत्राऽऽनन्दा मुदः प्रमुदो भवन्त्यथाऽऽनन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिणीः स्रवन्तीः सृजते स हि कर्ता ॥ १० ॥

तदेते श्लोका भवन्ति । स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति । शुक्रमादाय पुनरैति स्थानगं हिरण्मयः पुरुष एकहगंसः ॥ ११ ॥

प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा । स ईयतेऽमृतो यत्र कामगं हिरण्मयः पुरुष एकहगंसः ॥ १२ ॥

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि। उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ १३ ॥

आरामस्य पश्यन्ति न तं पश्यति कश्चनेति। तं नाऽऽयतं बोधयेदित्याहुः। दुर्भिषज्यग्ं हास्मै भवति यमेष न प्रतिपद्यतेऽथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयं ज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥

स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥

स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ १७ ॥

तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥ १८ ॥

तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः सगंहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति ॥ १९ ॥

ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छायति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदगं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ २० ॥

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयगं रूपम् तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरमेवमेवायं पुरुषः प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरं तद्वा अस्यैतदाप्तकाम-मात्मकाम-मकामगं रूपगं शोकान्तरम् ॥ २१ ॥

अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा

चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥ २३ ॥

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥

यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ २५ ॥

यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥

यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि

मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥

यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २९ ॥

यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥

यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ३१ ॥

सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य एषाऽस्य परमा गतिरेषाऽस्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवा ऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥

स यो मनुष्याणाग्ं राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दोऽथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक

आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्म-देवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्तेऽथ ये शतं कर्म-देवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनन्द एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ३४ ॥

तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेवमेवायगुं शारीर आत्मा प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जन्याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

स यत्रायमणिमानं न्येति जरया वोपतपता वाऽणिमानं निगच्छति तद्यथाऽऽम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यते एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥ ३६ ॥

तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽय-मायात्यय-मागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्ते इदं ब्रह्माऽऽयातीदमागच्छतीति ॥ ३७ ॥

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्यो ऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३८ ॥ **इति तृतीयं ब्राह्मणम् ॥**

स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्यादददानो हृदय-मेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्ततेऽथारूपज्ञो भवति ॥ १ ॥

एकी भवति न पश्यतीत्याहुरेकी भवति न जिघ्रतीत्याहुरेकी भवति न रसयत इत्याहुरेकी भवति न वदतीत्याहुरेकी भवति न शृणोतीत्याहुरेकी भवति न मनुत इत्याहुरेकी भवति न स्पृशतीत्याहुरेकी भवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥

तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरति ॥ ३ ॥

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम् ॥ ४ ॥

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥ ५ ॥

तदेष श्लोको भवति । तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न

तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥

तदेष श्लोको भवति। यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥

तद्यथाऽहिर्निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदगं् शरीरगं् शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ७ ॥

तदेते श्लोका भवन्ति। अणुः पन्था विततः पुराणो मागं् स्पृष्टोऽनुवित्तो मयैव। तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥

तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलगं् हरितं लोहितं च। एष पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ९ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायागं् रताः ॥ १० ॥

अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः। तागंस्ते प्रेत्याभिगच्छन्त्यविद्वागंसोऽबुधो जनाः ॥ ११ ॥

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥

यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्संदेह्ये गहने प्रविष्टः। स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥ १३ ॥

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः । ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥ १४ ॥

यदैतमनुपश्यत्यात्मानं देवमञ्जसा । ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः । तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥

मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किंचन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १९ ॥

एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् । विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥ २० ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनगं् हि तदिति ॥ २१ ॥

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना

कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्त्येतद्धस्म वै तत्पूर्वे विद्वाग्ंसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतस्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यत्येतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः ॥ २२ ॥

तदेतदृचाभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजोऽविचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान्ददामि मां

चापि सह दास्यायेति ॥ २३ ॥

स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु य एवं वेद ॥ २४ ॥

स वा एष महानज आत्माऽजरोऽमरोमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयगं् हि वै ब्रह्म भवति य एवं वेद ॥ २५ ॥

इति चतुर्थं ब्राह्मणम् ॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थाना-दस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ २ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताऽऽहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितगं् स्यादमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥ ३ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ४ ॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधद्वन्त तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे

निदिध्यासस्वेति ॥ ५ ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदगं् सर्वं विदितम् ॥ ६ ॥

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद क्षत्रं तं परादाद्यो ऽन्यत्राऽऽत्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्राऽऽत्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद वेदास्तं परादुर्योऽन्यत्रा ऽऽत्मनो वेदान्वेद भूतानि तं परादुर्योऽन्यत्रा ऽऽत्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदगं् सर्वं यदयमात्मा ॥ ७ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्-ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥

स यथाऽऽर्द्रेधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टगं् हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥

स यथा सर्वासामपागं् समुद्र एकायनमेवगं् सर्वेषागं् स्पर्शानां

त्वगेकायनमेवग्ं सर्वेषां गन्धानां नासिकैकायनमेवग्ं सर्वेषाग्ं रसानां जिह्वैकायनमेवग्ं सर्वेषाग्ं रूपाणां चक्षुरेकायनमेवग्ं सर्वेषाग्ं शब्दानाग्ं श्रोत्रमेकायनमेवग्ं सर्वेषाग्ं संकल्पानां मन एकायनमेवग्ं सर्वासां विद्यानाग्ं हृदयमेकायनमेवग्ं सर्वेषां कर्मणाग्ं हस्तावेकायनमेवग्ं सर्वेषामानन्दानामुपस्थ एकायनमेवग्ं सर्वेषां विसर्गाणां पायुरेकायनमेवग्ं सर्वेषामध्वनां पादावेकायनमेवग्ं सर्वेषां वेदानां वागेकायनम् ॥ १२ ॥

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥

सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपिपन्न वा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा ॥ १४ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरग्ं रसयते तदितर इतरमभिवदति तदितर इतरग्ं शृणोति तदितर इतरं मनुते तदितर इतरग्ं स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कग्ं रसयेत्तत्केन कमभिवदेत्तत्केन कग्ं

शृणुयात्तत्केन कं मन्वीत तत्केन कग्ं स्पृशेत्तत्केन कं विजानीयाद्येनेदग्ं सर्वं विजानाति तं केन विजानीयात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥ १५ ॥ **इति पञ्चमं ब्राह्मणम् ॥**

अथ वग्ंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥

आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनायनान्माध्यंदिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चाऽऽसुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः

काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्या-द्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रो ऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाददथर्वा दैवो मृत्योः प्राध्वग्ंसनान्मृत्युः प्राध्वग्ं सनः प्रध्वग्ंसना-त्प्रध्वग्ंसन एकर्षे-रेकर्षि-र्विप्रचित्ते-र्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥ **इति षष्ठं ब्राह्मणम् ॥**

॥ इति बृहदारण्यकोपनिषदि चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ३ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माऽऽह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥ १ ॥ **इति प्रथमं ब्राह्मणम् ॥**

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ १ ॥

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥

अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयꣳ शिक्षेद्दमं दानं दयामिति ॥ ३ ॥ **इति द्वितीयं ब्राह्मणम् ॥**

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरग्ं हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥ १ ॥ **इति तृतीयं ब्राह्मणम् ॥**

तद्वै तदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकाञ्जित इन्वसावसद्य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यग्ं ह्येव ब्रह्म ॥ १ ॥

इति चतुर्थं ब्राह्मणम् ॥

आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्त सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवाꣳस्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरग्ं सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे

अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतगं् सत्यभूयमेव भवति नैनं विद्वागंसमनृतगं् हिनस्ति ॥ १ ॥

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥ २ ॥

य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर एकगं् शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥

योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकगं् शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ४ ॥ **इति पञ्चमं ब्राह्मणम् ॥**

मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच ॥ १ ॥ **इति षष्ठं ब्राह्मणम् ॥**

विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ १ ॥ **इति सप्तमं ब्राह्मणम् ॥**

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥ १ ॥ **इत्यष्टमं ब्राह्मणम् ॥**

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैनं घोषगं् शृणोति ॥ १ ॥

इति नवमं ब्राह्मणम् ॥

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लम्बरस्य खं तेन स ऊर्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्व आक्रमते स लोकमागच्छत्य-शोकमहिमं तस्मिन्वसति शाश्वतीः समाः ॥ १ ॥

इति दशमं ब्राह्मणम् ॥

एतद्वै परमं तपो यद्व्याहितस्तप्यते परमगं् हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यगं् हरन्ति परमगं् हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमगं् हैव लोकं जयति य एवं वेद ॥ १ ॥ **इत्येकादशं ब्राह्मणम् ॥**

अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वै प्राण ऋतेऽन्नादेते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतस्तद्ध स्माऽऽह प्रातृदः पितरं किंग्स्विदेवैवं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति स ह स्माऽऽह पाणिना मा प्रातृद कत्स्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद ॥ १ ॥ **इति द्वादशं ब्राह्मणम् ॥**

उक्थं प्राणो वा उक्थं प्राणो हीदगं् सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यगं् सलोकतां जयति य एवं वेद ॥ १ ॥

यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यगं् सलोकतां जयति य एवं वेद ॥ २ ॥

साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यगं् सलोकतां जयति य एवं वेद ॥ ३ ॥

क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः

प्र क्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्यगं् सलोकतां जयति य एवं वेद ॥ ४ ॥ **इति त्रयोदशं ब्राह्मणम् ॥**

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरगं् ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥

ऋचो यजूगंषि सामानीत्यष्टावक्षराण्यष्टाक्षरगं् ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥

प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्षरगं् ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेदाथास्या एतदेव तुरीयं दर्शतं पदं परो रजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपत्येवगं् हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ३ ॥

सैषा गायत्र्येतस्मिगंस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलगं् सत्यादोगीय इत्येवम्वैषा

गायत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गयाग्ंस्तत्रे प्राणा वै गयास्तत्प्राणाग्ंस्तत्रे तद्यद्गयाग्ंस्तत्रे तस्माद्गायत्री नाम स यामेवामूग्ं सावित्रीमन्वाहैषैव सा स यस्मा अन्वाह तस्य प्राणाग्ंस्त्रायते ॥ ४ ॥

ताग्ं हैतामेके सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति न तथा कुर्याद्गायत्रीमेव सावित्री मनुब्रूयाद्यदि ह वा अप्येवंविद्ब्रह्मिव प्रतिगृह्णाति न हैव तद्गायत्र्या एकंचन पदं प्रति ॥ ५ ॥

स य इमाग्ंस्त्रील्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सो ऽऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केनचनाऽऽप्यं कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥

तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठितेऽहमदः प्रापमिति वा ॥ ७ ॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो

तद्गायत्रीविदब्रूथा अथ कथग्ं हस्तीभूतो वहसीति मुखग्ं ह्यस्याः सम्राण्न विदांचकारेति होवाच तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहत्येवग्ं हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ८ ॥ **इति चतुर्दशं ब्राह्मणम् ॥**

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तग्ं शरीरम् । ॐ३ क्रतो स्मर कृतग्ं स्मर क्रतो स्मर कृतग्ं स्मर । अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥ **इति पञ्चदशं ब्राह्मणम् ॥**

॥ इति बृहदारण्यकोपनिषदि पञ्चमोऽध्यायः ॥

षष्ठोऽध्यायः

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ १ ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ २ ॥

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥ ३ ॥

यो ह वै संपदं वेद सग्ं हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः सग्ं हास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ४ ॥

यो ह वा आयतनं वेदाऽऽयतनग्ं स्वानां भवत्यायतनं जनानां मनो वा आयतनमायतनग्ं स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ५ ॥

यो ह वै प्रजातिं वेद प्रजायते ह प्रजया पशुभी रेतो वै प्रजातिः प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६ ॥

ते हेमे प्राणा अहग्ंश्रेयसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रान्त इदग्ं शरीरं पापीयो मन्यते स वो वसिष्ठ इति ॥ ७ ॥

वाग्घोच्चक्राम सा संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाग्ंसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत

मदृते जीवितुमिति ते होचुर्यथाऽन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाग्ंसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥ ९ ॥

श्रोत्रग्ं होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाग्ंसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥

मनो होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वाग्ंसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥

रेतो होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाग्ंसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः पड्वीशशाङ्कून्संवृहेदेवग्ं हैवेमान्प्राणान्संववर्ह ते होचुर्मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ १३ ॥

सा ह वागुवाच यद्वा अहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहगं् संपदस्मि त्वं तत्संपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतस्तस्यो मे किमन्नं किं वास इति यदिदं किंचाऽऽश्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वागं्सः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाऽऽचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥ **इति प्रथमं ब्राह्मणम् ॥**

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम स आजगाम जैवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा३ इति स भो३ इति प्रतिशुश्रावानुशिष्टोऽन्वसि पित्रेत्योमिति होवाच ॥ १ ॥

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता३ इति नेति होवाच वेत्थो यथेमं लोकं पुनरापद्यन्ता३ इति नेति हैवोवाच वेत्थो यथाऽसौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता३ इति नेति हैवोवाच वेत्थो यतिथ्यामाहुत्यागं् हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते

पितृयाणं वाऽपि हि न ऋषेर्वचः श्रुतं द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति नाहमत एकंचन वेदेति होवाच ॥ २ ॥

अथैनं वसत्योपमन्त्रयांचक्रेऽनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तगं् होवाचेति वाव किल नो भवान्पुराऽनुशिष्टानवोच इति कथगं् सुमेध इति पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्ततो नैकंचन वेदेति कतमे त इतीम इति ह प्रतीकान्युदाजहार ॥ ३ ॥

स होवाच तथा नस्त्वं तात जानीथा यथा यदहं किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास तस्मा आसनमाहृत्योदकमाहारयांचकाराथ हास्मा अर्घ्यं चकार तगं् होवाच वरं भगवते गौतमाय दद्म इति ॥ ४ ॥

स होवाच प्रतिज्ञातो म एष वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ॥ ५ ॥

स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ॥ ६ ॥

स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिधानस्य मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति स वै गौतम तीर्थेनेच्छासा इत्युपैम्यहं

भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति स होपायन-कीर्त्योवास ॥ ७ ॥

स होवाच तथा नस्त्वं गौतम माऽपराधास्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिंग्श्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥ ८ ॥

असौ वै लोकोऽग्निर्गौतम तस्याऽऽदित्य एव समिद्रश्मयो धूमो ऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवति ॥ ९ ॥

पर्जन्यो वा अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमग्ं राजानं जुह्वति तस्या आहुत्यै वृष्टिः संभवति ॥ १० ॥

अयं वै लोकोऽग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुत्या अन्नग्ं संभवति ॥ ११ ॥

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति ॥ १२ ॥

योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गास्तस्मिन्ने-

तस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स जीवति यावज्जीवत्यथ यदा म्रियते ॥ १३ ॥

अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विस्फुलिङ्गा विस्फुलिङ्गास्तस्मिन्ने-तस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥ १४ ॥

ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धागं् सत्यमुपासते तेऽर्चिरभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षा-द्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोका-दादित्यमादित्याद्वैद्युतं तान्वैद्युतान् वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः ॥ १५ ॥

अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसंभवन्ति धूमाद्रात्रिगं् रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्द-क्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति तागंस्तत्र देवा यथा सोमगं् राजानमाप्यायस्वा-पक्षीयस्वेत्येवमेनागंस्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैत्यथेममेवा ऽऽकाशमभिनिष्पद्यन्त आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ

जायन्ते ते लोकान्प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्तेऽथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं ददशूकम् ॥ १६ ॥

इति द्वितीयं ब्राह्मणम् ॥

स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कगंसे चमसे वा सर्वौषधं फलानीति संभृत्य परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्यो ऽऽवृताज्यगं सगंस्कृत्य पुगंसा नक्षत्रेण मन्थगं संनीय जुहोति । यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान् । तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु स्वाहा । या तिरश्ची निपद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजे सगंराधनीमहगं स्वाहा ॥ १ ॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति श्रोत्राय स्वाहाऽऽयतनाय स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे सगंस्रवमवनयति ॥ २ ॥

अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा मन्थे सग्ंस्रवमवनयति ॥ ३ ॥

अथैनमभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिंकृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे संदीप्तमसि विभूरसि प्रभूरस्यन्नमसि ज्योतिरसि निधनमसि संवर्गोऽसीति ॥ ४ ॥

अथैनमुद्यच्छत्यामग्ंस्यामग्ंहि ते महि स हि राजेशानो ऽधिपतिः स मागं् राजेशानोऽधिपतिं करोत्विति ॥ ५ ॥

अथैनमाचामति तत्सवितुर्वरेण्यम् । मधु वाता ऋतायते मधु

क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । भूः स्वाहा । भर्गो देवस्य धीमहि । मधु नक्तमुतोषसो मधुमत्पार्थिवगं् रजः । मधु द्यौरस्तु नः पिता । भुवः स्वाहा । धियो यो नः प्रचोदयात् । मधुमान्नो वनस्पतिर्मधुमाग् अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । स्वः स्वाहेति सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेदगं् सर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वगंशं जपति ॥ ६ ॥

तगं् हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एनगं् शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ७ ॥

एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि य एनगं् शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ८ ॥

एतमु हैव मधुकः पैङ्ग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनगं् शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ९ ॥

एतमु हैव चूलो भागवित्तिर्जानकय आयस्थूणायान्तेवासिन

उक्त्वोवाचापि य एनगं् शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १० ॥

एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य एनगं् शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ११ ॥

एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनगं् शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति तमेतन्नापुत्राय वाऽनन्तेवासिने वा ब्रूयात् ॥ १२ ॥

चतुरौदुम्बरो भवत्यौदुम्बरः स्रुव औदुम्बरश्चमस औदुम्बर इध्म औदुम्बर्या उपमन्थन्यौ दश ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा अणुप्रियंगवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्पिष्टान्दधनि मधुनि घृत उपसिञ्चत्याज्यस्य जुहोति ॥ १३ ॥ **इति तृतीयं ब्राह्मणम् ॥**

एषां वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥ १ ॥

स ह प्रजापतिरीक्षांचक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियगं्ससृजे तागं् सृष्ट्वाऽध उपास्त तस्मात्स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत् ॥ २ ॥

तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य एवं विद्वानधोपहासं चरत्यासाग्ं स्त्रीणाग्ं सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासं चरत्याऽस्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै तद्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति य इदमविद्वाग्ंसोऽधोपहासं चरन्तीति बहु वा इदग्ं सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ४ ॥

तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः । इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः । पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ५ ॥

अथ यद्युदक आत्मानं पश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणग्ं सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासास्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ६ ॥

सा चेदस्मै न दद्यात्काममेनामवक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिन्द्रियेण ते

यशसा यश आदद इत्ययशा एव भवति ॥ ७ ॥

सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः ॥ ८ ॥

स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखगं् संधायोपस्थमस्या अभिमृश्य जपेदङ्गादङ्गात्संभवसि हृदया-दधिजायसे । स त्वमङ्गकषायोऽसिदिग्धविद्धमिव मादयेमाममूं मयीति ॥ ९ ॥

अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखगं् संधायाभिप्राण्यापान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥ १० ॥

अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखगं् संधायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति ॥ ११ ॥

अथ यस्य जायायै जारः स्यात्तं चेद्विष्यादामपात्रे ऽग्निमुपसमाधाय प्रतिलोमगं् शरबर्हिस्तीर्त्वा तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाऽक्ता जुहुयान्मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषीः पुत्रपशूगंस्त आददेऽसाविति मम समिद्धेऽहौषीरिष्टासुकृते त आददेऽसाविति मम समिद्धे ऽहौषीराशापराकाशौ त आददेऽसाविति स वा एष निरिन्द्रियो

विसुकृतोऽस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति ॥ १२ ॥

अथ यस्य जायामार्तवं विन्देत्त्र्यहं कगंसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥ १३ ॥

स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १४ ॥

अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १५ ॥

अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥

अथ य इच्छेदुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १७ ॥

अथ य इच्छेत्पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमायुरियादिति मागंसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै औक्षेण वाऽऽर्षभेण वा ॥ १८ ॥

अथाभिप्रातरेव स्थालीपाकावृताऽऽज्यं चेष्टित्वा स्थालीपाक-स्योपघातं जुहोत्यग्नये स्वाहाऽनुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्व्यागं् सं जायां पत्या सहेति ॥ १९ ॥

अथैनामभिपद्यतेऽमोऽहमस्मि सा त्वग्ं सा त्वमस्य मोऽहग्ं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि सग्ंरभावहै सह रेतो दधावहै पुग्ंसे पुत्राय वित्तय इति ॥ २० ॥

अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठाय मुखेन मुखग्ं संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिग्ंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥

हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ । तं ते गर्भग्ं हवामहे दशमे मासि सूतये । यथाऽग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी । वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥

सोष्यन्तीमद्भिरभ्युक्षति । यथा वायुः पुष्करिणीग्ं समिङ्गयति सर्वतः । एवा ते गर्भ एजतु सहावैतु जरायुणा । इन्द्रस्यायं व्रजः

कृतः सार्गलः सपरिश्रयः । तमिन्द्र निर्जहि गर्भेण सावराग् सहेति ॥ २३ ॥

जातेऽग्निमुपसमाधायाङ्क आधाय कग्सं पृषदाज्यग् संनीय पृषदाज्यस्योपघातं जुहोत्यस्मिन्सहस्रं पुष्यासमेधमानः स्वे गृहे । अस्योपसन्धां मा च्छैत्सीत्प्रजया च पशुभिश्च स्वाहा । मयि प्राणाग्स्त्वयि मनसा जुहोमि स्वाहा । यत्कर्मणाऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टग् सुहुतं करोतु नः स्वाहेति ॥ २४ ॥

अथास्य दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथ दधि मधु घृतग् संनीयानन्तर्हितेन जातरूपेण प्राशयति । भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ २५ ॥

अथास्य नाम करोति वेदोऽसीति तदस्य तद्गुह्यमेव नाम भवति ॥ २६ ॥

अथैनं मात्रे प्रदाय स्तनं प्रयच्छति यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः । येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे करिति ॥ २७ ॥

अथास्य मातरमभिमन्त्रयते । इलाऽसि मैत्रावरुणी वीरे वीरमजीजनत् । सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदिति ।

तं वा एतमाहुरतिपिता बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥ **इति चतुर्थं ब्राह्मणम् ॥**

अथ वग्ंशः । पौतिमाषीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रादौपस्वस्तीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रः कौशिकीपुत्रात्कौशिकीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैयाघ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः ॥ १ ॥

आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वात्सीपुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्र आलम्बीपुत्रादालम्बीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगी-

पुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिः ॥ २ ॥

याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्धार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागाम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूगंषि वाजसनेयेन याज्ञवल्क्येनाऽऽख्यायन्ते ॥ ३ ॥

समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ४ ॥ **इति पञ्चमं ब्राह्मणम् ॥**

॥ इति बृहदारण्यकोपनिषदि षष्ठोऽध्यायः ॥

॥ इति वाजसनेयके बृहदारण्यकोपनिषत्-समाप्ता ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ शान्तिः शान्तिः शान्तिः ॥

॥ गणपत्यथर्वशीर्षोपनिषत् ॥

(श्रीगणेशाथर्वशीर्षम्)

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम् ॥ १ ॥

ऋतं वच्मि । सत्यं वच्मि ॥ २ ॥

अव त्वं माम् । अवं वक्तारम्ँ । अवं श्रोतारम्ँ । अवं दातारम्ँ । अवं धातारम्ँ । अवानूचानमंव शिष्यम् । अवं पश्चात्ताँत् । अवं पुरस्ताँत् । अवोत्तरात्ताँत् । अवं दक्षिणात्ताँत् । अवं चोर्ध्वात्ताँत् । अवाधरात्ताँत् । सर्वतो मां पाहि पाहिं समन्तात् ॥ ३ ॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ४ ॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं

जगदिदं त्वयि लयंमेष्यति । सर्वं जगदिदं त्वयिं प्रत्येति । त्वं भूमिरापोऽनलोऽनिंलो नभः । त्वं चत्वारि वाँक्पदानि ॥ ५ ॥

त्वं गुणत्रंयातीतः । त्वं अवस्थात्रंयातीतः । त्वं देहत्रंयातीतः । त्वं कालत्रंयातीतः । त्वं मूलाधारस्थितोंऽसि नित्यम् । त्वं शक्तित्रंयात्मकः । त्वां योगिनो ध्यायंन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ६ ॥

गणादिंँ पूर्वमुच्चार्य वर्णादींँ स्तदनन्तरम् । अनुस्वारः परतरः । अर्धेंन्दुलसितम् । तारेंण ऋद्धम् । एतत्तव मनुंस्वरूपम् । गकारः पूँर्वरूपम् । अकारो मध्यंमरूपम् । अनुस्वारश्चाँन्त्यरूपम् । बिन्दुरुत्तंररूपम् । नादंः सन्धानम् । सगंहिंता सन्धिः । सैषा गणेंशविद्या । गणंक ऋषिः । निचृद्गायंत्रीच्छन्दः । गणपतिंर्देवता । ॐ गं गणपंतये नमः ॥ ७ ॥

एकदन्तायं विद्महें वक्रतुण्डायं धीमहि ।
तन्नों दन्तिः प्रचोदयाँत् ॥ ८ ॥

एकदन्तं चंतुर्हस्तं पाशमंङ्कुशधारिंणम् । रदं च वरंदं हस्तैर्बिभ्राणं मूषकध्वंजम् । रक्तं लम्बोदंरं शूर्पकर्णकं रक्तवासंसम् । रक्तंगन्धानुंलिप्ताङ्गं रक्तपुंष्पैः सुपूजितम् । भक्तांनुकम्पिंनं देवं जगत्कांरणमच्युंतम् । आविंर्भूतं च सृष्ट्यादौ प्रकृतेंः पुरुषात्परम् ।

एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥

नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥ १० ॥

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वत्र सुखमेधते । स पञ्चमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् ॥ ११ ॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥ १२ ॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ १३ ॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति। सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति। महाविघ्नात् प्रमुच्यते। महादोषात् प्रमुच्यते। महाप्रत्यवायात् प्रमुच्यते। स सर्वविद्भवति स सर्वविद्भवति। य एवं वेद। इत्युपनिषत् ॥ १४ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ सूर्योपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः। ब्रह्मा ऋषिः। गायत्री छन्दः। आदित्यो देवता। हंसः सोऽहमग्निनारायणयुक्तं बीजम्। ह्रल्लेखा शक्तिः। वियदादिसर्गसंयुक्तं कीलकम्। चतुर्विधपुरुषार्थ सिद्ध्यर्थे विनियोगः।

षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुज संस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाऽभयवरदहस्तं कालचक्रप्रणेतारं श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः ॥

ॐ भूर्भुवः सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । सूर्य आत्मा जगतस्तस्थुषश्च । सूर्याद्वै खल्विमानि भूतानि जायन्ते । सूर्याद्यज्ञः पर्जन्योऽन्नमात्मा ।

नमस्ते आदित्य । त्वमेव प्रत्यक्षं कर्म कर्तासि । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं विष्णुरसि । त्वमेव प्रत्यक्षं रुद्रोऽसि । त्वमेव प्रत्यक्षं ऋगसि । त्वमेव प्रत्यक्षं यजुरसि । त्वमेव प्रत्यक्षं सामासि । त्वमेव प्रत्यक्षमथर्वासि । त्वमेव सर्वं छन्दोऽसि । आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापो-जायन्ते । आदित्याज्ज्योतिर्जायते । आदित्याद् व्योम दिशो जायन्ते ।

आदित्याद् देवा जायन्ते । आदित्याद्वेदा जायन्ते । आदित्यो वा एष एतन्मण्डलं तपति । असावादित्यो ब्रह्मा । आदित्यो ऽन्तःकरण-मनोबुद्धि-चित्ताहंकाराः । आदित्यो वै व्यानस्समानो-दानोऽपानः प्राणः । आदित्यो वै श्रोत्र-त्वक्चक्षूरसनघ्राणाः ।

आदित्यो वै वाक्पाणिपादपायूपस्थाः । आदित्यो वै शब्दस्पर्शरूपरसगन्धाः । आदित्यो वै वचनादानागमन विसर्गानन्दाः । आनन्दमयो विज्ञानमयो विज्ञानघन आदित्यः । नमो मित्राय भानवे मृत्योर्मा पाहि । भ्राजिष्णवे विश्वहेतवे नमः । सूर्याद्भवन्ति भूतानि सूर्येण पालितानि तु ।

सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च । चक्षुर्नो देवः

संविता चक्षुर्न उत पर्वतः । चक्षु-र्धाता दधातु नः ।

आदित्यायं विद्महे सहस्रकिरणायं धीमहि । तन्नः सूर्यः प्रचोदयात् ।

सविता पुरस्तात्सविता पश्चात्तात्सवितोत्तरात्तात्सविताधरात्तात्-त्सविता नः सुवतु सर्वतातिग्ं सविता नो रासतां दीर्घमायुः ।

ओमित्येकाक्षरं ब्रह्मा । घृणिरिति द्वे अक्षरे । सूर्य इत्यक्षरद्वयम् । आदित्य इति त्रीण्यक्षराणि । एतस्यैव सूर्यस्याष्टाक्षरो मनुः ।

यः सदाहरहर्जपति स वै ब्राह्मणो भवति स वै ब्राह्मणो भवति । सूर्याभिमुखो जप्त्वा महाव्याधि भयात्प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्य भक्षणात् पूतो भवति । अगम्यागमनात् पूतो भवति । पतित संभाषणात् पूतो भवति । असत् संभाषणात्पूतो भवति ।

मध्याह्ने सूर्याभिमुखः पठेत् । सद्योत्पन्नपञ्चमहापातकात्प्रमुच्यते । सैषा सावित्रीं विद्यां न किंचिदपि न कस्मैचित्प्रशंसयेत् । य एतां महाभागः प्रातः पठति स भाग्यवान् जायते पशून्विन्दति । वेदार्थं लभते । त्रिकालमेतज्जप्त्वा क्रतुशतफलमवाप्नोति । हस्तादित्ये जपति स महामृत्युं तरति स महामृत्युं तरति य एवं वेद । इत्युपनिषत् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ कठोपनिषत् ॥

प्रथमोऽध्यायः

प्रथमा वल्ली

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

उशन्ह वै वाजश्रवसः सर्व वेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥ तग्ं ह कुमारग्ं सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश, सोऽमन्यत ॥ २ ॥ पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः । अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत् ॥ ३ ॥ स होवाच पितरं तत कस्मै मां दास्यसीति । द्वितीयं तृतीयं तग्ं होवाच मृत्यवे त्वा ददामीति ॥ ४ ॥ बहूनामेमि प्रथमो बहूनामेमि मध्यमः । किग्स्विद्यमस्यं कर्तव्यं यन्मयाऽद्य करिष्यति ॥ ५ ॥

अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे । सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६ ॥ वैश्वानरः प्रविशत्य-तिथिर्ब्राह्मणो गृहान् । तस्यैताग्ं शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ ७ ॥ आशाप्रतीक्षे सङ्गतग्ं सूनृतां चेष्टापूर्ते पुत्रपशूग्श्च सर्वान् । एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे ॥ ८ ॥ तिस्रो रात्रीर्यदवात्सीर्गृहे मे

ऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः । नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥ ९ ॥ शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माऽभि मृत्यो । त्वत्प्रसृष्टं माऽभि वदेत्प्रतीत एतत् त्रयाणां प्रथमं वरं वृणे ॥ १० ॥

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः । सुखगं रात्रीः शयितां वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥ ११ ॥ स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति । उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥ १२ ॥ स त्वमग्निगं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तगं श्रद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण ॥ १३ ॥ प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् । अनन्तलोकाप्तिमथो प्रतिष्ठांविद्धि त्वमेतं निहितं गुहायाम् ॥ १४ ॥ लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा । स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः ॥ १५ ॥

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः । तवैव नाम्ना भवितोऽयमग्निः सृङ्कां चेमामनेकरूपां गृहाण ॥ १६ ॥ त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू । ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमाग्ं शान्तिमत्यन्तमेति ॥ १७ ॥ त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाग्श्चिनुते नाचिकेतम् ।

स मृत्युंपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥ एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमंवृणीथा द्वितींयेन वरेण । एतंमग्निं तवैवं प्रवक्ष्यन्ति जनासंस्तृतीयं वरं नचिकेतो वृणीष्व ॥ १९ ॥ येयं प्रेते विचिकिंत्सा मनुष्येऽस्तीत्येके नायमस्तींति चैके । एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥ २० ॥

देवैरत्रापि विचिकिंत्सितं पुरा न हिं सुविज्ञेयमणुरेष धर्मः । अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ॥ २१ ॥ देवैरत्रापि विचिकिंत्सितं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ । वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यों वरस्तुल्य एतस्यं कश्चित् ॥ २२ ॥ शतायुषः पुत्रपौत्रान्वृणीष्व बहून्पशून्हस्ति हिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदों यावदिच्छसि ॥ २३ ॥ एतत्तुल्यं यदि मन्यसे वरं वृणींष्व वित्तं चिरजींविकां च । महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥ २४ ॥ ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामाग्श्छन्दतः प्रार्थयस्व । इमा रामाः सरथाः सतूर्या न हीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं माऽनुप्राक्षीः ॥ २५ ॥

श्वोऽभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयंन्ति तेजः । अपिं सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥ २६ ॥

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा ।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥ २७ ॥
अजीर्यतामृतानामुपेत्य जीर्यन्मर्त्यः क्वधःस्थः प्रजानन् ।
अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत ॥ २८ ॥
यस्मिन्निदं विचिकित्सन्ति मृत्योयत्साम्पराये महति ब्रूहि नस्तत् ।
योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥ २९ ॥

द्वितीया वल्ली

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषꣳ सिनीतः ।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ १ ॥ श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते ॥ २ ॥ स त्वं प्रियान्प्रियरूपाꣳश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैताꣳ सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥ ३ ॥ दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त ॥ ४ ॥ अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः ॥ ५ ॥

न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् । अयं

लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥ ६ ॥ श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽआश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७ ॥ न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः । अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान्ह्यतर्क्यमणु-प्रमाणात् ॥ ८ ॥ नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ । यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥ ९ ॥ जानाम्यहग् शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् । ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥

कामस्याऽऽप्तिं जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम् । स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥ ११ ॥ तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥ एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्य-मणुमेतमाप्य । स मोदते मोदनीयग् हि लब्ध्वा विवृतग् सद्म नचिकेतसं मन्ये ॥ १३ ॥ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ १४ ॥ सर्वे वेदा यत्पदमामनन्ति तपाग्सि सर्वाणि च यद्वदन्ति ।

यदिंच्छन्तो ब्रह्मचर्यं चरन्ति तत्तें पदग्ं सङ्ग्रहेंण ब्रवीम्योंमित्ये-तत् ॥ १५ ॥

एतद्ध्येवाक्षंरं ब्रह्म एतद्ध्येवाक्षंरं परम्। एतद्ध्येवाक्षंरं ज्ञात्वा यो यदिंच्छति तस्य तंत् ॥ १६ ॥ एतदालम्बंनं श्रेष्ठमेतदालम्बंनं परम्। एतदालम्बंनं ज्ञात्वा ब्रह्मलोंके महीयंते ॥ १७ ॥ न जांयते म्रियते वा विपश्चिन्नायं कुतंश्चिन्न बभूवं कश्चित्। अजों नित्यः शाश्वतोंऽयं पुराणो न हंन्यते हन्यमांने शरीरे ॥ १८ ॥ हन्तां चेन्मन्यतें हन्तुग्ं हतंश्चेन्मन्यतें हतम्। उभौं तौ न विजानींतो नायग्ं हंन्ति न हन्यंते ॥ १९ ॥ अणोरणींयान्महतो महींयानात्मास्य जन्तोर्निहितों गुहायाम्। तमंक्रतुः पश्यति वीतशोको धातुः प्रसादांन्महिमानंमात्मनः ॥ २० ॥

आसींनो दूरं व्रजति शयानों याति सर्वतः। कस्तं मंदामदंग्ं देवं मदन्यों ज्ञातुमर्हति ॥ २१ ॥ अशरींरग्ं शरीरेंष्वनवस्थे-ष्ववस्थितम्। महान्तं विभुंमात्मानं मत्वा धींरो न शोचंति ॥ २२ ॥ नायंमात्मा प्रवचनेंन लभ्यो न मेधंया न बहुना श्रुतेन। यमेंवैष वृणुते तेन लभ्यस्तस्यैंष आत्मा विवृंणुते तनूग्ं स्वाम् ॥ २३ ॥ नाविंरतो दुश्चरितान्नांशान्तो नासमाहिंतः। नाशांन्तमानंसो वाऽपि प्रज्ञानें-नैनमाप्नुंयात् ॥ २४ ॥ यस्यं ब्रह्म चं क्षत्रं च उभे भंवत ओदनंः। मृत्युंर्यस्योपंसेचनं क इत्थां वेद यत्रं सः ॥ २५ ॥

तृतीया वल्ली

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ १ ॥ यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् । अभयं तितीर्षतां पारं नाचिकेतगं् शकेमहि ॥ २ ॥ आत्मानगं् रथिनं विद्धि शरीरगं् रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥ इन्द्रियाणि हयानाहुर्विषयांग्स्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४ ॥ यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा । तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥ यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः । न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥ ७ ॥ यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥ विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ ९ ॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ १० ॥

महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा

काष्ठां सा परा गतिः ॥ ११ ॥ एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥ १३ ॥ उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ॥ १४ ॥ अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यम-गन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्यु मुखात्प्रमुच्यते ॥ १५ ॥

नाचिकेतमुपाख्यानं मृत्युप्रोक्तगं् सनातनम्। उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥ १६ ॥ य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि। प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पत इति ॥ १७ ॥

द्वितीयोऽध्यायः

चतुर्थी वल्ली

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥ पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्। अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥ येन रूपं रसं गन्धं शब्दान्स्पर्शाग्श्च मैथुनान्। एतेनैव विजानाति

किमत्र परिशिष्यते । एतद्वै तत् ॥ ३ ॥ स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥ य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् । ईशानं भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥ ५ ॥

यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत । गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत । एतद्वै तत् ॥ ६ ॥ या प्राणेन सम्भवत्यदितिर्देवतामयी । गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत । एतद्वै तत् ॥ ७ ॥ अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः । दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः । एतद्वै तत् ॥ ८ ॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति । तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन । एतद्वै तत् ॥ ९ ॥ यदेवेह तदमुत्र यदमुत्र तदन्विह । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १० ॥

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥ ११ ॥ अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥ १२ ॥ अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः । एतद्वै तत् ॥ १३ ॥ यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति । एवं धर्मान्पृथक्पश्यंस्तानेवानु-

विधावंति ॥ १४ ॥ यथोंदकं शुद्धे शुद्धमांसिक्तं तादृगेंव भवति । एवं मुनेर्विजानत आत्मा भंवति गौतंम ॥ १५ ॥

पञ्चमी वल्ली

पुरमेंकादशद्वारमजस्यांवक्रचेतंसः । अनुष्ठांय न शोचंति विमुक्तंश्च विमुच्यंते । एतद्वै तत् ॥ १ ॥ हगंसः शुंचिषद्वसुंरन्तरिक्षसद्धोतां वेदिषदतिंथिर्दुरोणसत् । नृषद्वंरसदृतसद्व्योंमसदब्जा गोजा ऋतजा अंद्रिजा ऋतं बृहत् ॥ २ ॥ ऊर्ध्वं प्राणंमुन्नयत्यपानं प्रत्यंगस्यति । मध्यें वामनंमासीनं विश्वे देंवा उपासंते ॥ ३ ॥ अस्य विस्रंसमानस्य शरीरंस्थस्य देहिंनः । देहांद्विमुच्यमानस्य किमत्रं परिशिष्यंते । एतद्वै तत् ॥ ४ ॥ न प्राणेन नांपानेन मर्त्यो जीवंति कश्चंन । इतरेण तुं जीवन्ति यस्मिन्नेंतावुपाश्रिंतौ ॥ ५ ॥

हन्तं त इदं प्रंवक्ष्यामि गुह्यं ब्रह्म सनातंनम् । यथां च मरंणं प्राप्य आत्मा भंवति गौतंम ॥ ६ ॥ योनिंमन्ये प्रंपद्यन्ते शरीरंत्वाय देहिंनः । स्थाणुंमन्येऽनुंसंयन्ति यथाकंर्म यथाश्रुंतम् ॥ ७ ॥ य एंष सुप्तेषुं जागर्ति कामं कांमं पुरुषों निर्मिमाणः । तदेंव शुक्रं तद्ब्रह्म तदेंवामृतमुंच्यते । तस्मिंल्लोकाः श्रिंताः सर्वे तदु नांत्येति कश्चंन । एतद्वै तत् ॥ ८ ॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकंस्तथा सर्वभूतान्तंरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥ वायुर्यथैको

भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥ एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥ नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥ तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् । कथं नु तद्विजानीयां किमु भाति विभाति वा ॥ १४ ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १५ ॥

षष्ठी वल्ली

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन । एतद्वै तत् ॥ १ ॥ यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् । महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥ इह चेदशकद्बोद्धुं प्राक्शरीरस्य

विस्रसः । ततः सर्वेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥ यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके । यथाऽप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥ ५ ॥

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् । पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥ इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् । सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥ ७ ॥ अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च । यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥ ८ ॥ न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ ९ ॥ यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् ॥ १० ॥

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥ ११ ॥ नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ १२ ॥ अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः । अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥ १३ ॥ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥ यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः । अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥ १५ ॥

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ १६ ॥ अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥ १७ ॥ मृत्युप्रोक्तां नाचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् । ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥ १८ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

त्वं परं परमं तेजो मङ्गलानां च मङ्गलम् ।
अप्रमेयगुणश्चैव मन्त्राणां मन्त्रगो भवान् ॥

स्कन्दपुराणम् - १, २, २९, १२६.

Thou art the supreme Being, the supreme light, the most auspicious of the auspicious. Thou art the possessor of countless virtues, the secret of the Mantras.

॥ मुण्डकोपनिषत् ॥

प्रथममुण्डकम्

प्रथमः खण्डः

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ब्रह्मा देवानाँ प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥ १ ॥

अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् । स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥ २ ॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ ३ ॥

तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥ ४ ॥

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्व वेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ॥ ५ ॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥ ६ ॥

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम् ॥ ७ ॥

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥ ८ ॥

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ ९ ॥

द्वितीयः खण्डः

तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि । तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥ १ ॥

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने । तदाऽऽज्यभागावन्तरेणाऽऽहुतीः प्रतिपादयेत् ॥ २ ॥

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च । अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति ॥ ३ ॥

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।

स्फुलिंङ्गिनी विश्वरुची चं देवी लेलांयमाना इति संप्त जिह्वाः ॥ ४ ॥

एतेषु यश्चंरते भ्राजंमानेषु यथाकांलं चाऽऽहुतंयो ह्याददायन् । तं नयंन्त्येताः सूर्यस्य रश्मयो यत्र देवानांं पतिरेकोंऽधिवासः ॥ ५ ॥

एह्येहींति तमांहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति । प्रियां वाचमभिवंदन्त्योंऽर्चयन्त्य एष वंः पुण्यः सुकृतों ब्रह्मलोकः ॥ ६ ॥

प्लवां ह्येते अदृढा यज्ञंरूपा अष्टादशोंक्तमवरं येषुं कर्म । एतंच्छ्रेयो येऽभिनंन्दन्ति मूढा जरांमृत्युं ते पुनरेंवापि यन्ति ॥ ७ ॥

अविंद्यायामन्तरें वर्तमांनाः स्वयं धीराः पण्डितं मन्यमानाः । जङ्घंन्यमानाः परियंन्ति मूढा अन्धेंनैव नीयमांना यथाऽन्धाः ॥ ८ ॥

अविंद्यायां बहुधां वर्तमाना वयं कृंतार्था इत्यभिंमन्यन्ति बालाः । यत्कंर्मिणो न प्रंवेदयन्ति रागांत्तेनातुराः क्षीणलोंकाश्च्यवन्ते ॥ ९ ॥

इष्टापूर्तं मंन्यमाना वरिष्ठं नान्यच्छ्रेंयो वेदयन्ते प्रंमूढाः । नाकंस्य पृष्ठे ते सुकृतेंऽनुभूत्वेमं लोकं हींनतरं वा विशन्ति ॥ १० ॥

तपंःश्रद्धे ये ह्युपवंसन्त्यरण्ये शान्ता विंद्वांसो भैक्ष्यचर्यां चरन्तः । सूर्यंद्वारेण ते विरजांः प्रयान्ति यत्रांमृतः स पुरुषों ह्यव्ययात्मा ॥ ११ ॥

परीक्ष्यं लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥

तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १३ ॥

द्वितीयमुण्डकम्

प्रथमः खण्डः

तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥ १ ॥

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥ २ ॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ ३ ॥

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ ४ ॥

तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्याम् । पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः

पुरुषा॑त्सम्प्रसू॒ताः ॥ ५ ॥

तस्मा॑दृ॒चः साम॒ यजूं॑षि दी॒क्षा य॒ज्ञाश्च॑ सर्वे॑ क्र॒तवो॒ दक्षि॑णाश्च । संव॑त्सरश्च॒ यज॑मा॑नश्च लो॒काः सो॒मो यत्र॒ प॑वते॒ यत्र॒ सूर्यः॑ ॥ ६ ॥

तस्मा॑च्च देवा ब॒हुधा॑ सम्प्रसू॒ताः॒ सा॒ध्या म॑नुष्याः॒ प॒शवो॑ वयांसि । प्राणा॑पानौ व्री॒हिय॑वौ॒ त॒प॒श्च॒ श्र॒द्धा स॒त्यं ब्र॒ह्म॒च॒र्यं॑ विधिश्च ॥ ७ ॥

स॒प्त प्रा॒णाः प्र॒भव॑न्ति॒ तस्मा॑त्स॒प्तार्चि॑षः स॒मिध॑ः स॒प्त हो॒माः । स॒प्त इ॒मे लो॒का येषु॒ च॒र॑न्ति प्रा॒णा गु॒हाश॑या॒ निहि॑ताः स॒प्त स॑प्त ॥ ८ ॥

अत॑ः समु॒द्रा गि॒रय॑श्च॒ सर्वे॑ऽस्मात्स्यन्द॑न्ते॒ सिन्ध॑वः॒ सर्व॑रूपाः । अत॑श्च॒ सर्वा॒ ओष॑धयो॒ रस॑श्च॒ येनै॑ष भू॒तैस्ति॑ष्ठते ह्यन्तरा॒त्मा ॥ ९ ॥

पुरु॑ष ए॒वेदं विश्वं॑ कर्म॒ त॒पो॑ ब्रह्म॒ परा॑मृतम् । एत॑द्यो वेद नि॒हि॑तं॒ गुहा॑यां सोऽवि॑द्याग्र॒न्थिं॑ विकिरती॑ह सोम्य ॥ १० ॥

द्वितीयः खण्डः

आवि॑ः सन्नि॑हितं गु॒हाच॑रं॒ नाम॑ महत्प॒द॒मत्रै॒त॒त्सम॑र्पितम् । ए॒जत्प्रा॒णन्नि॑मि॑षच्च॒ य॒देत॒ज्जा॑नथ स॒दस॒द्व॒रे॑ण्यं॒ परं॑ वि॒ज्ञाना॑द्य॒द्व॒रिष्ठं॒ प्रजा॑नाम् ॥ १ ॥

य॒दर्चि॑म॒द्य॒द॒णु॒भ्यो॑ऽणु॒ च॒ यस्मि॑ँल्लो॒का नि॑हि॑ता लो॒किन॑श्च । त॒देत॒दक्ष॑रं ब्र॒ह्म॒ स प्रा॑णस्तदु॒ वाङ्मन॑ः । तदे॑तत्स॒त्यं तदमृ॑तं तद्वे॑द्धव्यं सोम्य॑ विद्धि ॥ २ ॥

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं संधयीत । आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ ३ ॥

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ४ ॥

यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः ॥ ५ ॥

अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः । ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ॥ ६ ॥

यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः । मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥ ७ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ८ ॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ ९ ॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं

विभाति ॥ १० ॥

ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ ११ ॥

तृतीयमुण्डकम्

प्रथमः खण्डः

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ १ ॥

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ २ ॥

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ ३ ॥

प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी ।
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥ ४ ॥

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् । अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥ ५ ॥

सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः । येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ ६ ॥

बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।

दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥ ७ ॥

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। ज्ञान-प्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलंध्यायमानः ॥ ८ ॥

एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा ॥ ९ ॥

यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥ १० ॥

द्वितीयः खण्डः

स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम्। उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥ १ ॥

कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र। पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः ॥ २ ॥

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ ३ ॥

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाऽप्यलिङ्गात्। एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ॥ ४ ॥

सम्प्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः। ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ॥ ५ ॥

वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥ ६ ॥

गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ॥ ७ ॥

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥ ८ ॥

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति । तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९ ॥

तदेतदृचाऽभ्युक्तम् । क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षि श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १० ॥

तदेतत्सत्यमृषिरङ्गिराः प्रोवाच नैतदचीर्णव्रतोऽधीते । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ११ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ माण्डूक्योपनिषत् ॥

प्रथमः खण्डः

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ओमित्येतदक्षरमिदग्ं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥ १ ॥ सर्वग्ं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥ २ ॥

द्वितीयः खण्डः

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ १ ॥ स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः ॥ २ ॥ यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ ३ ॥ एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ४ ॥ नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं

न प्रज्ञं नाप्रज्ञम् । अदृष्टमव्यवहार्यमग्राह्य-मलक्षणमचिन्त्यमव्य-पदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ५ ॥

तृतीयः खण्डः

सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥ १ ॥ जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ॥ २ ॥ स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥ ३ ॥ सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदगं् सर्वमपीतिश्च भवति य एवं वेद ॥ ४ ॥

चतुर्थः खण्डः

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद य एवं वेद ॥ १ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ प्रश्नोपनिषत् ॥

प्रथमः प्रश्नः

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ १ ॥ तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥ २ ॥ अथ कबन्धी कात्यायन उपेत्य पप्रच्छ । भगवन्कुतो ह वा इमाः प्रजाः प्रजायन्त इति ॥ ३ ॥ तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत स तपस्तप्त्वा स मिथुनमुत्पादयते रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति ॥ ४ ॥ आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः ॥ ५ ॥ अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान्रश्मिषु सन्निधत्ते । यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा

दिशो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान्रश्मिषु सन्निधत्ते ॥ ६ ॥ स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते। तदेतदृचाऽभ्युक्तम् ॥ ७ ॥ विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ८ ॥ संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च । तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजयन्ते। त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते। एष ह वै रयिर्यः पितृयाणः ॥ ९ ॥ अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्याऽऽदित्यमभिजयन्ते । एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोधस्तदेष श्लोकः ॥ १० ॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥ ११ ॥ मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेते ऋषयः शुक्ल इष्टिं कुर्वन्तीतर इतरस्मिन् ॥ १२ ॥ अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते ॥ १३ ॥ अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति ॥ १४ ॥ तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते। तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ॥ १५ ॥ तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥ १६ ॥

द्वितीयः प्रश्नः

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । भगवन्कत्येव देवाः प्रजां विधारयन्ते कतर एतत्प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥ १ ॥ तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च । ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥ २ ॥ तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवै-तत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति तेऽश्रद्दधाना बभूवुः ॥ ३ ॥ सोऽभिमानादूर्ध्वमुत्क्रामत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते तस्मिगंश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठन्ते । तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते तस्मिगंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः प्राणं स्तुन्वन्ति ॥ ४ ॥ एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत् ॥ ५ ॥ अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । ऋचो यजूगंषि सामानि यज्ञः क्षत्रं ब्रह्म च ॥ ६ ॥ प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे । तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि ॥ ७ ॥ देवानामसि वह्नितमः पितृणां प्रथमा स्वधा । ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि ॥ ८ ॥ इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता । त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥ ९ ॥ यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः । आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥ १० ॥

व्रात्यस्त्वं प्राणैकर्षिरत्ता विश्वस्य सत्पतिः । वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः ॥ ११ ॥ या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि । या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः ॥ १२ ॥ प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम् । मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति ॥ १३ ॥

तृतीयः प्रश्नः

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ । भगवन्कुत एष प्राणो जायते कथमायात्यस्मिञ्छरीर आत्मानं वा प्रविभज्य कथं प्रातिष्ठते केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥ १ ॥ तस्मै स होवाचातिप्रश्नान्पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि ॥ २ ॥ आत्मन एष प्राणो जायते । यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ्छरीरे ॥ ३ ॥ यथा सम्राडेवाधिकृतान्विनियुङ्क्ते । एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वे-त्येवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते ॥ ४ ॥ पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये तु समानः । एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥ ५ ॥ हृदि ह्येष आत्मा । अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥ ६ ॥ अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥ ७ ॥ आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः । पृथिव्यां या देवता

सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानो वायुर्व्यानः ॥ ८ ॥ तेजो ह वा उदानस्तस्मादुपशान्ततेजाः । पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः ॥ ९ ॥ यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः । सहात्मना यथासङ्कल्पितं लोकं नयति ॥ १० ॥ य एवं विद्वान्प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोकः ॥ ११ ॥ उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा । अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥ १२ ॥

चतुर्थः प्रश्नः

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ । भगवन्नेतस्मिन्पुरुषे कानि स्वपन्ति कान्यस्मिञ्जाग्रति कतर एष देवः स्वप्नान्पश्यति कस्यैतत्सुखं भवति कस्मिन्नु सर्वे सम्प्रतिष्ठिता भवन्तीति ॥ १ ॥ तस्मै स होवाच । यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति । ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति । तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नाऽऽदत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥ २ ॥ प्राणाग्नय एवैतस्मिन्पुरे जाग्रति । गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः ॥ ३ ॥ यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानः । मनो ह वाव यजमान इष्टफलमेवोदानः स एनं

यजमानमहरहर्ब्रह्म गमयति ॥ ४ ॥ अत्रैष देवः स्वप्ने महिमान-मनुभवति । यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ॥ ५ ॥ स यदा तेजसाभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति ॥ ६ ॥ स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते । एवं ह वै तत्सर्वं पर आत्मनि सम्प्रतिष्ठते ॥ ७ ॥ पृथिवी च पृथिवीमात्रा चाऽऽपश्चाऽऽपोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाऽऽकाशश्चाऽऽकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चाऽऽदातव्यं चोपस्थश्चाऽऽनन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहंकारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥ ८ ॥ एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः । स परेऽक्षर आत्मनि सम्प्रतिष्ठते ॥ ९ ॥ परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य । स सर्वज्ञः सर्वो भवति । तदेष श्लोकः ॥ १० ॥ विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाऽऽविवेशेति ॥ ११ ॥

पञ्चमः प्रश्नः

अथ हैनं शैब्यः सत्यकामः पप्रच्छ । स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति। तस्मै स होवाच ॥ १ ॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः। तस्माद्विद्वानेतेनैवाऽऽयतनेनैकतरमन्वेति ॥ २ ॥ स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते । तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति ॥ ३ ॥ अथ यदि द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् । स सोमलोके विभूतिमनुभूय पुनरावर्तते ॥ ४ ॥ यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नः । यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते । तदेतौ श्लोकौ भवतः ॥ ५ ॥ तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः । क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥ ६ ॥ ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते । तमोङ्कारेणैवाऽऽयतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं चेति ॥ ७ ॥

षष्ठः प्रश्नः

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । भगवन्हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैतं प्रश्नमपृच्छत। षोडशकलं भारद्वाज

पुरुषं वेत्थ तमहं कुमारमब्रुवं नाहमिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति । समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं । स तूष्णीं रथमारुह्य प्रवव्राज । तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १ ॥ तस्मै स होवाच । इहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति ॥ २ ॥ स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥ स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः । अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च ॥ ४ ॥ स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते । एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥ ५ ॥ अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः । तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥ ६ ॥ तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद । नातः परमस्तीति ॥ ७ ॥ ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ८ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ केनोपनिषत् ॥

(सामवेदीय केनोपनिषत्)

प्रथमः खण्डः

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २ ॥ न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥ यद्वाचाऽनभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ४ ॥ यन्मनसा न मनुते येनाऽऽहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥ यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥ यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥ यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥

द्वितीयः खण्डः

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ॥ १ ॥ नाहं मन्ये सुवेदेति नो न वेदेति वेद च । यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २ ॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ ३ ॥ प्रतिबोधविदितं मतममृतत्वं हि विन्दते । आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ ४ ॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः । भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ ५ ॥

तृतीयः खण्डः

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥ १ ॥ तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्षमिति ॥ २ ॥ तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ ३ ॥ तदभ्यद्रवत्तमभ्यवदत्कोऽसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥ ४ ॥ तस्मिंगं स्त्वयि किं वीर्यमित्यपीदगं सर्वं दहेयं यदिदं पृथिव्यामिति ॥ ५ ॥ तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुम् स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ ६ ॥ अथ वायुमब्रुवन्वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ ७ ॥ तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा

वा अहमस्मीति ॥ ८ ॥ तस्मिंग्ं स्त्वयि किं वीर्यमित्युपीदग्ं सर्वमाददीयं यदिदं पृथिव्यामिति ॥ ९ ॥ तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ १० ॥ अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥ ११ ॥ स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमाग्ं हैमवतीं ताग्ं होवाच किमेतद्यक्षमिति ॥ १२ ॥

चतुर्थः खण्डः

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति ॥ १ ॥ तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ २ ॥ तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ ३ ॥ तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा ३ इतीन्न्यमीमिषदा ३ इत्यधिदैवतम् ॥ ४ ॥ अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णग्ं सङ्कल्पः ॥ ५ ॥ तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभिहैनग्ं सर्वाणि भूतानि संवाञ्छन्ति ॥ ६ ॥ उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ७ ॥ तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ८ ॥ यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥ ९ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ छान्दोग्योपनिषत् ॥

प्रथमोऽध्यायः

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

प्रथमः खण्डः [1]

ॐ इत्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥ एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः ॥ २ ॥ स एष रसानाग्ं रसतमः परमः परार्ध्योऽष्टमोऽयमुद्गीथः ॥ ३ ॥ कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ॥ ४ ॥ वागेवर्क्प्राणः सामोमित्येतदक्षरमुद्गीथः । तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च ॥ ५ ॥ तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सग्ंसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥ ६ ॥ आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ७ ॥ तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै

कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ८ ॥ तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शग्ंसत्योमित्युद्गायत्ये-तस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥ तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥ १० ॥

द्वितीयः खण्डः [2]

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैतानभिभविष्याम इति ॥ १ ॥ ते ह नासिक्यं प्राणमुद्गीथमुपासाञ्चक्रिरे तग्ं हासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः ॥ २ ॥ अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे तागंहासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥ ३ ॥ अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् ॥ ४ ॥ अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयग्ं शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥ ५ ॥ अथ ह मन उद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनो-भयग्ं सङ्कल्पयते सङ्कल्पनीयं चासङ्कल्पनीयं च पाप्मना ह्येतद्विद्धम् ॥ ६ ॥ अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तग्ं हासुरा ऋत्वा विदध्वंसुर्यथाऽश्मानमाखणमृत्वा विध्वग्ंसेत ॥ ७ ॥

एवं यथाऽश्मानमाखणमृत्वा विध्वग्ंसत एवग् हैव स विध्वग्ंसते य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ॥ ८ ॥ नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवति । एतमु एवान्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्तत इति ॥ ९ ॥ तग् ह्याङ्गिरा उद्गीथमुपासाञ्चक्र एतमु एवाऽऽङ्गिरसं मन्यतेऽङ्गानां यद्रसः ॥ १० ॥

तेन तग् ह बृहस्पतिरुद्गीथमुपासाञ्चक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पतिः ॥ ११ ॥ तेन तग् हायास्य उद्गीथमुपासाञ्चक्र एतमु एवायास्यं मन्यन्त आस्याद्यदयते ॥ १२ ॥ तेन तग् ह बको दाल्भ्यो विदाञ्चकार । स ह नैमिषीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति ॥ १३ ॥ आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥ १४ ॥

तृतीयः खण्डः [3]

अथाधिदैवतम् य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति । उद्यग्ंस्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥ १ ॥ समान उ एवायं चासौ चोष्णो ऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिममुं चोद्गीथमुपासीत ॥ २ ॥ अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः ।

अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक् । तस्मादप्राणन्ननपानन्वाचमभिव्याहरति ॥ ३ ॥ या वाक्सर्क्तस्माद-प्राणन्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्ननपानन्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति ॥ ४ ॥ अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाऽग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानगंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ५ ॥

अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदगं् सर्वगं् स्थितम् ॥ ६ ॥ द्यौरेवोदन्तरिक्षं गीः पृथिवी थमादित्य एवोद्वायुर्गीरग्निस्थगं् सामवेद एवोद्यजुर्वेदो गीः ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येवं विद्वानु-द्गीथाक्षराण्युपास्त उद्गीथ इति ॥ ७ ॥ अथ खल्वाशीःसमृद्धिरुपस-रणानीत्युपासीत । येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेत् ॥ ८ ॥ यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ॥ ९ ॥ येनच्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तगं् स्तोममुपधावेत् ॥ १० ॥

यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेत् ॥ ११ ॥ आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृद्ध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ १२ ॥

चतुर्थः खण्डः [4]

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥ देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशाग्ंस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयग्ंस्तच्छन्दसां छन्दस्त्वम् ॥ २ ॥ तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि । ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥ ३ ॥ यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवग्ं सामैवं यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभया अभवन् ॥ ४ ॥ स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरग्ं स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ॥ ५ ॥

पञ्चमः खण्डः [5]

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥ १ ॥ एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीग्ंस्त्वं पर्यावर्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥ २ ॥ अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥ ३ ॥ एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाग्ंस्त्वं भूमानमभिगायताद्बहवो वै मे भविष्यन्तीति ॥ ४ ॥ अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरतीत्यनुसमाहरतीति ॥ ५ ॥

षष्ठः खण्डः [6]

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढगं् साम तस्मादृच्यध्यूढगं् साम गीयत इयमेव साऽग्निरमस्तत्साम ॥ १ ॥ अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्यामृच्यध्यूढगं् साम तस्मादृच्यध्यूढगं् साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम ॥ २ ॥ द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढगं् साम तस्मादृच्यध्यूढगं् साम गीयते द्यौरेव साऽऽदित्योऽमस्तत्साम ॥ ३ ॥ नक्षत्राण्येवर्क् चन्द्रमाः साम तदेतदेतस्यामृच्यध्यूढगं् साम तस्मादृच्यध्यूढगं् साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ॥ ४ ॥ अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढगं् साम तस्मादृच्यध्यूढगं् साम गीयते ॥ ५ ॥ अथ यदैवैतदादित्यस्य शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्सामाथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः ॥ ६ ॥ तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद ॥ ७ ॥ तस्यर्क् च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥ ८ ॥

सप्तमः खण्डः [7]

अथाध्यात्मं वागेवर्क् प्राणः साम तदेतदेतस्यामृच्यध्यूढगं् साम तस्मादृच्यध्यूढगं् साम गीयते । वागेव सा प्राणो

ऽमस्तत्साम ॥ १ ॥ चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढग्ं साम तस्मादृच्यध्यूढग्ं साम गीयते । चक्षुरेव साऽऽत्मा ऽमस्तत्साम ॥ २ ॥ श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृच्यध्यूढग्ं साम तस्मादृच्यध्यूढग्ं साम गीयते । श्रोत्रमेव सा मनो ऽमस्तत्साम ॥ ३ ॥ अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढग्ं साम तस्मादृच्यध्यूढग्ं साम गीयते । अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥ ४ ॥ अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥ ५ ॥ स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः ॥ ६ ॥ अथ य एतदेवं विद्वान्साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्तागंश्चाप्नोति देवकामागंश्च ॥ ७ ॥ अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्तागंश्चाप्नोति मनुष्यकामागंश्च तस्मादुहैवंविदुद्गाता ब्रूयात् ॥ ८ ॥ कं ते काममागायानीत्येष ह्येव कामगानस्येष्टे य एवं विद्वान्साम गायति साम गायति ॥ ९ ॥

अष्टमः खण्डः [8]

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो

हन्तोद्गीथे कथां वदाम इति ॥ १ ॥ तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचगं् श्रोष्यामीति ॥ २ ॥ स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच ॥ ३ ॥ का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ॥ ४ ॥ अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकगं् सामाभिसंस्थापयामः स्वर्गसगं्स्तावगं् हि सामेति ॥ ५ ॥ तगं्ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥ ६ ॥ हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकगं्सामाभिसगं्स्थापयामः प्रतिष्ठासगं्स्तावगं् हि सामेति ॥ ७ ॥ तगं् ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच ॥ ८ ॥

नवमः खण्डः [9]

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो

ह्येवैभ्यो ज्यायानाकाशः परायणम् ॥ १ ॥ स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्परोवरीयाग्ंसमुद्गीथमुपास्ते ॥ २ ॥ तग्ं हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति ॥ ३ ॥ तथाऽमुष्मिँल्लोके लोक इति स य एतदेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथाऽमुष्मिँल्लोके लोक इति लोके लोक इति ॥ ४ ॥

दशमः खण्डः [10]

मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ १ ॥ स हेभ्यं कुल्माषान्खादन्तं बिभिक्षे तग्ं होवाच । नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति ॥ २ ॥ एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतग्ं स्यादिति होवाच ॥ ३ ॥ न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति ॥ ४ ॥ स ह खादित्वाऽतिशेषाञ्जायाया आजहार साऽग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ ॥ ५ ॥ स ह प्रातः सञ्जिहान उवाच यद्धतान्नस्य लभेमहि लभेमहि धनमात्रागं् राजाऽसौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति ॥ ६ ॥ तं जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वाऽमुं यज्ञं विततमेयाय ॥ ७ ॥ तत्रोद्गातृ

नास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच ॥ ८ ॥ प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥ ९ ॥ एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति ॥ १० ॥ एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णी-मासाञ्चक्रिरे ॥ ११ ॥

एकादशः खण्डः [11]

अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच ॥ १ ॥ स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्त्वाऽन्यानवृषि ॥ २ ॥ भगवाग्ंस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह यजमान उवाच ॥ ३ ॥ अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ४ ॥ प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिह ते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ५ ॥ अथ हैनमुद्गातोपससादोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ६ ॥ आदित्य इति होवाच

सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यत्त-थोक्तस्य मयेति ॥ ७ ॥ अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ८ ॥ अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥ ९ ॥

द्वादशः खण्डः [12]

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्ववाज ॥ १ ॥ तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ॥ २ ॥ तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ॥ ३ ॥ ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः सगंरब्धाः सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य हिं चक्रुः ॥ ४ ॥ ओ ३ मदा ३ मों ३ पिबा ३ मों ३ देवो वरुणः प्रजापतिः सविता २ ऽन्नमिहा २ हरदन्नपते ३ ऽन्नमिहा २ हरा २ हरो ३ मिति ॥ ५ ॥

त्रयोदशः खण्डः [13]

अयं वाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकारः । आत्मेहकारोऽग्निरीकारः ॥ १ ॥ आदित्य ऊकारो निहव एकारो

विश्वेदेवा औहोयिकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् ॥ २ ॥ अनिरुक्तस्त्रयोदशः स्तोभः सञ्चरो हुङ्कारः ॥ ३ ॥ दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवग्ं साम्नामुपनिषदं वेदोपनिषदं वेद इति ॥ ४ ॥

द्वितीयोऽध्यायः

प्रथमः खण्डः [1]

ॐ । समस्तस्य खलु साम्न उपासनग्ं साधु यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति ॥ १ ॥ तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्य साधुनैनमुपागादित्येव तदाहुः ॥ २ ॥ अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ॥ ३ ॥ स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनग्ं साधवो धर्मा आ च गच्छेयुरुप च नमेयुः ॥ ४ ॥

द्वितीयः खण्डः [2]

लोकेषु पञ्चविधग्ं सामोपासीत पृथिवी हिङ्कारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥ १ ॥ अथावृत्तेषु द्यौर्हिंकार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ॥ २ ॥ कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवंविद्वाँल्लोकेषु पञ्चविधं सामोपास्ते ॥ ३ ॥

तृतीयः खण्डः [3]

वृष्टौ पञ्चविधगं् सामोपासीत पुरोवातो हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहारः ॥ १ ॥ उद्गृह्णाति तन्निधनम् वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पञ्चविधगं् सामोपास्ते ॥ २ ॥

चतुर्थः खण्ड : [4]

सर्वास्वप्सु पञ्चविधगं् सामोपासीत मेघो यत्संप्लवते स हिङ्कारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥ १ ॥ न हाप्सु प्रैत्यप्सुमान्भवति य एतदेवं विद्वान्सर्वास्वप्सु पञ्चविधगं् सामोपास्ते ॥ २ ॥

पञ्चमः खण्ड : [5]

ऋतुषु पञ्चविधगं् सामोपासीत वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम् ॥ १ ॥ कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवं विद्वानृतुषु पञ्चविधगं् सामोपास्ते ॥ २ ॥

षष्ठः खण्ड : [6]

पशुषु पञ्चविधगं् सामोपासीताजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥ १ ॥ भवन्ति हास्य पशवः पशुमान्भवति य एतदेवं विद्वान्पशुषु पञ्चविधगं् सामोपास्ते ॥ २ ॥

सप्तमः खण्ड : [7]

प्राणेषु पञ्चविधगं् परोवरीयः सामोपासीत प्राणो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयागं्सि

वा एतानि ॥ १ ॥ परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्प्राणेषु पञ्चविधगं् परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥ २ ॥

अष्टमः खण्ड : [8]

अथ सप्तविधस्य वाचि सप्तविधगं् सामोपासीत यत्किञ्च वाचो हुं ३ इति स हिङ्कारो यत्प्रेति स प्रस्तावो यदेति स आदिः ॥ १ ॥ यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् ॥ २ ॥ दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधगं् सामोपास्ते ॥ ३ ॥

नवमः खण्ड : [9]

अथ खल्वमुमादित्यगं् सप्तविधगं् सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम ॥ १ ॥ तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिङ्कारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति हिङ्कारभाजिनो ह्येतस्य साम्नः ॥ २ ॥ अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशगं्साकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः ॥ ३ ॥ अथ यत्सङ्गववेलायागं् स आदिस्तदस्य वयागं्स्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः ॥ ४ ॥ अथ यत्संप्रति मध्यन्दिने स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः

प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥ ५ ॥ अथ यदूर्ध्वं मध्यन्दिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः ॥ ६ ॥ अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षगं् श्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः ॥ ७ ॥ अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यगं् सप्तविधगं् सामोपास्ते ॥ ८ ॥

दशमः खण्ड : [10]

अथ खल्वात्मसम्मितमतिमृत्यु सप्तविधगं् सामोपासीत हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्सममं् ॥ १ ॥ आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्सममं् ॥ २ ॥ उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्सममं् ॥ ३ ॥ निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वा एतानि द्वाविगं्शतिरक्षराणि ॥ ४ ॥ एकविगं्शत्या ऽऽदित्यमाप्नोत्येकविगं्शो वा इतोऽसावादित्यो द्वाविगं्शेन परमादित्याज्जयति तन्नाकं तद्विशोकम् ॥ ५ ॥ आप्नोति हादित्यस्य जयं परो हास्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसम्मितमतिमृत्यु सप्तविधगं् सामोपास्ते सामोपास्ते ॥ ६ ॥

एकादशः खण्ड : [11]

मनो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो

निधनमेतद्गायत्रं प्राणेषु प्रोतम् ॥ १ ॥ स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या महामनाः स्यात्तद्व्रतम् ॥ २ ॥

द्वादशः खण्ड : [12]

अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनग्ं सग्ंशाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम् ॥ १ ॥ स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥ २ ॥

त्रयोदशः खण्ड : [13]

उपमन्त्रयते स हिङ्कारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् ॥ १ ॥ स य एवमेत-द्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न काञ्चन परिहरेत्तद्व्रतम् ॥ २ ॥

चतुर्दशः खण्ड : [14]

उद्यन्हिङ्कार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेतद्बृहदादित्ये प्रोतम् ॥ १ ॥ स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्व्यन्नादो भवति सर्वमायुरेति

ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या तपन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

पञ्चदशः खण्डः [15]

अभ्राणि संप्लवन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम् ॥ १ ॥ स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपाग्ंश्च सुरूपाग्ंश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

षोडशः खण्ड : [16]

वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् ॥ १ ॥ स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्यर्तून्न निन्देत्तद्व्रतम् ॥ २ ॥

सप्तदशः खण्ड : [17]

पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः ॥ १ ॥ स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकीभवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् ॥ २ ॥

अष्टादशः खण्ड : [18]

अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो

निधनमेता रेवत्यः पशुषु प्रोताः ॥ १ ॥ स यं एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् ॥ २ ॥

एकोनविंशः खण्डः [19]

लोम हिङ्कारस्त्वक्प्रस्तावो मार्ग्ंसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् ॥ १ ॥ स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गीभवति नाङ्गेन विहूर्च्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ञो नाश्नीयात्तद्व्रतं मज्ञो नाश्नीयादिति वा ॥ २ ॥

विंशः खण्ड : [20]

अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम् ॥ १ ॥ स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानाग्ं सलोकताग्ं सार्ष्टिताग्ं सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् ॥ २ ॥

एकविंशः खण्ड : [21]

त्रयी विद्या हिङ्कारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाग्ंसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम् ॥ १ ॥ स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्वग्ं ह भवति ॥ २ ॥ तदेष श्लोकः । यानि

पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति ॥ ३ ॥ यस्तद्वेद स वेद सर्वग्ं सर्वा दिशो बलिमस्मै हरन्ति सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम् ॥ ४ ॥

द्वाविंशः खण्ड : [22]

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत् ॥ १ ॥ अमृतत्वं देवेभ्य आगायानीत्यागायेत् स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत ॥ २ ॥ सर्वे स्वरा इन्द्रस्यात्मानः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रग्ं शरणं प्रपन्नोऽभूवं स त्वा प्रतिवक्ष्यतीत्येनं ब्रूयात् ॥ ३ ॥ अथ यद्येनमूष्मसूपालभेत प्रजापतिग्ं शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयादथ यद्येनग्ं स्पर्शेषूपालभेत मृत्युग्ं शरणं प्रपन्नोऽभूवं स त्वा प्रतिधक्ष्यतीत्येनं ब्रूयात् ॥ ४ ॥ सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृत्ता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥ ५ ॥

त्रयोविंशः खण्ड : [23]

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो

ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसग्ंस्थोऽमृतत्वमेति ॥ १ ॥ प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति ॥ २ ॥ तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओङ्कारः संप्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोङ्कारेण सर्वा वाक् संतृण्णोङ्कार एवेदग्ं सर्वमोङ्कार एवेदग्ं सर्वम् ॥ ३ ॥

चतुर्विंशः खण्ड : [24]

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनग्ं रुद्राणां माध्यन्दिनग्ं सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् ॥ १ ॥ क्व तर्हि यजमानस्य लोक इति स यस्तन्न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात् ॥ २ ॥ पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवग्ं सामाभिगायति ॥ ३ ॥ लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयग्ं रा ३ ३ ३ ३ ३ हुं ३ आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ ४ ॥ अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ ५ ॥ अत्र यजमानः परस्तादायुषः स्वाहाऽपजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनग्ं संप्रयच्छन्ति ॥ ६ ॥ पुरा माध्यन्दिनस्य

सवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रगं् सामाभिगायति ॥ ७ ॥ लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयं वैरा ३ ३ ३ ३ ३ हुं ३ आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ ८ ॥ अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ ९ ॥ अत्र यजमानः परस्तादायुषः स्वाहाऽपजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यन्दिनगं् सवनगं् संप्रयच्छन्ति ॥ १० ॥

पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपविश्य स आदित्यगं् स वैश्वदेवगं् सामाभिगायति ॥ ११ ॥ लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयगं् स्वारा ३ ३ ३ ३ ३ हुं ३ आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ १२ ॥ आदित्यमथ वैश्वदेवं लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयगं् साम्ना ३ ३ ३ ३ ३ हुं ३ आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ १३ ॥ अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दत ॥ १४ ॥ एष वै यजमानस्य लोक एतास्म्यत्र यजमानः परस्तादायुषः स्वाहाऽपहत परिघमित्युक्त्वोत्तिष्ठति ॥ १५ ॥ तस्मा आदित्याश्च विश्वे च देवास्तृतीयं सवनगं् संप्रयच्छन्त्येष ह वै यज्ञस्य मात्रां वेद य एवं वेद य एवं वेद ॥ १६ ॥

तृतीयोऽध्यायः

प्रथमः खण्डः [1]

ॐ । असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवगंशो ऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥ १ ॥ तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः । ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ॥ २ ॥ एतमृग्वेदमभ्यतपग्ं स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यग्ं रसोऽजायत ॥ ३ ॥ तद्वयक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितग्ं रूपम् ॥ ४ ॥

द्वितीयः खण्ड : [2]

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूगंष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः ॥ १ ॥ तानि वा एतानि यजूगंष्येतं यजुर्वेदमभ्यतपग्ंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत ॥ २ ॥ तद्वयक्षरत्तदादित्यमभितो ऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लग्ं रूपम् ॥ ३ ॥

तृतीयः खण्ड : [3]

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः ॥ १ ॥ तानि वा एतानि सामान्येतग्ं सामवेदमभ्यतपग्ंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यग्ं रसोऽजायत ॥ २ ॥ तद्वयक्षरत्तदा-दित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णग्ं रूपम् ॥ ३ ॥

चतुर्थः खण्ड : [4]

अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्यो ऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ॥ १ ॥ ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपगं्स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यगं् रसोऽजायत ॥ २ ॥ तद्व्यक्षरत्तदा-दित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णगं् रूपम् ॥ ३ ॥

पञ्चमः खण्ड : [5]

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपः ॥ १ ॥ ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपगं्स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यगं् रसोऽजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितो ऽश्रयत्तद्वा एतद्यदेतदादित्यस्य मध्ये क्षोभत इव ॥ ३ ॥ ते वा एते रसानागं् रसा वेदा हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥ ४ ॥

षष्ठः खण्ड : [6]

तद्यत्प्रथममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यः

पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यगं् स्वाराज्यं पर्येता ॥ ४ ॥

सप्तमः खण्ड : [7]

अथ यद्द्वितीयममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यगं् स्वाराज्यं पर्येता ॥ ४ ॥

अष्टमः खण्ड : [8]

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेता ऽऽदित्यानामेव तावदाधिपत्यगं् स्वाराज्यं पर्येता ॥ ४ ॥

नवमः खण्ड : [9]

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा

अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यगं् स्वाराज्यं पर्येता ॥ ४ ॥

दशमः खण्ड : [10]

अथ यत्पञ्चममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥ स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्वउदेतार्वाङ्स्तमेता साध्यानामेव तावदाधिपत्यगं् स्वाराज्यं पर्येता ॥ ४ ॥

एकादशः खण्ड : [11]

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदेष श्लोकः ॥ १ ॥ न वै तत्र न निम्लोच नोदियाय कदाचन । देवास्तेनाहगं् सत्येन मा विराधिषि ब्रह्मणेति ॥ २ ॥ न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ॥ ३ ॥ तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे

मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥ ४ ॥ इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वाऽन्तेवासिने ॥ ५ ॥ नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति ॥ ६ ॥

द्वादशः खण्ड : [12]

गायत्री वा इदग्ं सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदग्ं सर्वं भूतं गायति च त्रायते च ॥ १ ॥ या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्याग्ं हीदग्ं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥ २ ॥ या वै सा पृथिवीयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ ३ ॥ यद्वै तत्पुरुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ ४ ॥ सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् ॥ ५ ॥ तावानस्य महिमा ततो ज्यायाग्ंश्च पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ॥ ६ ॥ यद्वै तद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः ॥ ७ ॥ अयं वाव स योऽयमन्तः पुरुष आकाशो यो वै सोऽन्तःपुरुष आकाशः ॥ ८ ॥ अयं वाव स योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनीग्ं श्रियं लभते य एवं वेद ॥ ९ ॥

त्रयोदशः खण्ड : [13]

तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद ॥ १ ॥ अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रग्ं स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवं वेद ॥ २ ॥ अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक् सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद ॥ ३ ॥ अथ योऽस्योदङ् सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भवति य एवं वेद ॥ ४ ॥ अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद ॥ ५ ॥ ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥ ६ ॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः ॥ ७ ॥ तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे सग्ंस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपश्रृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद ॥ ८ ॥

चतुर्दशः खण्ड : [14]

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीताथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ॥ १ ॥ मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तो ऽवाक्यनादरः ॥ २ ॥ एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा एष म आत्मा ऽन्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः ॥ ३ ॥ सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसम्भविताऽस्मीति यस्य स्यादद्धा न विचिकित्साऽस्तीति ह स्माऽऽह शाण्डिल्यः शाण्डिल्यः ॥ ४ ॥

पञ्चदशः खण्ड : [15]

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलगं् स एष कोशो वसुधानस्तस्मिन्विश्वमिदगं् श्रितम् ॥ १ ॥ तस्य प्राची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदगं् रोदिति सोऽहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदगं् रुदम् ॥ २ ॥ अरिष्टं कोशं प्रपद्येऽमुनाऽमुनाऽमुना प्राणं प्रपद्येऽमुनाऽमुनाऽमुना भूः प्रपद्येऽमुनाऽमुनाऽमुना भुवः प्रपद्ये

ऽमुनाऽमुनाऽमुना स्वः प्रपद्येऽमुनाऽमुनाऽमुना ॥ ३ ॥ स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदग्ं सर्वं भूतं यदिदं किञ्च तमेव तत्प्रापत्सि ॥ ४ ॥ अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्ये ऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥ ५ ॥ अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥ ६ ॥ अथ यदवोचग्ं स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥ ७ ॥

षोडशः खण्डः [16]

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विग्ंशति वर्षाणि तत्प्रातःसवनं चतुर्विग्ंशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीदग्ं सर्वं वासयन्ति ॥ १ ॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा वसव इदं मे प्रातःसवनं माध्यन्दिनग्ं सवनमनुसन्तनुतेति माऽहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ २ ॥ अथ यानि चतुश्चत्वारिग्ंशद्वर्षाणि तन्माध्यन्दिनग्ं सवनं चतुश्चत्वारिग्ंशदक्षरा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनग्ं सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदग्ं सर्वग्ं रोदयन्ति ॥ ३ ॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे माध्यन्दिनग्ं सवनं तृतीयसवनमनुसन्तनुतेति माऽहं प्राणानाग्ं रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह

भवति ॥ ४ ॥ अथ यान्यष्टाचत्वारिगं्शद्वर्षाणि तत्तृतीय सवनमष्टाचत्वारिगं्शदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वा वादित्या एते हीदगं् सर्वमाददते ॥ ५ ॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात् प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसन्तनुतेति माऽहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥ ६ ॥ एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत्प्र ह षोडशं वर्षशतं जीवति य एवं वेद ॥ ७ ॥

सप्तदशः खण्डः [17]

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः ॥ १ ॥ अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥ २ ॥ अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ॥ ३ ॥ अथ यत्तपो दानमार्जवमहिगं्सा सत्यवचनमिति ता अस्य दक्षिणाः ॥ ४ ॥ तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवास्यावभृथः ॥ ५ ॥ तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रा योक्त्वोवाचाऽपिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसगं्शितमसीति तत्रैते द्वे ऋचौ भवतः ॥ ६ ॥ आदित्प्रत्नस्य

रेतसः ॥ ७ ॥ उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरं स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ ८ ॥

अष्टादशः खण्डः [18]

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ १ ॥ तदेतच्चतुष्पाद्ब्रह्म वाक् पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतमग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ॥ २ ॥ वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ३ ॥ प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ४ ॥ चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ५ ॥ श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ ६ ॥

एकोनविंशः खण्डः [19]

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत् तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत

तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् ॥ १ ॥ तद्यद्रजतग्ं सेयं पृथिवी यत्सुवर्णग्ं सा द्यौर्यज्जरायु ते पर्वता यदुल्बग्ं स मेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकग्ं स समुद्रः ॥ २ ॥ अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्सर्वाणि च भूतानि सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवो ऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे चैव कामाः ॥ ३ ॥ स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनग्ं साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन् ॥ ४ ॥

चतुर्थोऽध्यायः

प्रथमः खण्डः [1]

ॐ । जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत आवसथान्मापयाञ्चक्रे सर्वत एव मेऽत्स्यन्तीति ॥ १ ॥ अथ ह हग्ंसा निशायामतिपेतुस्तद्धैवग्ं हग्ंसो हग्ंसमभ्युवाद भो भो हि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीदिति ॥ २ ॥ तमु ह परः प्रत्युवाच कम्वर एनमेतत्सन्तग्ं सयुग्वानमिव रैक्वमात्थेति यो नु कथग्ं सयुग्वा रैक्व इति ॥ ३ ॥ यथा कृतायविजितायाधरेऽयाः संयन्त्येवमेनग्ं सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥ ४ ॥ तदु ह जानश्रुतिः

पौत्रायण उपशुश्राव स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु कथग् सयुग्वा रैक्व इति ॥ ५ ॥ यथा कृतायविजितायाधरेऽयाः संयन्त्येवमेनग् सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥ ६ ॥ स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय तग् होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छेति ॥ ७ ॥ सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश तग् हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्व इत्यहग् ह्वरा३ इति ह प्रतिजज्ञे स ह क्षत्ताऽविदमिति प्रत्येयाय ॥ ८ ॥

द्वितीयः खण्डः [2]

तदु ह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे तग् हाभ्युवाद ॥ १ ॥ रैक्वेमानि षट् शतानि गवामयं निष्कोऽयमश्वतरीरथोऽनु म एतां भगवो देवतागं् शाधि यां देवतामुपास्स इति ॥ २ ॥ तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति तदु ह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥ ३ ॥ तग् हाभ्युवाद रैक्वेदग् सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायाऽयं ग्रामो यस्मिन्नास्सेऽन्वेव मा भगवः शाधीति ॥ ४ ॥ तस्या ह मुखमुपोद्गृह्यानुवाचाजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति ते हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवास तस्मै होवाच ॥ ५ ॥

तृतीयः खण्डः [3]

वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ॥ १ ॥ यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवतम् ॥ २ ॥ अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणगं् श्रोत्रं प्राणं मनः प्राणो ह्येवैतान्सर्वान्संवृङ्क्त इति ॥ ३ ॥ तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥ ४ ॥ अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः ॥ ५ ॥ स होवाच महात्मनश्चतुरो देव एकः कः सः जगार भुवनस्य गोपास्तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन्बहुधा वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ॥ ६ ॥ तदुह शौनकः कापेयः प्रतिमन्वानः प्रत्येयायात्मा देवानां जनिता प्रजानागं् हिरण्यदगंष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्तीति वै वयं ब्रह्मचारिन्नेदमुपास्महे दत्तास्मै भिक्षामिति ॥ ७ ॥ तस्मा उ ह ददुस्ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतं तस्मात्सर्वासु दिक्ष्वन्नमेव दश कृतगं् सैषा विराडन्नादी तयेदगं् सर्वं दृष्टगं् सर्वमस्येदं दृष्टं भवत्यन्नादो भवति य एवं वेद य एवं वेद ॥ ८ ॥

चतुर्थः खण्डः [4]

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे ब्रह्मचर्यं

भवति विवॅत्स्यामि किंगोत्रो न्वहमस्मीति ॥ १ ॥ सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साऽहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति ॥ २ ॥ स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ॥ ३ ॥ तग्ं होवाच किंगोत्रो नु सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरग्ं सा मा प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साऽहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहग्ं सत्यकामो जाबालोऽस्मि भो इति ॥ ४ ॥ तग्ंहोवाच नैतदब्राह्मणो विवक्तुमर्हति समिधग्ं सोम्याहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तेयेति स ह वर्षगणं प्रोवास ता यदा सहस्रग्ं सम्पेदुः ॥ ५ ॥

पञ्चमः खण्डः [5]

अथ हैनमृषभोऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य सहस्रग्ं स्मः प्रापय न आचार्यकुलम् ॥ १ ॥ ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः

प्रकाशवान्नाम ॥ २ ॥ स य एतमेवं विद्वाग्ंश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वाग्ंश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३ ॥

षष्ठः खण्डः [6]

अग्निष्टे पादं वक्तेति सह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तमग्निरभ्युवाद सत्यकाम ३ इति भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कलाऽन्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ऽनन्तवान्नाम ॥ ३ ॥ स य एतमेवं विद्वाग्ंश्चतुष्कलं पादं ब्रह्मणो ऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति य एतमेवं विद्वाग्ंश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ॥ ४ ॥

सप्तमः खण्डः [7]

हग्ंसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तग्ं हग्ंस उपनिपत्याभ्युवाद सत्यकाम ३ इति भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाचाग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो

ब्रह्मणो ज्योतिष्मान्नाम ॥ ३ ॥ स य एतमेवं विद्वाग्ं्श्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वाग्ं्श्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ४ ॥

अष्टमः खण्डः [8]

मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम ३ इति भगव इति तं प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नाम ॥ ३ ॥ स य एतमेवं विद्वाग्ं्श्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिँल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवं विद्वाग्ं्श्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥ ४ ॥

नवमः खण्डः [9]

प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥ १ ॥ ब्रह्मविदिव वै सोम्य भासि को नु त्वाऽनुशशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवाग्ंस्त्वेव मे कामे ब्रूयात् ॥ २ ॥ श्रुतग्ं् ह्येव मे भगवद्दृशेभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवोवाचात्र ह न किञ्चन वीयायेति वीयायेति ॥ ३ ॥

दशमः खण्डः [10]

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादश वर्षाण्यग्नीन्परिचचार स ह स्मान्यानन्तेवासिनः समावर्तयगंस्तगं् ह स्मैव न समावर्तयति ॥ १ ॥ तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्पर्यचारीन्मा त्वाग्नयः परिप्रवोचन् प्रब्रूह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे ॥ २ ॥ स ह व्याधिनाऽनशितुं दध्रे तमाचार्यजायोवाच ब्रह्मचारिन्नशान किन्नु नाश्नासीति स होवाच बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि नाशिष्यामीति ॥ ३ ॥ अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥ ४ ॥ स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः ॥ ५ ॥

एकादशः खण्डः [11]

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकीभवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामो ऽस्मिगंश्च लोकेऽमुष्मिगंश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥

द्वादशः खण्डः [12]

अथ हैनमन्वाहार्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा

इति य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिगंश्च लोकेऽमुष्मिगंश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥

त्रयोदशः खण्डः [13]

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामो ऽस्मिगंश्च लोकेऽमुष्मिगंश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥

चतुर्दशः खण्डः [14]

ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्याऽऽत्मविद्याऽऽचार्यस्तु ते गतिं वक्तेत्याजगाम हास्याऽऽचार्यस्तमाचार्योऽभ्युवादोपकोसल ३ इति ॥ १ ॥ भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वाऽनुशशासेति को नु मानुशिष्याद्भो इतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इतीहाग्नीनभ्यूदे किं नु सोम्य किल तेऽवोचन्निति ॥ २ ॥ इदमिति ह प्रतिजज्ञे लोकान्वाव किल सोम्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै होवाच ॥ ३ ॥

पञ्चदशः खण्डः [15]

य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृत-मभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति ॥ १ ॥ एतग्ं संयद्वाम इत्याचक्षत एतग्ं हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद ॥ २ ॥ एष उ एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद ॥ ३ ॥ एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद ॥ ४ ॥ अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसम्भवन्त्यर्चिषो ऽहरन्ह आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासाग्ं स्तान्मासेभ्यः संवत्सरग्ंसंवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नाऽऽवर्तन्ते नाऽऽवर्तन्ते ॥ ५ ॥

षोडशः खण्डः [16]

एष ह वै यज्ञो योऽयं पवत एष ह यन्निदग्ं सर्वं पुनाति यदेष यन्निदग्ं सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी ॥ १ ॥ तयोरन्यतरां मनसा सग्ंस्करोति ब्रह्मा वाचा होताध्वर्युरुद्गाताऽन्यतराग्ं स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति ॥ २ ॥ अन्यतरामेव वर्तनीग्ं सग्ंस्करोति हीयतेऽन्यतरा स यथैकपाद्व्रजन्नथो वैकेन चक्रेण

वर्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञगं् रिष्यन्तं यजमानोऽनुरिष्यति स इष्ट्वा पापीयान् भवति ॥ ३ ॥ अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यववदत्युभे एव वर्तनी सगं्स्कुर्वन्ति न हीयतेऽन्यतरा ॥ ४ ॥ स यथोभयपाद्रजन्नथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति स इष्ट्वा श्रेयान्भवति ॥ ५ ॥

सप्तदशः खण्डः [17]

प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानागं् रसान्प्रावृहदग्निं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः ॥ १ ॥ स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानागं् रसान्प्रावृहदग्नेर्ऋचो वायोर्यजूगंषि सामान्यादित्यात् ॥ २ ॥ स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः ॥ ३ ॥ तद्यदृक्तो रिष्येद्भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टगं् सन्दधाति ॥ ४ ॥ अथ यदि यजुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयाद्यजुषामेव तद्रसेन यजुषां वीर्येण यजुषां यज्ञस्य विरिष्टगं् सन्दधाति ॥ ५ ॥ अथ यदि सामतो रिष्येत्स्वः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टगं् सन्दधाति ॥ ६ ॥ तद्यथा लवणेन सुवर्णगं् सन्दध्यात्सुवर्णेन रजतगं् रजतेन त्रपु त्रपुणा

सीसगं् सीसेन लोहं लोहेन दारु दारु चर्मणा ॥ ७ ॥ एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्येण यज्ञस्य विरिष्टगं् सन्दधाति भेषजकृतो ह वा एष यज्ञो यत्रैवंविद्ब्रह्मा भवति ॥ ८ ॥ एष ह वा उदक्प्रवणो यज्ञो यत्रैवंविद्ब्रह्मा भवत्येवंविदगं् ह वा एषा ब्रह्माणमनुगाथा यतो यत आवर्तते तत्तद्गच्छति ॥ ९ ॥ मानवो ब्रह्मैवैक ऋत्विक्कुरून्श्चाभिरक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानगं् सर्वागं्श्चर्त्विजोऽभिरक्षति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ॥ १० ॥

पञ्चमोऽध्यायः

प्रथमः खण्डः [1]

ॐ । यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥ १ ॥ यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः ॥ २ ॥ यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिगं्श्च लोकेऽमुष्मिगं्श्च चक्षुर्वाव प्रतिष्ठा ॥ ३ ॥ यो ह वै सम्पदं वेद सगं्हास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रं वाव सम्पत् ॥ ४ ॥ यो ह वा आयतनं वेदायतनगं् ह स्वानां भवति मनो ह वा आयतनम् ॥ ५ ॥ अथ ह प्राणा अहगं्श्रेयसि व्यूदिरेऽहगं् श्रेयानस्म्यहगं् श्रेयानस्मीति । ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति ॥ ६ ॥ तान् होवाच यस्मिन् व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति ॥ ७ ॥ सा ह वागुच्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते

मज्जीवितुमिति यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तःश्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥ ८ ॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथान्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रगं् होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥ १० ॥

मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥ ११ ॥ अथ ह प्राण उच्चिक्रमिषन्स यथा सुहयः षड्वीशशङ्कून्संखिदे-देवमितरान्प्राणान्समखिदत्तगं् हाभिसमेत्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ॥ १२ ॥ अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठोऽस्मि त्वं तत्प्रतिष्ठाऽसीति ॥ १३ ॥ अथ हैनगं् श्रोत्रमुवाच यदहगं् सम्पदस्मि त्वं तत्सम्पदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥ १४ ॥ न वै वाचो न चक्षूगंषि न श्रोत्राणि न मनागंसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवति ॥ १५ ॥

द्वितीयः खण्डः [2]

सहोवाच किं मेऽन्नं भविष्यतीति यत्किञ्चिदिदमाश्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किञ्चनानन्नं भवतीति ॥ १ ॥ स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो ह भवति ॥ २ ॥ तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ३ ॥ अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् ॥ ४ ॥ वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्सम्पदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् ॥ ५ ॥ अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदगं् स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यगं् श्रैष्ठ्यगं् राज्यमाधिपत्यं गमयत्वहमेवेदगं् सर्वमसानीति ॥ ६ ॥ अथ खल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य

भोजनमित्याचामति श्रेष्ठगं् सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति ॥ ७ ॥ निर्णिज्य कगं्सं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात् ॥ ८ ॥ तदेष श्लोकः । यदा कर्मसु काम्येषु स्त्रियगं् स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्ननिदर्शने ॥ ९ ॥

तृतीयः खण्डः [3]

श्वेतकेतुर्हारुणेयः पञ्चालानागं् समितिमेयाय तगं् ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाऽशिषत्पितेत्यनु हि भगव इति ॥ १ ॥ वेत्थ यदितोऽधि प्रजाः प्रयन्तीति न भगव इति वेत्थ यथा पुनरावर्तन्ता ३ इति न भगव इति वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना ३ इति न भगव इति ॥ २ ॥ वेत्थ यथासौ लोको न सम्पूर्यत ३ इति न भगव इति वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति नैव भगव इति ॥ ३ ॥ अथानु किमनुशिष्टोऽवोचथा यो हीमानि न विद्यात्कथगं् सोऽनुशिष्टो ब्रुवीतेति स हायस्तः पितुरर्धमेयाय तगं् होवाचाऽननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाऽशिषमिति ॥ ४ ॥ पञ्च मा राजन्यबन्धुः प्रश्नानप्राक्षीत्तेषां नैकञ्चनाशकं विवक्तुमिति स होवाच यथा मा त्वं तदैतानवदो यथाहमेषां नैकञ्चन वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति ॥ ५ ॥ स ह गौतमो राज्ञोऽर्धमेयाय तस्मै ह

प्राप्तायार्हां चकार स ह प्रातः सभाग उदेयाय तगं् होवाच मानुषस्य भगवन् गौतम वित्तस्य वरं वृणीथा इति स होवाच तवैव राजन् मानुषं वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ब्रूहीति स ह कृच्छ्री बभूव ॥ ६ ॥ तगं् ह चिरं वसेत्याज्ञापयाञ्चकार तगं् होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ॥ ७ ॥

चतुर्थः खण्डः [4]

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति ॥ २ ॥

पञ्चमः खण्डः [5]

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्ने-तस्मिन्नग्नौ देवाः सोमगं् राजानं जुह्वति तस्या आहुतेर्वर्षगं् सम्भवति ॥ २ ॥

षष्ठः खण्डः [6]

पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्ने-तस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नगं् सम्भवति ॥ २ ॥

सप्तमः खण्डः [7]

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वार्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेतः सम्भवति ॥ २ ॥

अष्टमः खण्डः [8]

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवति ॥ २ ॥

नवमः खण्डः [9]

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावद्वाथ जायते ॥ १ ॥ स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः सम्भूतो भवति ॥ २ ॥

दशमः खण्डः [10]

तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभि सम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडु-दङ्ङेति मासाग्ंस्तान् ॥ १ ॥ मासेभ्यः संवत्सरग्ं संवत्सरा दादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवयानः पन्था इति ॥ २ ॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिग्ं

रात्रेरपरपक्ष - मपरपक्षाद्यान्षड्दक्षिणैति मासाग्ंस्तान्नैते संवत्सर-मभिप्राप्नुवन्ति ॥ ३ ॥ मासेभ्यः पितृलोकं पितृलोकादाकाश-माकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ॥ ४ ॥ तस्मिन्यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति ॥ ५ ॥ अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति ॥ ६ ॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा ॥ ७ ॥ अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयग्ं स्थानं तेनासौ लोको न सम्पूर्यते तस्माज्जुगुप्सेत तदेष श्लोकः ॥ ८ ॥ स्तेनो हिरण्यस्य सुरां पिबग्ंश्च गुरोस्तल्पमावसन्ब्रह्महा च । एते पतन्ति चत्वारः पञ्चमश्चाचरग्ं-स्तैरिति ॥ ९ ॥ अथ ह य एतानेवं पञ्चाग्नीन्वेद न सह तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद ॥ १० ॥

एकादशः खण्डः [11]

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो

जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमाग्ंसां चक्रुः को न आत्मा किं ब्रह्मेति ॥ १ ॥ ते ह सम्पादयाञ्चक्रुरुद्दालको वै भगवन्तोऽयमारुणिः सम्प्रतीममात्मानं वैश्वानरमध्येति तग्ं हन्ताभ्यागच्छामेति तग्ं हाभ्याजग्मुः ॥ २ ॥ स ह सम्पादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति ॥ ३ ॥ तान्होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः सम्प्रतीममात्मानं वैश्वानरमध्येति तग्ं हन्ताभ्यागच्छामेति तग्ं हाभ्याजग्मुः ॥ ४ ॥ तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार स ह प्रातः सञ्जिहान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नाऽनाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ॥ ५ ॥ ते होचुर्येन हैवार्थेन पुरुषश्चरेत्तग्ं हैव वदेदात्मानमेवेमं वैश्वानरग्ं सम्प्रत्यध्येषि तमेव नो ब्रूहीति ॥ ६ ॥ तान्होवाच प्रातर्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच ॥ ७ ॥

द्वादशः खण्डः [12]

औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य

एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥ २ ॥

त्रयोदशः खण्डः [13]

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते ॥ १ ॥ प्रवृत्तोऽश्वतरीरथो दासीनिष्को ऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यद्यन्मां नागमिष्य इति ॥ २ ॥

चतुर्दशः खण्डः [14]

अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आयन्ति पृथग्रथश्रेणयो ऽनुयन्ति ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति ॥ २ ॥

पञ्चदशः खण्डः [15]

अथ होवाच जनगं् शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो

यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते सन्देहस्त्वेष आत्मन इति होवाच सन्देहस्ते व्यशीर्यद्यन्मां नागमिष्य इति ॥ २ ॥

षोडशः खण्डः [16]

अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वग् रयिमान्पुष्टिमानसि ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति ॥ २ ॥

सप्तदशः खण्डः [17]

अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचैष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ॥ २ ॥

अष्टादशः खण्डः [18]

तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वाग्ंसो ऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ॥ १ ॥ तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः ॥ २ ॥

एकोनविंशः खण्डः [19]

तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयग्ं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति ॥ १ ॥ प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

विंशः खण्डः [20]

अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति ॥ १ ॥ व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

एकविंशः खण्डः [21]

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति ॥ १ ॥ अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

द्वाविंशः खण्डः [22]

अथ यां चतुर्थीं जुहुयात्तां जुहुयात्समानाय स्वाहेति समानस्तृप्यति ॥ १ ॥ समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ ३ ॥

त्रयोविंशः खण्डः [23]

अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति ॥ १ ॥ उदाने तृप्यति त्वक् तृप्यति त्वचि तृप्यन्त्यां वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

चतुर्विंशः खण्डः [24]

स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् ॥ १ ॥ अथ य एतदेवं विद्वानग्निहोत्रं जुहोति

तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति ॥ २ ॥ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवगं् हास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति ॥ ३ ॥ तस्मादु हैवंविद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतगं् स्यादिति तदेष श्लोकः ॥ ४ ॥ यथेह क्षुधिता बाला मातरं पर्युपासत एवगं् सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति ॥ ५ ॥

षष्ठोऽध्यायः

प्रथमः खण्डः [1]

ॐ । श्वेतकेतुर्हारुणेय आस तगं् ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥ १ ॥ स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तगं् ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः ॥ २ ॥ येनाश्रुतगं् श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति ॥ ३ ॥ यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातगं् स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ ४ ॥ यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातगं् स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥ ५ ॥ यथा सोम्यैकेन नखनिकृन्तनेन सर्वं काष्णायसं विज्ञातगं् स्याद्वाचारम्भणं विकारो

नामधेयं कृष्णायसमित्येव सत्यमेवग्ं सोम्य स आदेशो भवतीति ॥ ६ ॥ न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति भगवाग्ंस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥ ७ ॥

द्वितीयः खण्डः [2]

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ॥ १ ॥ कुतस्तु खलु सोम्यैवग्ं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥ २ ॥ तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्वच शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥ ३ ॥ ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्वच वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥ ४ ॥

तृतीयः खण्डः [3]

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति ॥ १ ॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ॥ २ ॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति । सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत् ॥ ३ ॥ तासां त्रिवृतं त्रिवृतमेकैकामकरोत् । यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ४ ॥

चतुर्थः खण्डः [4]

यदग्ने रोहितगं् रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ १ ॥ यदादित्यस्य रोहितगं् रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ २ ॥ यच्चन्द्रमसो रोहितगं् रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ३ ॥ यद्विद्युतो रोहितगं् रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ४ ॥ एतद्ध स्म वै तद्विद्वाग्ंस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः ॥ ५ ॥ यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदाञ्चक्रुर्यदु शुक्लमिवाभूदित्यपाग्ं रूपमिति तद्विदाञ्चक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः ॥ ६ ॥ यद्वद्विज्ञातमिवाभूदित्येतासामेव देवतानाग्ं समास इति तद्विदाञ्चक्रुर्यथा खलु नु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ७ ॥

पञ्चमः खण्डः [5]

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माग्ंसं योऽणिष्ठस्तन्मनः ॥ १ ॥ आपः

पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः ॥ २ ॥ तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥ ३ ॥ अन्नमयग्ं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञा-पयत्विति तथा सोम्येति होवाच ॥ ४ ॥

षष्ठः खण्डः [6]

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति ॥ १ ॥ एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति ॥ २ ॥ अपाग्ं सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति ॥ ३ ॥ तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ॥ ४ ॥ अन्नमयग्ं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ५ ॥

सप्तमः खण्डः [7]

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति ॥ १ ॥ स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूग्ंषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति ॥ २ ॥ तग्ं होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः

खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवगं् सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥ ३ ॥ स हाशाथ हैनमुपससाद तगं् ह यत्किञ्च पप्रच्छ सर्वगं् ह प्रतिपेदे ॥ ४ ॥ तगं् होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोऽपि बहु दहेत् ॥ ५ ॥ एवगं् सोम्य ते षोडशानां कलानामेका कलातिशिष्टा ऽभूत्साऽन्नेनोपसमाहिता प्राज्वालीत्तयैतर्हि वेदाननुभवस्यन्नमयगं् हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ६ ॥

अष्टमः खण्डः [8]

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनगं् स्वपितीत्याचक्षते स्वगं् ह्यपीतो भवति ॥ १ ॥ स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनगं् हि सोम्य मन इति ॥ २ ॥ अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षते ऽशनायेति तत्रैतच्छुङ्गमुत्पतितगं् सोम्य विजानीहि नेदममूलं

भविष्यतीति ॥ ३ ॥ तस्य क्व मूलग्ं स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूल-मन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ ४ ॥ अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितग्ं सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ५ ॥ तस्य क्व मूलग्ं स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥ ६ ॥ स य एषोऽणिमैतदात्म्यमिदग्ं सर्वं तत्सत्यग्ं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ७ ॥

नवमः खण्डः [9]

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाग्ं रसान्समवहारमेकताग्ं रसं गमयन्ति ॥ १ ॥ ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह

इति ॥ २ ॥ त इह व्याघ्रो वा सिग्ंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दग्ंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ ३ ॥ स य एषोऽणिमैतदात्म्यमिदग्ं सर्वं तत्सत्यग्ं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४ ॥

दशमः खण्डः [10]

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवन्ति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ॥ १ ॥ एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगत्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिग्ंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दग्ंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदग्ं सर्वं तत्सत्यग्ं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

एकादशः खण्डः [11]

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥ अस्य यदेकाग्ं शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा

शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यत्येवमेव खलु सोम्य विद्धीति होवाच ॥ २ ॥ जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदग्ं सर्वं तत्सत्यग्ं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

द्वादशः खण्डः [12]

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति ॥ १ ॥ तग्ं होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति ॥ २ ॥ श्रद्धत्स्व सोम्येति स य एषोऽणिमैतदात्म्यमिदग्ं सर्वं तत्सत्यग्ं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

त्रयोदशः खण्डः [13]

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार तग्ं होवाच यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥ १ ॥ यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते तग्ं होवाचात्र वाव किल सत्सोम्य न

निभालयसेऽत्रैव किलेति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदगं् सर्वं तत्सत्यगं् स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

चतुर्दशः खण्डः [14]

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥ तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसम्पद्येतै-वमेवेहाचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदगं् सर्वं तत्सत्यगं् स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

पञ्चदशः खण्डः [15]

पुरुषगं् सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥ अथ यदाऽस्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदगं् सर्वं तत्सत्यगं् स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

षोडशः खण्डः [16]

पुरुषगं् सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षी-त्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥ १ ॥ अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥ २ ॥ स यथा तत्र नादाह्येतैतदात्म्यमिदगं् सर्वं तत्सत्यगं् स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

सप्तमोऽध्यायः

प्रथमः खण्डः [1]

ॐ । अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तगं् होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति ॥ १ ॥ स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदगं् सामवेदमाथर्वणं चतुर्थ-मितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यगं् राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यागं् सर्पदेवजनविद्यामेतद्भगवोऽध्येमि ॥ २ ॥ सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतगं् ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य

पारं तारयत्विति तग्ं होवाच यद्वै किञ्चैतदध्यगीष्ठा नामैवैतत् ॥ ३ ॥ नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति ॥ ४ ॥ स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ५ ॥

द्वितीयः खण्डः [2]

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदग्ं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यग्ं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याग्ं सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाग्ंश्च मनुष्याग्ंश्च पशूग्ंश्च वयाग्ंसि च तृणवनस्पतीञ्श्वापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति ॥ १ ॥ स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति

भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

तृतीयः खण्डः [3]

मनो वाव वाचो भूयो यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरुते पुत्रागंश्च पशूगंश्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते मनो ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्स्वेति ॥ १ ॥ स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति यो मनो ब्रह्मेत्युपास्तेऽस्ति भगवो मनसो भूय इति मनसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

चतुर्थः खण्डः [4]

सङ्कल्पो वाव मनसो भूयान्यदा वै संङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि ॥ १ ॥ तानि ह वा एतानि सङ्कल्पैकायनानि सङ्कल्पात्मकानि सङ्कल्पे प्रतिष्ठितानि समकॢपतां द्यावापृथिवी समकल्पेतां वायुश्चाकाशं च समकल्पन्ताऽऽपश्च तेजश्च तेषागं संकॢप्त्यै वर्षं सङ्कल्पते वर्षस्य संकॢप्त्या अन्नगं सङ्कल्पतेऽन्नस्य संकॢप्त्यै प्राणाः सङ्कल्पन्ते प्राणानागं संकॢप्त्यै मन्त्राः सङ्कल्पन्ते मन्त्राणागं संकॢप्त्यै

कर्माणि सङ्कल्पन्ते कर्मणाग्ं संक्लृप्त्यै लोकः सङ्कल्पते लोकस्य संक्लृप्त्यै सर्वग्ं सङ्कल्पते स एष सङ्कल्पः सङ्कल्पमुपास्स्वेति ॥ २ ॥ स यः सङ्कल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान् ध्रुवान् ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावत्सङ्कल्पस्य गतं तत्रास्य यथाकामचारो भवति यः सङ्कल्पं ब्रह्मेत्युपास्तेऽस्ति भगवः सङ्कल्पाद्भूय इति सङ्कल्पाद्भाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ३ ॥

पञ्चमः खण्डः [5]

चित्तं वाव सङ्कल्पाद्भूयो यदा वै चेतयतेऽथ सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि ॥ १ ॥ तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तग्ं ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति ॥ २ ॥ स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान् ध्रुवान् ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्धयति यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्भाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ३ ॥

षष्ठः खण्डः [6]

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादाग्ंशा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानापादाग्ंशा इवैव ते भवन्ति ध्यानमुपास्स्वेति ॥ १ ॥ स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

सप्तमः खण्डः [7]

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदग्ं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यग्ं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याग्ं सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाग्ंश्च मनुष्याग्ंश्च पशूग्ंश्च वयाग्ंसि च तृणवनस्पतीञ्श्वापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति ॥ १ ॥ स यो विज्ञानं ब्रह्मेत्युपास्ते

विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिद्ध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्भाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

अष्टमः खण्डः [8]

बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन्परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयाग्ंसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति ॥ १ ॥ स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्भाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

नवमः खण्डः [9]

अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दश रात्रीर्नाश्नीयाद्यद्यु ह जीवेदथवाऽद्रष्टाऽश्रोताऽमन्ताऽबोद्धाऽकर्ताऽविज्ञाता भवत्यथान्नस्यायै द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति ॥ १ ॥ स योऽन्नं ब्रह्मेत्युपास्ते ऽन्नवतो वै स लोकान्पानवतोऽभिसिद्ध्यति यावदन्नस्य गतं तत्रास्य

यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भूय इत्यन्नाद्धाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

दशमः खण्डः [10]

आपो वावान्नाद्भूयस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्यथ यदा सुवृष्टिर्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु भविष्यतीत्याप एवेमा मूर्ता येयं पृथिवी यदन्तरिक्षं यद् द्यौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयाग्ंसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकमाप एवेमा मूर्ता अप उपास्स्वेति ॥ १ ॥ स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामाग्ंस्तृप्तिमान् भवति यावदपां गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

एकादशः खण्डः [11]

तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते तेज उपास्स्वेति ॥ १ ॥ स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिद्ध्यति यावत्तेजसो गतं तत्रास्य यथाकामचारो

भवति यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

द्वादशः खण्डः [12]

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति ॥ १ ॥ स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसम्बाधानुरुगायवतोऽभिसिद्ध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

त्रयोदशः खण्डः [13]

स्मरो वावाकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्नस्मरन्तो नैव ते कञ्चन शृणुयुर्न मन्वीरन्न विजानीरन् यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन् स्मरेण वै पुत्रान्विजानाति स्मरेण पशून् स्मरमुपास्स्वेति ॥ १ ॥ स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति भगवः स्मराद्भूय इति स्माराद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

चतुर्दशः खण्डः [14]

आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मन्त्रानधीते कर्माणि कुरुते पुत्राग्ंश्च पशूग्ंश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्स्वेति ॥ १ ॥ स य आशां ब्रह्मेत्युपास्त आशयाऽस्य सर्वे कामाः समृद्ध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

पञ्चदशः खण्डः [15]

प्राणो वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वग्ं समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः ॥ १ ॥ स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाऽऽचार्यं वा ब्राह्मणं वा किञ्चिद् भृशमिव प्रत्याह धिक्त्वाऽस्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति ॥ २ ॥ अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषन्दहेन्नैवैनं ब्रूयुः पितृहाऽसीति न मातृहाऽसीति न भ्रातृहाऽसीति न स्वसृहाऽसीति नाचार्यहाऽसीति न ब्राह्मणहाऽसीति ॥ ३ ॥ प्राणो ह्येवैतानि सर्वाणि भवति स वा

एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत ॥ ४ ॥

षोडशः खण्डः [16]

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥ १ ॥

सप्तदशः खण्डः [17]

यदा वै विजानात्यथ सत्यं वदति नाविजानन् सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति ॥ १ ॥

अष्टादशः खण्डः [18]

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति ॥ १ ॥

एकोनविंशः खण्डः [19]

यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति ॥ १ ॥

विंशः खण्डः [20]

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति ॥ १ ॥

एकविंशः खण्डः [21]

यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृतिं भगवो विजिज्ञास इति ॥ १ ॥

द्वाविंशः खण्डः [22]

यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति ॥ १ ॥

त्रयोविंशः खण्डः [23]

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥ १ ॥

चतुर्विंशः खण्डः [24]

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यगं् स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति ॥ १ ॥ गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥ २ ॥

पञ्चविंशः खण्डः [25]

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदगं् सर्वमिति। अथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतो

ऽहमेवेदगं् सर्वमिति ॥ १ ॥ अथात आत्मादेश एवात्मैवाधस्ता-दात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदगं् सर्वमिति । स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति । अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषागं् सर्वेषु लोकेष्व-कामचारो भवति ॥ २ ॥

षड्विंशः खण्डः [26]

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशाऽऽत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मतः सङ्कल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मन्त्रा आत्मतः कर्माण्यात्मत एवेदगं् सर्वमिति ॥ १ ॥ तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतागं् सर्वगं् ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति। स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतं च दश चैकश्च सहस्राणि च विगं्शतिराहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमारस्तगं् स्कन्द इत्याचक्षते तगं् स्कन्द इत्याचक्षते ॥ २ ॥

अष्टमोऽध्यायः

प्रथमः खण्डः [1]

ॐ । अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥ १ ॥ तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति ॥ २ ॥ स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमिति ॥ ३ ॥ तं चेद्ब्रूयुरस्मिग्ं-श्चेदिदं ब्रह्मपुरे सर्वग्ं समाहितग्ं सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा वाऽऽप्नोति प्रध्वग्ंसते वा किं ततोऽतिशिष्यत इति ॥ ४ ॥ स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथाऽनुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति ॥ ५ ॥ तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते । तद्य इहात्मानमननुविद्य व्रजन्त्येताग्ंश्च सत्यान् कामाग्ंस्तेषाग्ं सर्वेषु लोकेष्वकामचारो

भवति । अथ य इहात्मानमनुविद्य व्रजन्त्येतागं्श्च सत्यान् कामागं्स्तेषागं् सर्वेषु लोकेषु कामचारो भवति ॥ ६ ॥

द्वितीयः खण्डः [2]

स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते ॥ १ ॥ अथ यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन सम्पन्नो महीयते ॥ २ ॥ अथ यदि भ्रातृलोककामो भवति सङ्कल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन सम्पन्नो महीयते ॥ ३ ॥ अथ यदि स्वसृलोककामो भवति सङ्कल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन सम्पन्नो महीयते ॥ ४ ॥ अथ यदि सखिलोककामो भवति सङ्कल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन सम्पन्नो महीयते ॥ ५ ॥ अथ यदि गन्धमाल्यलोककामो भवति सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतस्तेन गन्धमाल्यलोकेन सम्पन्नो महीयते ॥ ६ ॥ अथ यद्यन्नपानलोककामो भवति सङ्कल्पादेवास्यान्नपाने समुत्तिष्ठ-तस्तेनान्नपानलोकेन सम्पन्नो महीयते ॥ ७ ॥ अथ यदि गीतवादित्रलोककामो भवति सङ्कल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन सम्पन्नो महीयते ॥ ८ ॥ अथ यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन

स्त्रीलोकेन सम्पन्नो महीयते ॥ ९ ॥ यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते ॥ १० ॥

तृतीयः खण्डः [3]

त इमे सत्याः कामा अनृतापिधानास्तेषाग्ं सत्यानाग्ं सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥ १ ॥ अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानाः । तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ २ ॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तग्ं हृद्ययमिति तस्माद्धृदयम् । अहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ ३ ॥ अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति । तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥ ४ ॥ तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ ५ ॥

चतुर्थः खण्डः [4]

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय नैतगं् सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतगं् सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः ॥ १ ॥ तस्माद्वा एतगं् सेतुं तीर्त्वान्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति। तस्माद्वा एतगं् सेतुं तीर्त्वाऽपि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः ॥ २ ॥ तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषागं् सर्वेषु लोकेषु कामचारो भवति ॥ ३ ॥

पञ्चमः खण्डः [5]

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दते । अथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवेष्ट्वाऽऽत्मानमनुविन्दते ॥ १ ॥ अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते ॥ २ ॥ अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दतेऽथ यदरण्यायन-मित्याचक्षते ब्रह्मचर्यमेव तत् तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरम्मदीयगं् सरस्तदश्वत्थः सोमसवनस्त-दपराजिता पूर्ब्रह्मणः प्रभुविमितगं् हिरण्मयम् ॥ ३ ॥ तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष

ब्रह्मलोकस्तेषाग्ं सर्वेषु लोकेषु कामचारो भवति ॥ ४ ॥

षष्ठः खण्डः [6]

अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः ॥ १ ॥ तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः ॥ २ ॥ तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवति ॥ ३ ॥ अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥ ४ ॥ अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते । स ओमिति वा होद्वा मीयते। स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति। एतद्वै खलु लोकद्वारम् विदुषां प्रपदनं विरोधोऽविदुषाम् ॥ ५ ॥ तदेष श्लोकः । शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति ॥ ६ ॥

सप्तमः खण्डः [7]

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः

सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाग्ंश्च लोकानाप्नोति सर्वाग्ंश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ १ ॥ तद्धोभये देवासुरा अनुबुबुधिरे। तेहोचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वाग्ंश्च लोकानाप्नोति सर्वाग्ंश्च कामानिति । इन्द्रो हैव देवानामभिप्रववाज । विरोचनोऽसुराणाम् तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः॥ २ ॥ तौ ह द्वात्रिग्ंशतं वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति। तौ होचतुर्य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो ऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाग्ंश्च लोकानाप्नोति सर्वाग्ंश्च कामान्यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्तावावास्तमिति ॥ ३ ॥ तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति होवाच ॥ ४ ॥

अष्टमः खण्डः [8]

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति। तौ होदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आ

लोमभ्य आ नखेभ्यः प्रतिरूपमिति ॥ १ ॥ तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामिति। तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥ २ ॥ तौ होचतुर्यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृत-मभयमेतद्ब्रह्मेति । तौ ह शान्तहृदयौ प्रवव्रजतुः ॥ ३ ॥ तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति । स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति ॥ ४ ॥ तस्मादप्यद्येहाद-दानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणाग्ं ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति सग्ंस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ५ ॥

नवमः खण्डः [9]

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे

परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥ १ ॥ स समित्पाणिः पुनरेयाय तगं् ह प्रजापतिरुवाच । मघवन्यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन् पुनरागम इति । स होवाच यथैव खल्वयं भगवोऽस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृतः एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥ २ ॥ एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि । वसापराणि द्वात्रिगं्शतं वर्षाणीति । स हापराणि द्वात्रिगं्शतं वर्षाण्युवास तस्मै होवाच ॥ ३ ॥

दशमः खण्डः [10]

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृत-मभयमेतद्ब्रह्मेति । स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श । तद्यद्यपीदगं् शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥ १ ॥ न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवा-प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीति ॥ २ ॥ स समित्पाणिः पुनरेयाय तगं् ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य

दोषेण दुष्यति ॥ ३ ॥ न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति। स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥ ४ ॥

एकादशः खण्डः [11]

तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति। स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाह खल्वयमेवगं् संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥ १ ॥ स समित्पाणिः पुनरेयाय तगं् ह प्रजापतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति स होवाच नाह खल्वयं भगव एवगं् संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥ २ ॥ एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद् वसापराणि पञ्च वर्षाणीति स हापराणि पञ्च वर्षाण्युवास। तान्येकशतगं् सम्पेदुरेतत्तद्यदाहुरेकशतगं् ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥ ३ ॥

द्वादशः खण्डः [12]

मघवन्मर्त्यं वा इदगं् शरीरमात्तं मृत्युना तदस्यामृतस्या-

शरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥ १ ॥ अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यन्ते । एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते ॥ २ ॥ स उत्तमः पुरुषः स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनगं् स्मरन्निदगं् शरीरगं् स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिन् शरीरे प्राणो युक्तः ॥ ३ ॥ अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेदगं् शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥ ४ ॥ अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके ॥ ५ ॥ तं वा एतं देवा आत्मानमुपासते तस्मात्तेषागं् सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वागंश्च लोकानाप्नोति सर्वागंश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ ६ ॥

त्रयोदशः खण्डः [13]

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि

विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामीत्यभिसम्भवामीति ॥ १ ॥

चतुर्दशः खण्डः [14]

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतग्ं स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्वेतमदत्कमदत्कग्ं श्वेतं लिन्दु माभिगां लिन्दु माभिगाम् ॥ १ ॥

पञ्चदशः खण्डः [15]

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभि-समावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिग्ंसन्सर्व-भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोक-मभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते ॥ १ ॥

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ श्वेताश्वतरोपनिषत् ॥

प्रथमोऽध्यायः

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

हरिः ॐ ॥ ब्रह्मवादिनो वदन्ति । किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥ १ ॥ कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्या । संयोग एषां नत्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः ॥ २ ॥ ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् । यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ॥ ३ ॥ तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः । अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥ ४ ॥ पञ्च-स्रोतोम्बुं पञ्चयोन्युग्रवक्रां पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम् । पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ॥ ५ ॥ सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे । पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ॥ ६ ॥ उद्गीतमेतत्परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाऽक्षरं च । अत्रान्तरं

ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्पराः योनिमुक्ताः ॥ ७ ॥ संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः । अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ ८ ॥ ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृ-भोग्यार्थयुक्ता । अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥ ९ ॥ क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः । तस्याभिध्यानाद्योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमाया-निवृत्तिः ॥ १० ॥

ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः । तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः ॥ ११ ॥ एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित् । भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥ १२ ॥ वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः । स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ॥ १३ ॥ स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्नि-गूढवत् ॥ १४ ॥ तिलेषु तैलं दधनीव सर्पिरापः स्रोतः स्वरणीषु चाग्निः । एवमात्माऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा यो ऽनुपश्यति ॥ १५ ॥ सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् । आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत् परम् ॥ तद्ब्रह्मोपनिषत् परम् ॥ १६ ॥

द्वितीयोऽध्यायः

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः। अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥ युक्तेन मनसा वयं देवस्य सवितुः सवे। सुवर्गेयाय शक्त्या ॥ २ ॥ युक्त्वाय मनसा देवान् सुवर्यतो धिया दिवम्। बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३ ॥ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ ४ ॥ युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोक एतु पथ्येव सूरेः। शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ ५ ॥ अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते। सोमो यत्रातिरिच्यते तत्र सञ्जायते मनः ॥ ६ ॥ सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम्। तत्र योनिं कृणवसे न हि ते पूर्तमक्षिपत् ॥ ७ ॥ त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निवेश्य। ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥ ८ ॥ प्राणान् प्रपीड्येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत। दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेताप्रमत्तः ॥ ९ ॥ समे शुचौ शर्करावह्निवालुका विवर्जिते शब्दजलाश्रयादिभिः। मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत् ॥ १० ॥

नीहारधूमार्कानिलानलानां खद्योतविद्युत्स्फटिकशशीनाम्। एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ ११ ॥

पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥ १२ ॥ लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च। गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति ॥ १३ ॥ यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत् सुधान्तम्। तद्वाऽऽत्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः ॥ १४ ॥ यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्। अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १५ ॥ एष ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः। स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥ १६ ॥ यो देवो अग्नौ योऽप्सु यो विश्वं भुवनमाविवेश। य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः ॥ १७ ॥

तृतीयोऽध्यायः

य एको जालवानीशत ईशनीभिः सर्वाँल्लोकानीशत ईशनीभिः। य एवैक उद्भवे सम्भवे च य एतद् विदुरमृतास्ते भवन्ति ॥ १ ॥ एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशनीभिः। प्रत्यङ् जनांस्तिष्ठति सञ्चुकोचान्तकाले संसृज्य विश्वा भुवनानि गोपाः ॥ २ ॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः ॥ ३ ॥ यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षिः।

हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु ॥ ४ ॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥ ५ ॥ यामिषुं गिरिशन्त हस्ते बिभर्ष्य-स्तवे । शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥ ६ ॥ ततः परं ब्रह्म परं बृहन्तं यथानिकायं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वाऽमृता भवन्ति ॥ ७ ॥ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ ८ ॥ यस्मात् परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ ९ ॥ ततो यदुत्तरतरं तदरूपमनामयम् । य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति ॥ १० ॥

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवांस्त-स्मात् सर्वगतः शिवः ॥ ११ ॥ महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः । सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः ॥ १२ ॥ अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । हृदा मन्वीशो मनसाभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति ॥ १३ ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥ १४ ॥ पुरुष एवेदगं् सर्वं यद् भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ १५ ॥

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १६ ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रिय-विवर्जितम् । सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् ॥ १७ ॥ नवद्वारे पुरे देही हंसो लेलायते बहिः । वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ॥ १८ ॥ अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥ १९ ॥ अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ॥ २० ॥ वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात् । जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यम् ॥ २१ ॥

चतुर्थोऽध्यायः

य एकोऽवर्णो बहुधा शक्तियोगाद् वर्णाननेकान् निहितार्थो दधाति । वि चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु ॥ १ ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद् ब्रह्म तदापस्तत् प्रजापतिः ॥ २ ॥ त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी । त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः ॥ ३ ॥ नीलः पतङ्गो हरितो लोहिताक्ष-स्तडिद्गर्भ ऋतवः समुद्राः । अनादिमत् त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा ॥ ४ ॥ अजामेकां लोहितशुक्लकृष्णां

बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ ५ ॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ ६ ॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ ७ ॥ ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ८ ॥ छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति । अस्मान् मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः ॥ ९ ॥ मायां तु प्रकृतिं विद्यान्मायिनं च महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ १० ॥

यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति सर्वम् । तमीशानं वरदं देवमीड्यं निचाय्येमां शान्ति-मत्यन्तमेति ॥ ११ ॥ यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु ॥ १२ ॥ यो देवानामधिपो यस्मिँल्लोका अधिश्रिताः । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १३ ॥ सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥ १४ ॥ स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः । यस्मिन्

युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥ १५ ॥ घृतात् परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १६ ॥ एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः । हृदा मनीषा मनसाऽभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति ॥ १७ ॥ यदाऽतमस्तन्न दिवा न रात्रिः न सन्न चासञ्छिव एव केवलः । तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥ १८ ॥ नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् । न तस्य प्रतिमा अस्ति यस्य नाम महद् यशः ॥ १९ ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति ॥ २० ॥ अजात इत्येवं कश्चिद्भीरुः प्रपद्यते । रुद्र यत् ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥ २१ ॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ॥ २२ ॥

पञ्चमोऽध्यायः

द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे। क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः ॥ १ ॥ यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः। ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् ॥ २ ॥ एकैकं जालं बहुधा विकुर्वन्नस्मिन् क्षेत्रे संहरत्येष

देवः । भूयः सृष्ट्वा यतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा ॥ ३ ॥ सर्वा दिश ऊर्ध्वमधश्च तिर्यक् प्रकाशयन् भ्राजते यद्वनड्वान् । एवं स देवो भगवान् वरेण्यो योनिस्वभावानधितिष्ठत्येकः ॥ ४ ॥ यच्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान् परिणामयेद् यः । सर्व मेतद् विश्वमधितिष्ठत्येको गुणांश्च सर्वान् विनियोजयेद् यः ॥ ५ ॥ तद् वेदगुह्योपनिषत्सु गूढं तद् ब्रह्मा वेदते ब्रह्मयोनिम् । ये पूर्वं देवा ऋषयश्च तद् विदुस्ते तन्मया अमृता वै बभूवुः ॥ ६ ॥ गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता । स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभिः ॥ ७ ॥ अङ्गुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो यः । बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोऽपि दृष्टः ॥ ८ ॥ बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ ९ ॥ नैव स्त्री न पुमानेष न चैवायं नपुंसकः । यद्यच्छरीरमादत्ते तेन तेन स रक्ष्यते ॥ १० ॥

सङ्कल्पनस्पर्शनदृष्टिमोहैर्ग्रासाम्बुवृष्ट्यात्मविवृद्धिजन्म । कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसम्प्रपद्यते ॥ ११ ॥ स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति । क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः ॥ १२ ॥ अनाद्यनन्तं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् । विश्वस्यैकं

परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३ ॥ भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥ १४ ॥

षष्ठोऽध्यायः

स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः । देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ १ ॥ येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकारो गुणी सर्वविद्यः । तेनेशितं कर्म विवर्तते ह पृथिव्यप्तेजोऽनिलखानि चिन्त्यम् ॥ २ ॥ तत्कर्म कृत्वा विनिवर्त्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगम् । एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः ॥ ३ ॥ आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान् विनियोजयेद् यः । तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः ॥ ४ ॥ आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि दृष्टः । तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वम् ॥ ५ ॥ स वृक्षकालाकृतिभिः परोऽन्यो यस्मात् प्रपञ्चः परिवर्ततेऽयम् । धर्मावहं पापनुदं भगेशं ज्ञात्वाऽत्मस्थममृतं विश्वधाम ॥ ६ ॥ तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् । पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम् ॥ ७ ॥ न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ ८ ॥ न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स

कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥ ९ ॥ यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतः । देव एकः स्वमावृणोत् स नो दधात् ब्रह्माप्ययम् ॥ १० ॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ ११ ॥ एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३ ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १४ ॥ एको हंसः भुवनस्यास्य मध्ये स एवाग्निः सलिले संनिविष्टः । तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १५ ॥ स विश्वकृद् विश्वविदात्मयोनिर्ज्ञः कालकारो गुणी सर्वविद्यः । प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्ष-स्थितिबन्धहेतुः ॥ १६ ॥ स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता । य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय ॥ १७ ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवं आत्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १८ ॥ निष्कलं निष्क्रियं शान्तं निरवद्यं

निरञ्जनम् । अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥ १९ ॥ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ २० ॥

तपःप्रभावाद् देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् । अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् ॥ २१ ॥ वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम् । नाऽप्रशान्ताय दातव्यं नाऽपुत्रायाशिष्याय वा पुनः ॥ २२ ॥ यस्य देवे परा भक्तिः यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ २३ ॥

प्रकाशन्ते महात्मन इति ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

सर्वशक्तीश्वरस्सर्वः सर्वशक्त्याश्रयस्सदा ।
त्वमनीहः स्वयञ्ज्योतिः सर्वानन्दस्सनातनः ॥

ब्रह्मवैवर्तपुराणम् - ४, १८, ४२.

Thou art everything. You are the controller of all powers and the source of all powers. You are devoid of desires. You are verily the self luminous, all-blissful, eternal Being.

॥ कलिसन्तरणोपनिषत् ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

हरिः ॐ ॥ द्वापरान्ते नारदो ब्रह्माणं जगाम कथं भगवन् गां पर्यटन्कलिं सन्तरेयमिति । स होवाच ब्रह्मा साधु पृष्टोऽस्मि । सर्वश्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि । भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेण निर्धूतकलिर्भवति । नारदः पुनः पप्रच्छ तन्नाम किमिति ।

स होवाच हिरण्यगर्भः –

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥ १ ॥

इति षोडशकं नाम्नां कलिकल्मषनाशनम् ।
नातः परतरोपायः सर्ववेदेषु दृश्यते ॥ २ ॥

इति षोडशकलस्य जीवस्यावरणविनाशनम् ।
ततः प्रकाशते परं ब्रह्म मेघापाये रविरश्मिमण्डलीवेति ।

पुनर्नारदः पप्रच्छ भगवन्कोऽस्य विधिरिति ।
तं होवाच नास्य विधिरिति । सर्वदा शुचिरशुचिर्वा पठन्ब्राह्मणः सलोकतां समीपतां सरूपतां सायुज्यतामेति । यदास्य षोडशीकस्य

सार्धत्रिंकोटीर्जपति तदा ब्रह्महत्यां तरति । तरति वीरहत्याम् । स्वर्णस्तेयात्पूतोभवति । पितृदेवमनुष्याणामपकारात्पूतो भवति । सर्वधर्मपरित्यागपापात्सद्यः शुचितामाप्नुयात् । सद्यो मुच्यते सद्यो मुच्यते इत्युपनिषत् ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव
नास्त्येव गतिरन्यथा ॥

बृहत् नारदीय पुराणम्

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥

श्रीमद्भागवतम् - १०, १०, ३८.

Let our speech be devoted to the narration of Thy excellence, our ears to the hearing of Thy wonderful glory, our hands to the performance of Thy work, our minds to meditation on Thy holy feet, our heads to bowing to the world-Thy abode-and our eyes to seeing the righteous who are Thy body.

॥ सरस्वतीरहस्योपनिषत् ॥

नीहारहारघनसारसुधाकराभां
कल्याणदां कनकचम्पकदामभूषाम् ।
उत्तुङ्गपीनकुचकुम्भमनोहराङ्गीं
वाणीं नमामि मनसा वचसा विभूत्यै ॥ १ ॥

या वेदान्तार्थतत्त्वैकस्वरूपा परमेश्वरी ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ॥ २ ॥

या साङ्गोपाङ्गवेदेषु चतुर्ष्वेकैव गीयते ।
अद्वैता ब्रह्मणः शक्तिः सा मां पातु सरस्वती ॥ ३ ॥

या वर्णपदवाक्यार्थस्वरूपेणैव वर्तते ।
अनादिनिधनानन्ता सा मां पातु सरस्वती ॥ ४ ॥

अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी ।
प्रत्यगास्ते वदन्ती या सा मां पातु सरस्वती ॥ ५ ॥

अन्तर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति ।
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती ॥ ६ ॥

या प्रत्यग्दृष्टिभिर्जीवैर्व्यजमानानुभूयते ।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ॥ ७ ॥

नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता ।
निर्विकल्पात्मना व्यक्ता सा मां पातु सरस्वती ॥ ८ ॥
व्यक्ताव्यक्तगिरः सर्वे वेदाद्या व्याहरन्ति याम् ।
सर्वकामदुघा धेनुः सा मां पातु सरस्वती ॥ ९ ॥
यां विदित्वाखिलं बन्धं निर्मथ्याखिलवर्त्मना ।
योगी याति परं स्थानं सा मां पातु सरस्वती ॥ १० ॥
नामरूपात्मकं सर्वं यस्यामावेश्य तां पुनः ।
ध्यायन्ति ब्रह्मरूपैका सा मां पातु सरस्वती ॥ ११ ॥
चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १२ ॥
नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ॥ १३ ॥
अक्षसूत्राङ्कुशधरा पाशपुस्तकधारिणी ।
मुक्ताहारसमायुक्ता वाचि तिष्ठतु मे सदा ॥ १४ ॥
कम्बुकण्ठी सुताम्रोष्ठी सर्वाभरणभूषिता ।
महासरस्वती देवी जिह्वाग्रे सन्निवेश्यताम् ॥ १५ ॥
या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना शमादिगुणदायिनी ॥ १६ ॥

नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥ १७ ॥
यः कवित्वं निरातङ्कं भुक्तिमुक्ती च वाञ्छति ।
सोऽभ्यर्च्यैनां दशश्लोक्या नित्यं स्तौति सरस्वतीम् ॥ १८ ॥
तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीम् ।
भक्तिश्रद्धाभियुक्तस्य षाण्मासात्प्रत्ययो भवेत् ॥ १९ ॥
ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा ।
गद्यपद्यात्मकैः शब्दैरप्रमेयैर्विवक्षितैः ॥
अश्रुतो बुध्यते ग्रन्थः प्रायः सारस्वतः कविः ॥ २० ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

एकं ब्रह्मैवाद्वितीयं समस्तं
सत्यं सत्यं नेतरच्चास्ति किञ्चित् ।
एको रुद्रो न द्वितीयोऽवतस्थे
तस्मादेकं त्वां प्रपद्ये महेशम् ॥

स्कन्दपुराणम् - ४, १, १०, १२६.

O Lord, Thou art the one Brahman without a second. Thou art everything. Thou art the one Truth, and verily there is nothing but Thee. O Thou destroyer of misery, Thou alone exist eternally, and none besides. Therefore I take rufuge in Thee, the supreme Lord.

॥ कैवल्योपनिषत् ॥

प्रथमः खण्डः

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ अथाश्वलायनो भगवन्तं परमेष्ठिनमुपसमेत्योवाच –

अधीहि भगवन्ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् । ययाऽचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान् ॥ १ ॥

तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवैहि । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥ २ ॥

परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ॥ ३ ॥

ते ब्रह्मलोकेषु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे । विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरः शरीरः ॥ ४ ॥

अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य । हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ॥ ५ ॥

अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ।
तथाऽऽदिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ ६ ॥

उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ ७ ॥

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः ॥ ८ ॥

स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ ९ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
संपश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥ १० ॥

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ज्ञाननिर्मथनाभ्यासात् पाशं दहति पण्डितः ॥ ११ ॥

स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ।
स्त्रियन्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति ॥ १२ ॥

स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितजीवलोके ।
सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ १३ ॥

पुनश्च जन्मान्तरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः ।
पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् ॥
आधारमानन्दमखण्डबोधं यस्मिन् लयं याति पुरत्रयं च ॥ १४ ॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ १५ ॥
यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ १६ ॥
जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ १८ ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ १९ ॥

द्वितीयः खण्डः

अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विचित्रम् ।
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ १ ॥
अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः सशृणोम्यकर्णः ।
अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम् ॥ २ ॥
वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।
न पुण्यपापे मम नास्ति नाशो न जन्मदेहेन्द्रियबुद्धिरस्ति ॥ ३ ॥
न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च ।
एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ॥ ४ ॥

समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् । यः शतरुद्रीयमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आत्मपूतो भवति स सुरापानात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति स सुवर्णस्तेयात्पूतो भवति स कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्वित्याश्रमी सर्वदा सकृद्वा जपेत् । अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते कैवल्यं पदमश्नुत इति ॥ ५ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इत्यथर्ववेदे कैवल्योपनिषत्-समाप्ता ॥

सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः ॥

श्रीमद्भागवतम् - १०, २, २६.

O Lord, you are attainable through truthfulness alone. Thou art Truth in the past, present and future. You are the origin of entire creation and pervade it as its true essence. You are the embodiment of Truth. In Thee do we take refuge.

॥ ईशावास्योपनिषत् ॥

॥ घनपाठः ॥

[१]

ईशावास्यं वास्यमीशेशा वास्यमिद-मिदं वास्यं-मीशेशा वास्यमिदम् । वास्यमिदमिदं वास्यं वास्यमिदग्ं सर्वग्ं सर्वमिदं वास्यं वास्यमिदग्ं सर्वम्ँ । इदग्ं सर्वग्ं सर्व-मिदमिदग्ं सर्वं यद्यत्सर्वमिद-मिदग्ं सर्वं यत् ।

सर्वं यद्यत्सर्वग्ं सर्वं यत्किं किं यत्सर्वग्ं सर्वं यत्किम् । यत्किं किं यद्यत्किंचं च किं यद्यत्किंचं । किंचं च किं किं च जगंत्यां जगंत्यां च किं किं च जगंत्याम् । च जगंत्यां जगंत्यां च च जगंत्यां जग ज्जगज्जगंत्यां च च जगंत्यां जगंत् । जगंत्यां जगज्जगज्जगंत्यां जगंत्यां जगंत् । जगदिति जगंत् ।

तेनं त्यक्तेनं त्यक्तेन तेन तेनं त्यक्तेनं भुञ्जीथा भुञ्जीथा स्त्यक्तेन तेन तेनं त्यक्तेनं भुञ्जीथाः । त्यक्तेनं भुञ्जीथा भुञ्जीथा स्त्यक्तेनं त्यक्तेनं भुञ्जीथा मा मा भुंञ्जीथा-स्त्यक्तेनं त्यक्तेनं भुञ्जीथा मा ।

भुञ्जीथा मा मा भुंञ्जीथा भुञ्जीथा मा गृंधो गृधो मा भुंञ्जीथा भुञ्जीथा मा गृंधः । मा गृंधो गृधो मा मा गृंधः कस्य कस्यं गृधो मा मा गृंधः कस्यं । गृधः कस्य कस्यं गृधो गृधः कस्यंस्वित् स्वित्कस्यं गृधो गृधः कस्यंस्वित् ।

कस्यंस्वित्-स्वित्कस्य कस्यंस्विद्धनं धनंगं्-स्वित्कस्य कस्यंस्विद्धनम्ँ । स्विद्धनं धनंगं् स्वित् स्विद्धनम्ँ । धनमिति धनम्ँ ॥

[२]

कुर्वन्नेवैव कुर्वन्कुर्वन्नेवेहे हैव कुर्वन् कुर्वन्नेवेह । एवेहे हैवैवेह कर्माँणि कर्माँणी हैवैवेह कर्माँणि । इह कर्माँणि कर्माँणी हेह कर्माँणि जिजीविषे-ज्जिंजीविषेत् कर्माँणी हेह कर्माँणि जिजीविषेत् ।

कर्माँणि जिजीविषेज्जिंजीविषेत् कर्माँणि कर्माँणि जिजीविषे-च्छतग्ं शतं जिंजीविषेत् कर्माँणि कर्माँणि जिजीविषेच्छतम् । जिजीविषेच्छतग्ं शतं जिंजीविषेज्जिंजीविषेच्छतग्ं समा स्समाँश्शतं जिंजीविषेज्जिंजीविषे-च्छतग्ं समाँः । शतग्ं समा स्समाँश्शतग्ं शतग्ं समाँः । समा इति समाँः ।

एवं त्वयि त्वय्येवमेवं त्वयि न न त्वय्येवमेवं त्वयि न । त्वयि न न त्वयि त्वयि नान्यथान्यथा न त्वयि त्वयि नान्यथाँ । नान्यथान्यथा ननान्यथेत इतोन्यथा ननान्यथेतः ।

अन्यथेत इतोन्यथान्यथेतोँऽस्त्यस्ती-तोन्यथान्यथेतोँऽस्ति । इतोँस्त्यस्तीत इतोँऽस्ति ननास्तीत इतोँऽस्तिन । अस्तिनना-स्त्यंस्ति न कर्म कर्म ना-स्त्यंस्ति न कर्मँ ।

न कर्म कर्म न न कर्मं लिप्यते लिप्यते कर्म न न कर्मं लिप्यते। कर्मं लिप्यते लिप्यते कर्म कर्मं लिप्यते नरे नरेँ लिप्यते कर्म कर्मं लिप्यते नरेँ। लिप्यते नरे नरेँ लिप्यते लिप्यते नरेँ। नर इति नरेँ॥

[३]

असुर्या नाम नामाँसुर्याँ असुर्या नाम ते ते नामाँसुर्याँ असुर्या नामते नामतेते नाम नामते लोका लोकास्ते नामनामते लोकाः।

ते लोका लोकास्ते ते लोका अन्धे नान्धेनं लोकास्ते ते लोका अन्धेनं। लोका अन्धेनान्धेनं लोका लोका अन्धेन तमसा तमसान्धेनं लोका लोका अन्धेन तमसा।

अन्धेन तमसा तमसान्धेनान्धेन तमसावृता आवृता स्तमसान्धेनान्धेन तमसावृताः। तमसावृता आवृतास्तमसा तमसावृताः। आवृता इत्याऽवृताः।

ताग्स्तेते ताग्स्ताग्स्ते प्रेत्य प्रेत्यते ताग्स्ताग्स्ते प्रेत्यं। ते प्रेत्य प्रेत्यते ते प्रेत्याभ्यभि प्रेत्यते ते प्रेत्याभि।

प्रेत्याभ्यभिप्रेत्य प्रेत्याभि गंच्छन्ति गच्छन्त्यभि प्रेत्य प्रेत्याभि गंच्छन्ति। प्रेत्येति प्रऽइत्य।

अभिगंच्छन्ति गच्छन्त्यभ्यभि गंच्छन्ति ये ये गंच्छन्त्यभ्यभिगंच्छन्ति ये। गच्छन्ति ये ये गंच्छन्ति गच्छन्ति ये के के ये गंच्छन्ति गच्छन्ति ये के।

ये-के के-ये ये-के-चं च-के-ये ये-के चं । के-चं च-के के-चाँत्महनं आत्महनश्च के के चाँत्महनः । चात्महनं आत्महनश्च चात्महनो जना जनाँ आत्महनश्च चात्महनो जनाँः । आत्महनो जना जनाँ आत्महनं आत्महनो जनाँः । आत्महन इत्याँत्माऽहनः । जना इति जनाँः ॥

[४]

अनेँजदेक मेक मनेँ जदनेँ जदेकं मनसो मनस एकमनेँ जदनेँ जदेकं मनसः । एकं मनसो मनस एकमेकं मनसो जवीँयो जवीँयो मनस एक मेकं मनसो जवीँयः । मनसो जवीँयो जवीँयो मनसो मनसो जवीँयो न न जवीँयो मनसो मनसो जवीँयोन ।

जवीँयोन न जवीँयो जवीँयो नैनं दे नन्न जवीँयो जवीँयो नैनत् । नैनंदे नन्न नैनंद्देवा देवा एंनन्न नैनंद्देवाः । एनद्देवा देवा एंनदेनद्देवा आँप्नुवन्नाप्नुवन्देवा एंनदेनद्देवा आँप्नुवन् ।

देवा आँप्नुवन्नाप्नुवन्देवा देवा आँप्नु वन् पूर्वं पूर्वमाप्नुवन्देवा देवा आँप्नुवन्पूर्वमँ् ।

आप्नुवन्पूर्वं पूर्वमाप्नुवन्नाप्नुवन् पूर्व मर्षदर्षत् पूर्वमाप्नुवन्नाप्नुवन् पूर्वमर्षत् । पूर्व मर्षदर्षत् पूर्वं पूर्व मर्षत् । अर्षदित्यर्षत् ।

तद्धावंतो धावंतस्तत्तद्धावंतोन्या नन्न्यान् धावंत-स्तत्तद्धावंतो-

न्यान् । धावंतोन्या-नन्यान् धावंतो धावंतोन्या-नत्यत्यन्यान् धावंतो धावंतोन्न्यानतिं ।

अन्न्यानत्य-त्यन्न्या-नन्न्यान-त्येँत्ये-त्यन्नानन्न्या-नत्येँति । अत्येँत्ये-त्यत्यत्येँति तिष्ठत्तिष्ठंदे-त्यत्यत्येँति तिष्ठंत् । एति तिष्ठत्तिष्ठंदेत्येति तिष्ठत्त-स्मिग्ग्-स्तस्मिग्ग्-स्तिष्ठंदेत्येति तिष्ठत्तस्मिन्न्ँ । तिष्ठत्तस्मिग्ग्-स्तस्मिग्ग्-स्तिष्ठ-त्तिष्ठत्तस्मिन्न्ँनपो पस्तस्मिग्ग्-स्तिष्ठ त्तिष्ठत्तस्मिन्न्ँनपः ।

तस्मिन्न्ँनपो पस्तस्मिग्ग्-स्तस्मिन्न्ँनपो माँतरिश्वाँ मातरिश्वा पस्तस्मिग्ग्-स्तस्मिन्न्ँनपो माँतरिश्वाँ । अपो माँतरिश्वाँ मातरिश्वा पोपो माँतरिश्वाँ दधाति दधाति मातरिश्वा पोपो माँतरिश्वाँ दधाति । मातरिश्वाँ दधाति दधाति मातरिश्वाँ मातरिश्वाँ दधाति । दधातीतिं दधाति ॥

[५]

तदेँजत्ये-जति तत्तदेँजति ननैजंति तत्त-देँजतिन । एजतिन नैजंत्येजति नेजंत्येजति नैजंत्ये जति नेजंति । नेजंत्ये-जति ननेजंति दूरे दूर एँजति ननेजंति दूरे ।

एजति दूरे दूर एँजत्येजति दूर उं अन्तिकेँन्तिक उं दूर एँजत्येजति दूर उं अन्तिके । दूर उं अन्तिकेँन्तिक उं दूरे दूर उं अन्तिके । ऊं इत्यूँम् । अन्तिक इत्यन्न्ँतिके ।

अन्तरस्या-स्यान्तरन्तरस्य सर्वस्य सर्वस्यास्यान्तरन्तरस्य सर्वस्य । अस्य सर्वस्य सर्वस्यास्यास्य सर्वस्यो सर्वस्य सर्वस्यो सर्वस्यास्यास्य सर्वस्यो सर्वस्य ।

सर्वस्यो सर्वस्य सर्वस्यो सर्वस्य सर्वस्यो सर्वस्यास्यास्य सर्वस्यो सर्वस्य सर्वस्यो सर्वस्यास्य । ऊं इत्यूँम् ।

सर्वस्यास्यास्य सर्वस्य सर्वस्यास्य बाह्यतो बाँह्यतोँस्य सर्वस्य सर्वस्यास्य बाह्यतः । अस्यबाह्यतो बाँह्यतोँस्यास्य बाह्यतः । बाह्यत इति बाह्यतः ॥

[६]

यस्तु तु यो यस्तु सर्वाँणि सर्वाँणि तु यो यस्तु सर्वाँणि । तु सर्वाँणि सर्वाँणि तु तु सर्वाँणि भूतानिं भूतानि सर्वाँणि तु तु सर्वाँणि भूतानिं ।

सर्वाँणि भूतानिं भूतानि सर्वाँणि सर्वाँणि भूतान्यात्मन्नात्मन् भूतानि सर्वाँणि सर्वाँणि भूतान्यात्मन् । भूतान्यात्मन्नात्मन् भूतानिं भूतान्यात्मन्नेवैवात्मन् भूतानिं भूतान्-न्यात्मन्नेव ।

आत्मन्नेवैवात्मन्नात्मन्नेवानु पश्यंत्यनु पश्यंत्ये-वात्मन्नात्मन्नेवानु पश्यंति । एवानु पश्यंत्यनु-पश्यंत्येवै-वानु-पश्यंति । अनु पश्यतीत्यंनुऽपश्यंति ।

सर्वभूतेषुं च च सर्वभूतेषुं सर्वभूतेषुं चात्मानंमात्मानँं च सर्व भूतेषुं सर्वभूतेषुं चात्मानम्ँ । सर्वभूतेष्वितिं सर्वभूतेषुं ।

चात्मानं-मात्मानँं च चात्मानं ततस्ततं आत्मानँं च चात्मानन्ततः । आत्मानं ततस्ततं आत्मानंमात्मानं ततो न न ततं आत्मानंमात्मानं ततो न ।

ततो न न ततस्ततो न विविन ततस्ततो नवि । नविविन नविजुंगुप्सते जुगुप्सते विन नविजुंगुप्सते । विजुंगुप्सते जुगुप्सते विविजुंगुप्सते । जुगुप्सत इतिं जुगुप्सते ॥

[७]

यस्मिन् सर्वाँणि सर्वाँणि यस्मिन्यस्मिन् सर्वाँणि भूतानिं भूतानि सर्वाँणि यस्मिन्यस्मिन् सर्वाँणि भूतानिं ।

सर्वाँणि भूतानिं भूतानि सर्वाँणि सर्वाँणि भूतान्यात्मात्मा भूतानि सर्वाँणि सर्वाँणि भूतान्यात्मा ।

भूतान्यात्मात्मा भूतानिं भूतान्यात्मैवै वात्मा भूतानिं भूतान्यात्मैव ।

आत्मैवैवात्मात्मैवा भूदभूँदेवात्मात्मै वा भूँत्। एवा भूद भूँदेवैवा भूँद्विजानतो विंजानतो भूँदेवैवा भूँद्विजानतः । अभूँद्विजानतो विंजानतोऽभूद भूँद्विजानतः । विजानत इतिं विऽजानतः ।

तत्र कः कस्तत्र तत्र को मोहो मोहः कस्तत्र तत्र को मोहः । को मोहो मोहः कः को मोहः कः को मोहः कः को मोहः कः ।

मोहः कः को मोहो मोहः कश्शोकश्शोकः को मोहो मोहः कश्शोकः ।

कश्शोकश्शोकः कः कश्शोकं एकत्व मेकत्वग्ग् शोकः कः कः शोकं एकत्वम् । शोकं एकत्वमेकत्वग्ग् शोकः शोकं एकत्व मनुपश्यतोऽनु पश्यत एकत्वग्ग् शोकः शोकं एकत्व-मनुपश्यतः ।

एकत्वमनु-पश्यतोऽनुपश्यत एकत्व-मेकत्व-मनुपश्यतः । एकत्वमित्येकत्वम् । अनुपश्यत इत्यनुऽपश्यतः ॥

[८]

स परि परि स स पर्यगादगात्परि स स पर्यगात् । पर्यगादगात्परि पर्यगाच्छुक्रग्ग् शुक्रमगात्परि पर्य-गाच्छुक्रम् । अगाच्छुक्रग्ग् शुक्रमगादगा-च्छुक्रमकाय-मकायग्ग् शुक्रमगादगाच्छुक्रमकायम् ।

शुक्रमकाय-मकायग्ग् शुक्रग्ग् शुक्रमकाय-मव्रणमव्रण मकायग्ग् शुक्रग्ग् शुक्रमकाय-मव्रणम् ।

अकायमव्रण-मव्रणमकाय-मकाय-मव्रणमस्नाविर-मस्नाविरमव्रण-मकायमकाय-मव्रण-मस्नाविरम् ।

अव्रणमस्नाविर-मस्नाविर-मव्रणमव्रण-मस्नाविरग्ग् शुद्धग्ग् शुद्धमस्नाविर-मव्रणमव्रण-मस्नाविरग्ग् शुद्धम् ।

अस्नाविरग्ग् शुद्धग्ग् शुद्धमंस्नाविर-मंस्नाविरग्ग् शुद्धमपाँप विद्धमपाँप विद्धग्ग् शुद्धमंस्नाविर-मंस्नाविरग्ग् शुद्धमपाँप विद्धम् ।

शुद्धमपाँप विद्धमपाँप विद्धग्ग् शुद्धग्ग् शुद्धमपाँप विद्धम् । अपाँपविद्ध-मित्यपाँपऽविद्धम् ।

कविर्मंनीषी मंनीषी कविः कविर्मंनीषी पंरिभूः पंरिभू-र्मंनीषी कविः कवि-र्मंनीषी पंरिभूः ।

मनीषी पंरिभूः पंरिभू-र्मंनीषी मंनीषी पंरिभू-स्वंयम्भू स्स्वंयम्भूः पंरिभू-र्मंनीषी मंनीषी पंरिभू-स्वंयम्भूः ।

परिभू-स्वंयम्भू-स्वंयम्भूः पंरिभूः पंरिभू-स्वंयम्भूर्याँथा तथ्यतो याँथा तथ्यत-स्स्वंयम्भूः पंरिभूः पंरिभूः स्वंयं-भूर्याँथा तथ्यतः । परिभूरितिं परिऽभूः ।

स्वयम्भूर्याँथा तथ्यतो याँथा तथ्यतः स्वंयम्भू-स्स्वंयम्भूर्याँथा तथ्यतोर्था-नर्थाँ-न्याथा तथ्यतः स्वंयम्भू-स्स्वंयं-भूर्याँथा तथ्यतोर्थान् । स्वयं-भूरितिं स्वयंऽभूः ।

याथा-तथ्यतोर्था-नर्थाँन्याथा तथ्यतो-याँथा तथ्यतोर्थान्वि व्यर्थाँन्याथा-तथ्यतो याँथा-तथ्यतोर्थान्वि । याथा-तथ्यत इतिं याथाऽतथ्यतः ।

अर्थान्वि व्यर्था-नर्था-न्व्यंदधा ददधाद्व्यर्था-नर्थान् व्यंदधात् ।

व्यंदधाद धधाद्धि व्यंधधाच्छा-श्वतीभ्यंः शाश्वतीभ्योंऽदधाद्धि व्यंदधाच्छाश्वतीभ्यंः ।

अदधाच्छाश्वतीभ्यंः शाश्वतीभ्यों दधाद दधाच्छाश्वतीभ्यः समाँभ्य-स्समाँभ्यः शाश्वतीभ्यों दधा ददधाच्छाश्वतीभ्यः समाँभ्यः ।

शाश्वतीभ्य-स्समाँभ्यः समाँभ्यः शाश्वतीभ्यंः शाश्वतीभ्य स्समाँभ्यः । समाँभ्य इति समाँभ्यः ॥

[९]

अन्धं तमस्तमोन्धमन्धं तमः प्र प्र तमोन्धमन्धं तमः प्र ।

तमः प्र प्र तमस्तमः प्रविंशन्ति विशन्ति प्र तमस्तमः प्रविंशन्ति । प्रविंशन्ति विशन्ति प्र प्रविंशन्ति ये ये विंशन्ति प्र प्रविंशन्ति ये ।

विशन्ति ये ये विंशन्ति विशन्ति ये विंद्यामविंद्यां ये विंशन्ति विशन्ति ये विंद्याम् ।

ये विंद्यामविंद्यां ये ये विंद्या-मुपासंत उपासते विंद्यां ये ये विंद्यामुपासंते । अविंद्यामुपासंत उपासतेऽविंद्या-मविंद्यामुपासंते । उपासंत इत्युंपऽआसंते ।

ततो भूयं इव भूयं इव ततस्ततो भूयं इव ते ते भूयं इव ततस्ततो भूयं इव ते । भूयं इव ते ते भूयं इव भूयं इव ते

तम॒स्तम॒स्ते भूय॑ इव॒ भूय॑ इव॒ ते तम॑: । भूय॑ इ॒वेति॒ भूय॑: इव ।

ते तम॒स्तम॒स्ते ते तमो॒ ये ये तम॒स्तेते तमो॒ ये । तमो॒ ये ये तम॒ स्तमो॒ य उं॑ वि॒द्यायाँ॑ वि॒द्याँयामु॒ये तम॒स्तमो॒ य उं॑ वि॒द्यायाँ॑म् । य उं॑ वि॒द्यायाँ॑ वि॒द्यायाँ॑मु॒ये य उं॑ वि॒द्यायाँ॑ग् र॒ता र॒ता वि॒द्यायाँ॑मु॒ये य उं॑ वि॒द्यायाँ॑ग् र॒ताः । ऊं॒ इत्यूँ॑म् । वि॒द्यायाँ॑ग् र॒ता र॒ता वि॒द्यायाँ॑ वि॒द्यायाँ॑ग् र॒ताः । र॒ता इति॑ र॒ताः ॥

[१०]

अ॒न्यदे॒वैवान्य-द॒न्य दे॒वाहु॒राहु॒रे॒वान्य-द॒न्य दे॒वाहुः । ए॒वा-हु॒राहु॒रे॒वैवाहु-र्वि॒द्यया॑ वि॒द्यया-हु॒रे॒वैवाहु-र्वि॒द्यया॑ । आहु॒र्वि॒द्यया॑ वि॒द्यया॒हु॒राहु वि॒द्यया॒न्यद॒न्य-द्वि॒द्यया॒हु-राहु-र्वि॒द्यया॒न्यत् । वि॒द्यया॒न्य-द॒न्यद्वि॒द्यया॑ वि॒द्यया॒न्य-दा॑हु-राहु-र॒न्य-द्वि॒द्यया॑ वि॒द्यया॒न्यदा॑हुः । अ॒न्यदा॑हुराहु-र॒न्यद॒न्य-दा॑हुर-विं॒द्या विं॒द्या-हु॒र॒न्यद॒न्य-दा॑हुर-विं॒द्या । आ॒हु॒र-विं॒द्या विं॒द्याहुराहुर-विं॒द्या । अविं॒द्येत्यविं॒द्या । इति॑ शुश्रुम शुश्रु॒मेतीति॑ शुश्रु॒म धीरा॑णां॒ धीरा॑णाग् शुश्रु॒मेतीति॑ शुश्रु॒म धीरा॑णाम् । शु॒श्रु॒म धीरा॑णां॒ धीरा॑णाग् शुश्रुम शुश्रु॒म धीरा॑णां॒ ये ये धीरा॑णाग् शुश्रुम शुश्रु॒म धीरा॑णां॒ ये । धीरा॑णां॒ ये ये धीरा॑णां॒ धीरा॑णां॒ ये नो॑ नो॒ ये धीरा॑णां॒ धीरा॑णां॒ ये नः । ये नो॑ नो॒ ये ये न॒स्तन्नो॒ ये ये न॒स्तत् । न॒स्तत्तन्नो॑

न॒स्तद्वि॑चचक्षि॒रे वि॑चचक्षि॒रे तन्नो॑ न॒स्तद्वि॑चचक्षि॒रे । तद्वि॑चचक्षि॒रे वि॑चचक्षि॒रे तत्तद्वि॑चचक्षि॒रे । वि॒च॒च॒क्षि॒र इति॑ वि॒च॒च॒क्षि॒रे ॥

[११]

वि॒द्यां च॑ च वि॒द्यां वि॒द्यां चा वि॑द्या॒मवि॑द्यां च वि॒द्यां वि॒द्यां चा वि॑द्यां । चा वि॑द्या॒मवि॑द्यां च॒ चा वि॑द्यां च॒ चा वि॑द्यां च॒ चा वि॑द्यां च । अवि॑द्यां च॒ चा वि॑द्या॒मवि॑द्यां च॒ योयश्चा वि॑द्या॒मवि॑द्यां च॒ यः । च॒ यो यश्च॑ चयस्तत्तद्यश्च॑ च॒ यस्तत् ।

यस्तत्तद्यो यस्तद्वेद॒ वेद॒ तद्यो यस्तद्वेद॑ । तद्वेद॒ वेद॒ तत्तद्वेदो॒भय॑-मु॒भय॒ं वेद॒ तत्तद्वेदो॒भय॑म् ।

वेदो॒भय॑मु॒भय॒ं वेद॒ वेदो॒भय॑ग्ग् स॒ह स॒हो-भय॒ं वेद॒ वेदो॒भय॑ग्ग् स॒ह । उ॒भय॑ग्स॒ह स॒होभय॑मु॒भय॑ग्ग् स॒ह । स॒हेति॑ स॒ह । अवि॑द्यया मृ॒त्यु॑ं मृ॒त्युमवि॑द्यया वि॑द्यया मृ॒त्यु॑ं ती॒र्त्वा ती॒र्त्वा मृ॒त्युमवि॑द्यया वि॑द्यया मृ॒त्यु॑ं ती॒र्त्वा ।

मृ॒त्यु॑ं ती॒र्त्वा ती॒र्त्वा मृ॒त्यु॑ं मृ॒त्यु॑ं ती॒र्त्वा वि॒द्यया॑ वि॒द्यया॑ती॒र्त्वा मृ॒त्यु॑ं मृ॒त्यु॑ं ती॒र्त्वा वि॒द्यया॑ । ती॒र्त्वा वि॒द्यया॑ वि॒द्यया॑ ती॒र्त्वा ती॒र्त्वा वि॒द्यया॑मृ॒त॑म॒मृत॑म् वि॒द्यया॑ ती॒र्त्वा ती॒र्त्वा वि॒द्यया॒ मृत॑म् । वि॒द्यया॑मृ॒त॑म॒मृत॑म् वि॒द्यया॑ वि॒द्यया॑मृ॒त॑मश्नुते श्नु॒ते॒मृत॑म् वि॒द्यया॑ वि॒द्यया॑मृ॒त॑मश्नुते । अ॒मृत॑मश्नुते श्नु॒ते॒मृत॑-म॒मृत॑-मश्नुते । अ॒श्नु॒त इत्य॑श्नुते ॥

[१२]

अन्धं तमस्तमोन्धमन्धं तमः प्र प्र तमोन्धमन्ध तमः प्र । तमः प्र प्र तमस्तमः प्रविंशन्ति विशन्ति प्र तमस्तमः प्रविंशन्ति । प्रविंशन्ति विशन्ति प्र प्रविंशन्ति ये ये विंशन्ति प्र प्रविंशन्ति ये । विशन्ति ये ये विंशन्ति विशन्ति ये सँभूतिमसँभूतिं ये विंशन्ति विशन्ति ये सँभूतिम् । ये सँभूतिम-सँभूतिं ये ये सँभूतिमुपासंत उपासते सँभूतिं ये ये सँभूतिमुपासंते । असँभूति-मुपासंत उपासते सँभूति-मसँभूति-मुपासंते । असँभूति मित्य-सँडभूतिम् । उपासंत इत्युपऽआसंते ।

ततो भूयं इव भूयं इव ततस्ततो भूयं इव ते ते भूयं इव ततस्ततो भूयं इव ते । भूयं इव ते ते भूयं इव भूयं इव ते तमस्तमस्ते भूयं इव भूयं इव ते तमंः ।

भूयं इवेति भूयंःऽइव । ते तमस्तमस्ते ते तमो ये ये तमस्ते ते तमो ये ।

तमो ये ये तमस्तमो य उ संभूँत्याग्ग् संभूँत्यामुये तमस्तमो य उ संभूँत्याम् । य उ संभूँत्याग्ग् संभूँत्यामुये य उ संभूँत्याग्ग् रता रतास्संभूँत्यामुये य उ संभूँत्याग्ग् रताः । ऊं इत्यूँम् । संभूँत्याग्ग् रता रताः संभूँत्याग्ग् संभूँत्याग्ग् रताः । संभूँत्यामिति संऽभूँत्याम् । रता इतिं रताः ॥

[१३]

अन्यदेवैवान्य-दन्यदेवाहुराहु-रेवान्य-दन्य देवाहुः। एवा-हुराहुरेवैवाहु-स्सँम्भवात्सँम्भवा-दाहुरेवैवाहु-स्सँम्भवात् । आहुः सँम्भवात्सँम्भवा-दाहुराहुः सँम्भवा-दन्य-दन्य-त्सँम्भवादाहुराहु-स्सँम्भवा-दन्यत् । सम्भवा-दन्य-दन्य-त्सँम्भवा-त्सँम्भवा-दन्य-दाँहुराहु-रन्य-त्सँम्भवा-त्सँम्भवादन्यदाँहुः । सम्भवादितिं सम्भवात् ।

अन्यदाँहु-राहुरन्य-दन्यदाँहुर सँम्भवाद-सँम्भवा-दाहु-रन्य-दन्य-दाँहुर सँम्भवात्। आहुर सँम्भवाद-सँम्भवा-दाहुराहुर सँम्भवात्। असँम्भवादित्य सँम्भवात् ।

इतिं शुश्रुम शुश्रुमेतीतिं शुश्रुम धीराँणां धीराँणाग्ग् शुश्रुमेतीतिं शुश्रुम धीराँणाम् ।

शुश्रुम धीराँणां धीराँणाग्ग् शुश्रुम शुश्रुम धीराँणां ये ये धीराँणाग्ग् शुश्रुम शुश्रुम धीराँणां ये । धीराँणां ये ये धीराँणां धीराँणां ये नोँ नो ये धीराँणां धीराँणां ये नः। ये नोँ नो ये ये नस्तत्तन्नो ये ये नस्तत्। नस्तत्तन्नोँ नस्त-द्विंचचक्षिरे विंचचक्षिरे तन्नोँ नस्तद्विंचचक्षिरे। तद्विंचचक्षिरे विंचचक्षिरे तत्तद्विंचचक्षिरे। विचचक्षिर इतिं विऽचचक्षिरे ॥

[१४]

संभूँतिं च च संभूँतिग्ग् संभूँतिं च विनाशं विंनाशं च संभूँतिग्ग् संभूँतिं च विनाशम् । संभूँति-मिति संऽभूँतिम् । च विनाशं विंनाशं चं च विनाशं चं च विनाशं चं च विनाशं चं ।

विनाशं चं च विनाशं विंनाशं च यो यश्च विनाशं विंनाशं च यः । विनाशमितिं विऽनाशम् ।

च यो यश्च च यस्तत्तद्यश्च च यस्तत् । यस्तत्तद्यो यस्तद्वेद वेदतद्यो यस्तद्वेदं । तद्वेद वेद तत्तद्वेदोभयं-मुभयं वेद तत्तद्वेदो-भयम्ँ ।

वेदोभयं-मुभयं वेद वेदोभयंग्ग् सह सहो-भयं वेद वेदोभयंग्ग् सह उभयंग्ग् सह सहो-भयं-मुभयंग्ग् सह सहेतिं सह ।

विनाशेनं मृत्युं मृत्युं विंनाशेनं विनाशेनं मृत्युं तीर्त्वा तीर्त्वा मृत्युं विंनाशेनं विनाशेनं मृत्युं तीर्त्वा । विनाशेनेतिं विऽनाशेनं ।

मृत्युं तीर्त्वा तीर्त्वा मृत्युं मृत्युं तीर्त्वा संभूँत्या संभूँत्या तीर्त्वा मृत्युं मृत्युं तीर्त्वा संभूँत्या । तीर्त्वा संभूँत्या संभूँत्या तीर्त्वा तीर्त्वा संभूँत्यामृतं-ममृतग्ग् संभूँत्या तीर्त्वा तीर्त्वा संभूँत्यामृतम्ँ । संभूँत्यामृतं-ममृतग्ग् संभूँत्या संभूँत्यामृतं-मश्नुते श्नुते मृतग्ग् संभूँत्या संभूँत्यामृतमश्नुते । संभूत्येति संऽभूँत्या । अमृतमश्नुते श्नुते-मृतममृतं-मश्नुते । अश्नुत इत्यश्नुते ॥

[१५]

हिरण्मयेन पात्रेण पात्रेण हिरण्मयेन हिरण्मयेन पात्रेण सत्यस्यं सत्यस्य पात्रेण हिरण्मयेन हिरण्मयेन पात्रेण सत्यस्यं। पात्रेण सत्यस्यं सत्यस्य पात्रेण पात्रेण सत्यस्यापिंहित-मपिंहितग्ग् सत्यस्य पात्रेण पात्रेण सत्यस्यापिंहितम्।

सत्यस्यापिंहित-मपिंहितग्ग् सत्यस्यं सत्यस्यापिंहितं मुखं मुखमपिंहितग्ग् सत्यस्यं सत्यस्यापिंहितं मुखम्।

अपिंहितं मुखं मुखमपिंहित-मपिंहितं मुखम्। अपिंहित मित्यपिंऽहितम्। मुखमिति मुखम्।

तत्त्वं त्वं तत्तत्वं पूषन् पूषग्ग्-स्त्वं तत्तत्वं पूषन्। त्वं पूषन् पूषग्ग्-स्त्वं त्वं पूषन्नपापं पूषग्ग्-स्त्वं त्वं पूषन्नपं।

पूषन्नपापं पूषन् पूषन्नपावृणु वृण्वापं पूषन् पूषन्नपावृणु। अपावृणु वृण्वापापा-वृणु सत्य धर्माय सत्य धर्माय वृण्वापापा-वृणु सत्यधर्माय आवृणु।

वृणुसत्य-धर्माय सत्य-धर्माय वृणु वृणु सत्य-धर्माय दृष्टये दृष्टये सत्य-धर्माय वृणु वृणु सत्य-धर्माय दृष्टये॥

सत्यधर्माय दृष्टये दृष्टये सत्य धर्माय सत्यधर्माय दृष्टये। सत्यधर्मायेतिं सत्यऽधर्माय। दृष्टय इतिं दृष्टये॥

[१६]

पूषँन्नेक ऋष एकऋषे पूषन् पूषँन्नेक ऋषे यम यमैक ऋषे पूषन् पूषँन्नेक ऋषे यम। एक ऋषे यम यमैक ऋष एक ऋषे यम सूर्य सूर्य यमैक ऋष एक ऋषे यम सूर्य । एक ऋष इत्यैँकऽऋषे ।

यम सूर्य सूर्य यम यम सूर्य प्राजाँपत्य प्राजाँपत्य सूर्य यम यम सूर्य प्राजाँपत्य । सूर्य प्राजाँपत्य प्राजाँपत्य सूर्य सूर्य प्राजाँपत्य वि वि प्राजाँपत्य सूर्य सूर्य प्राजाँपत्य वि। प्राजाँपत्य वि वि प्राजाँपत्य प्राजाँपत्य व्यूँहोह वि प्राजाँपत्य प्राजाँपत्य व्यूँह । प्राजाँपत्येति प्राजाँऽपत्य ।

व्यूँहोह वि व्यूँह रश्मीन् रश्मीनूँह विव्यूँह रश्मीन् । ऊहरश्मीन् रश्मीनूँ-होह रश्मीन् सग्ग् सग्ग् रश्मीनूँ-होह रश्मीन्सम् । रश्मीन् सग्ग् सग्ग् रश्मीन् रश्मीन् समूँहोंह सग्ग् रश्मीन् रश्मीन् समूँह ।

समूँहोह सग्ग् समूँह तेजस्तेजं ऊह सग्ग् समूँह तेजः। ऊह तेजस्तेजं ऊहोह तेजो यद्यत्तेजं ऊहोह तेजो यत् ।

तेजो यद्यत्तेजस्तेजो यत्तँ ते यत्तेज-स्तेजो यत्तँ। यत्तँ ते यद्यत्तँ रूपग्ग् रूपन्ते यद्यत्तँ रूपम्। ते रूपग्ग् रूपं तँ ते रूपं कल्याँण-तमं कल्याँण-तमग्ग् रूपं तँ ते रूपं कल्याँण-तमम् । रूपं

कल्याँण-तमं॑ कल्याँण-तमग्ग् रूपग्ग् रूपं॑ कल्याँण-तमं॑ तत्तत्कल्याँण-तमग्ग् रूपग्ग् रूपं॑ कल्याँण-तमं॑ तत् । कल्याँण-तमं॑ तत्तत्कल्याँण-तमं॑ कल्याँण-तमं॑ तत्तै॑ ते॑ तत्कल्याँण-तमं॑ कल्याँण-तमं॑ तत्ते॑ । कल्याँण-तमिति॑ कल्याँणऽतमम् ।

तत्तै॑ ते॑ तत्तत्तै॑ पश्यामि पश्यामि ते॑ तत्तत्तै॑ पश्यामि । ते॑ पश्यामि॑ पश्यामि॑ ते॑ ते॑ पश्यामि॑ । पश्यामीति॑ पश्यामि ।

यो॑ सा असौ यो यो॑ सा वसा असा असौ यो यो॑ सा वसौ । असा वसा असा असा असावसौ पुरुषः॑ पुरुषो॑सा असा असावसौ पुरुषः । असौ पुरुषः॑ पुरुषो॑ सा असौ पुरुषः॑ स स पुरुषो॑ सा असौ पुरुषस्सः । पुरुषस्स स पुरुषः॑ पुरुषस्सो॑हमहग्ग् स पुरुषः॑ पुरुषस्सो॑हं । सो॑हमहग्ग् स सो॑ह-मस्म्य-स्म्यहग्ग् स सो॑हमस्मि । अहमस्म्य-स्म्यह-महमस्मि । अस्मीत्यस्मि ॥

[१७]

वायु-रनिलं॑-मनिलं वायुर्वायु-रनिल-ममृतं॑-ममृत-मनिलं वायु-र्वायु-रनिल-ममृतम्॑ । अनिल-ममृतं॑-ममृत-मनिलं॑-मनिल-ममृत-मथाथामृत-मनिलं॑-मनिल-ममृतमथं॑ । अमृत-मथाधामृतं॑-ममृत-मथेद-मिदमथामृतं॑-ममृत-मथेदम् । अथेद-मिद-मथाथेदं भस्मा॑न्तं॑ भस्मा॑न्तमिद मथाथेदं भस्मा॑न्तम् । इदं भस्मा॑न्तं॑ भस्मा॑न्तमिदमिदं भस्मा॑न्तग्ग् शरी॑रग्ग् शरी॑रं॑ भस्मा॑न्तमिदमिदं भस्मा॑न्तग्ग् शरी॑रम् ।

भस्मॉन्तग्ग् शरीरग्ग् शरीरं भस्मॉन्तं भस्मॉन्तग्ग् शरीरम् । भस्मॉन्तमिति भस्मंऽअन्तम् । शरीरमिति शरीरम् ।

ॐ ३ क्रतो क्रत ॐ ३ मों ३ क्रतो स्मर स्मर क्रत ॐ ३ मों ३ क्रतो स्मरं ।

क्रतो स्मर स्मर क्रतो क्रतो स्मरं कृतं कृतग्ग् स्मर क्रतो क्रतो स्मरं कृतम् ।

क्रतो इति क्रतॉ । स्मरं कृतं कृतग्ग् स्मर स्मरं कृतग्ग् स्मंर स्मर कृतग्ग् स्मर स्मरं कृतग्ग् स्मंर । कृतग्ग् स्मंर स्मर कृतं कृतग्ग् स्मंर क्रतो क्रतॉ स्मर कृतं कृतग्ग् स्मंर क्रतॉ ।

स्मर क्रतो क्रतॉ स्मर स्मर क्रतो स्मर स्मर क्रतॉ स्मर स्मर क्रतो स्मरं ।

क्रतो स्मर स्मर क्रतो क्रतो स्मरं कृतं कृतग्ग् स्मर क्रतो क्रतो स्मरं कृतम् । क्रतो इति क्रतॉ ।

स्मरं कृतं कृतग्ग् स्मर स्मरं कृतग्ग् स्मंर स्मर कृतग्ग् स्मर स्मरं कृतग्ग् स्मंर । कृतग्ग् स्मंर स्मर कृतं कृतग्ग् स्मंर । स्मरेतिं स्मर ॥

[१८]

अग्ने नय नयाग्नेग्ने नयं सुपथॉ सुपथा नयाग्नेग्ने नयं सुपथॉ । नयं सुपथॉ सुपथा नय नयं सुपथॉ राये राये सुपथा नय नयं सुपथॉ राये । सुपथॉ राये राये सुपथॉ सुपथॉ राये अस्मानस्मान् राये

सुपथाँ सुपथाँ राये अस्मान्। सुपथेतिं सुपथाँ। राये अस्मानस्मान् राये राये अस्मान्विश्वांनि विश्वाँन्यस्मान् राये राये अस्मान्विश्वांनि।

अस्मान्विश्वांनि विश्वाँन्यस्मानस्मान्विश्वांनि देव देव विश्वाँन्यस्मानस्मान्विश्वांनि देव। विश्वांनि देव देव विश्वांनि विश्वांनि देव वयुनांनि वयुनांनि देव विश्वांनि विश्वांनि देव वयुनांनि। देव वयुनांनि वयुनांनि देव देव वयुनांनि विद्वान् विद्वान् वयुनांनि देव देव वयुनांनि विद्वान्। वयुनांनि विद्वान् विद्वान् वयुनांनि वयुनांनि विद्वान्। विद्वानितिं विद्वान्। युयोध्यस्म-दस्मद्युयोधि युयोध्यस्म-ज्जुहुराणं जुहुराणमस्मद्युयोधि युयोध्यस्म ज्जुहुराणम्। अस्मज्जुहुराणं जुहुराण मस्म-दस्म-ज्जुहुराण मेन एनो जुहुराणमस्म-दस्मज्जुहुराण-मेनः। जुहुराणमेन एनो जुहुराणं जुहुराण-मेनो भूयिंष्ठां भूयिंष्ठामेनो जुहुराणं जुहुराण-मेनो भूयिंष्ठां। एनो भूयिंष्ठां भूयिंष्ठा मेन एनो भूयिंष्ठां ते ते भूयिंष्ठा-मेन एनो भूयिंष्ठां ते। भूयिंष्ठां ते ते भूयिंष्ठां भूयिंष्ठां ते नमं उक्तिं नमं उक्तिं ते भूयिंष्ठां भूयिंष्ठां ते नमं उक्तिम्। ते नमं उक्तिं नमं उक्तिं ते ते नमं उक्तिं विधेम विधेम नमं उक्तिं ते ते नमं उक्तिं विधेम। नमं उक्तिं विधेम विधेम नमं उक्तिं नमं उक्तिं विधेम। नमं उक्तिमिति नमंःऽउक्तिम्। विधेमेतिं विधेम॥

ॐ शान्तिः शान्तिः शान्तिः॥

॥ गणपति प्रार्थना ॥

॥ घनपाठः ॥

गणानाँन्त्वा त्वा गणानाँं गणानाँंत्वा गणपंतिं गणपंतिं त्वा गणानाँं गणानाँन्त्वा गणपंतिम् ।

त्वा गणपंतिं गणपंतिं त्वा त्वा गणपंतिग्ं हवामहे हवामहे गणपंतिं त्वा त्वा गणपंतिग्ं हवामहे । गणपंतिग्ं हवामहे हवामहे गणपंतिं गणपंतिग्ं हवामहे कविन्कविग्ं हंवामहे गणपंतिं गणपंतिग्ं हवामहे कविम् । गणपंतिमितिंगण-पतिम् ।

हवामहे कविं कविग्ं हंवामहे हवामहे कविं कंवीनान्कंवीनां कविग्ं हंवामहे हवामहे कविन्कंवीनाम् ।

कविन्कंवीनान्कंवीनां कविन्कविं कंवीनामुंपमश्रंवस्तम मुपमश्रंवस्तम-न्कवीनां कविन्कविं कंवीनामुंपमश्रंवस्तमम् ।

कवीनामुंपमश्रंव-स्तममुपमश्रंवस्तमं कवीना-न्कंवीना मुंपमश्रंवस्तमम् । उपमश्रंवस्तम - मित्युंपमश्रंवः - तमम् ।

ज्येष्ठराजं ब्रह्मंणां ब्रह्मंणां ज्येष्ठराजं ज्येष्ठराजं ब्रह्मंणां ब्रह्मणो ब्रह्मणो ब्रह्मंणां ज्येष्ठराजं ज्येष्ठराजं ब्रह्मंणां ब्रह्मणः । ज्येष्ठराजमितिंज्येष्ठ राजमँ् ।

ब्रह्मंणां ब्रह्मणो ब्रह्मणो ब्रह्मंणां ब्रह्मंणां ब्रह्मणस्पते पते ब्रह्मणो ब्रह्मंणां ब्रह्मंणां ब्रह्मणस्पते ।

ब्रह्मणस्पते पते ब्रह्मणो ब्रह्मणस्पत आपंते ब्रह्मणो ब्रह्मणस्पत आ । पत आ पंतेपत आनोंन आपंते पत आनंः ।

आनोंन आनंश्शृण्वन् छृण्वन्न आनंश्शृण्वन् । न श्शृण्वन् छृण्वन्नोंन श्शृण्वन्नूतिभिं-रूतिभिंश्शृण्वन्नोंन श्शृण्वन्नूतिभिंः ।

श्शृण्वन्नूतिभिं-रूतिभिंश्शृण्वन् छृण्वन्नूतिभिंस्सीद सीदोतिभिं-श्शृण्वन् छृण्वन्नूतिभिंस्सीद ।

ऊतिभिंस्सीद सीदोतिभिं-रूतिभिंस्सीद सादंनगं् सादंनगं् सीदोतिभिं-रूतिभिंस्सीद सादंनम् । ऊतिभि-रित्यूति-भिः ।

सीदसादंनगं् सादंनगं् सीद सीद सादंनम्। सादंनमिति सादंनम् ॥

❀ ❀ ❀

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥

I am the ritual, I am the Sacrifice. I am the offering to the manes,
I am the Medicinal herbs,I am the Mantra, I am the clarified butter,
I am the fire, and I am the oblation.

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥

I am the father of this world, the mother, the sustainer and the grandfather;
I am that which is to be known, the purifier, the syllable Om, and also the
Rigveda, Samaveda and Yajurveda.

Bhagavad Gita, Chapter IX : 16-17

॥ सरस्वती प्रार्थना ॥

॥ संहिता-पाठः ॥

(तै. सं. कां. १ प्र. ८ अनु-२२)

ॐ प्रणो॑ दे॒वी सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती । धी॒नाम॑वित्र्यवतु ॥

॥ घनपाठः ॥

प्रणो॑ नः प्रप्रणो॑ दे॒वी दे॒वी नः प्रप्रणो॑ दे॒वी । नो॒ दे॒वी दे॒वी नो॑ नो दे॒वी सर॑स्वती॒ सर॑स्वती दे॒वी नो॑ नो दे॒वी सर॑स्वती ।

दे॒वी सर॑स्वती॒ सर॑स्वती दे॒वी दे॒वी सर॑स्वती॒ वाजे॑भि॒र्वाजे॑भि॒-स्सर॑स्वती दे॒वी दे॒वी सर॑स्वती॒ वाजे॑भिः ।

सर॑स्वती॒ वाजे॑भि॒-र्वाजे॑भि॒-स्सर॑स्वती॒ सर॑स्वती॒ वाजे॑भि-र्वा॒जिनी॑वती वा॒जिनी॑वती॒ वाजे॑भि॒-स्सर॑स्वती॒ सर॑स्वती॒ वाजे॑भि-र्वा॒जिनी॑वती ।

वाजे॑भि-र्वा॒जिनी॑वती वा॒जिनी॑वती॒ वाजे॑भि॒-र्वाजे॑भि-र्वा॒जिनी॑वती । वा॒जिनी॑व॒तीति॑ वा॒जिनी॑-व॒ती ॥

धी॒ना-मं॑वि॒त्र्यं॑वि॒त्री धी॒नां धी॒नाम॑वि॒त्र्यं-वत्व-वत्व-वि॒त्री धी॒नां धी॒नाम॑वि॒त्र्यं॑वतु । अ॒वि॒त्र्यं-वत्व-वत्व-वि॒त्र्यं॑वि॒त्र्यं॑वतु । अ॒व॒त्वि॒त्र्यं॑वतु ॥

॥ गायत्रीमन्त्रः ॥

॥ घनपाठः ॥

तथ्सं॒वि॒तु-स्सं॒वि॒तु-स्तत्तथ्सं॒वि॒तुर्व॑रे॒ण्यं॒ वरे॒ण्यग्ं॒ स॒वि॒तु स्तत्तथ्सं॒वि॒तुर्व॑रे॒ण्यम्।

स॒वि॒तुर्व॑रे॒ण्यं॒ वरे॒ण्यग्ं॒ स॒वि॒तु-स्सं॒वि॒तुर्व॑रे॒ण्यं॒ भर्गो॒ भर्गो॒ वरे॒ण्यग्ं॒ स॒वि॒तु-स्सं॒वि॒तुर्व॑रे॒ण्यं॒ भर्गः।

वरे॒ण्यं॒ भर्गो॒ भर्गो॒ वरे॒ण्यं॒ वरे॒ण्यं॒ भर्गो॑ दे॒वस्य॑ दे॒वस्य॒ भर्गो॒ वरे॒ण्यं॒ वरे॒ण्यं॒ भर्गो॑ दे॒वस्य॑।

भर्गो॑ दे॒वस्य॑ दे॒वस्य॒ भर्गो॒ भर्गो॑ दे॒वस्य॑ धीमहि धीमहि दे॒वस्य॒ भर्गो॒ भर्गो॑ दे॒वस्य॑ धीमहि।

दे॒वस्य॑ धीमहि धीमहि दे॒वस्य॑ दे॒वस्य॑ धीमहि। धी॒म॒हीति॑ धीमहि।

धियो॒ यो यो धियो॒ धियो॒ यो नो॑ नो॒ यो धियो॒ धियो॒ योनः।

यो नो॑ नो॒ यो योनः॑ प्रचो॒दया॑त्प्रचो॒दया॒न्नो॒ यो योनः॑ प्रचो॒दया॑त्।

नः॒ प्र॒चो॒दया॑त् प्रचो॒दया॒न्नो नः॒ प्र॒चो॒दया॑त्। प्र॒चो॒दया॒दिति॑ प्र-चो॒दया॑त्॥

॥ शिवमन्त्राः ॥

॥ घनपाठः ॥

नमंस्ताराय ताराय नमो नमंस्ताराय नमो नमं स्ताराय नमो नमंस्ताराय नमंः।

ताराय नमो नमंस्ताराय ताराय नमंश्शम्भवे शम्भवे नमंस्ताराय ताराय नमंश्शम्भवे"।

नमंश्शम्भवे शम्भवे नमो नमंश्शम्भवे च च शम्भवे नमो नमंश्शम्भवे च।

शम्भवे च च शम्भवे शम्भवे च मयोभवे मयोभवे च शम्भवे शम्भवे च मयोभवे"। शम्भव इति शम्-भवे"।

च मयो भवे मयोभवे च च मयोभवे च च मयोभवे च च मयोभवे च।

मयोभवे च च मयोभवे मयोभवे च नमो नमंश्च मयोभवे मयोभवे च नमंः।

मयोभव इतिमयः-भवे"।

च नमो नमंश्च च नमंश्शङ्कराय शङ्कराय नमंश्च च नमंश्शङ्कराय।

नमंश्शङ्कराय शङ्कराय नमो नमंश्शङ्कराय च च शङ्कराय नमो नमंश्शङ्कराय च।

शङ्करायं च च शङ्करायं शङ्करायं च मयस्करायं मयस्करायं च शङ्करायं शङ्करायं च मयस्करायं। शङ्करायेतिं शं-करायं।

च मयस्करायं मयस्करायं च च मयस्करायं च च मयस्करायं च च मयस्करायं च।

मयस्करायं च च मयस्करायं मयस्करायं च नमो नमश्च मयस्करायं मयस्करायं च नमः। मयस्करायेतिं मयः - करायं।

च नमो नमश्च च नमश्शिवायं शिवाय नमश्च च नमश्शिवायं।

नमश्शिवायं शिवाय नमो नमश्शिवायं च च शिवाय नमो नमश्शिवायं च।

शिवायं च च शिवायं शिवायं च शिवतराय शिवतराय च शिवायं शिवायं च शिवतराय ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

जगद्गुरो नमस्तुभ्यं शिवाय शिवदाय च ।
योगीन्द्राणां च योगीन्द्र गुरूणां गुरवे नमः ॥

ब्रह्मवैवर्तपुराणम् - ४, ३०, ४३.

Salutations unto Thee, O teacher of the universe. Thou art the Lord auspicious and the giver of bliss, the foremost of the perfect Yogis, the teacher of teachers. Salutations unto Thee.

॥ शिवपञ्चाक्षरीमन्त्रः ॥

॥ संहितापाठः ॥

नमः शि॒वाय॑ च ।

॥ पदपाठः ॥

नमः । शि॒वाय॑ । च॒ ।

॥ क्रमपाठः ॥

नमः शि॒वाय॑ । शि॒वाय॑ च ।

॥ जटापाठः ॥

नमः शि॒वाय॑ शि॒वाय॒ नमो॒ नमः शि॒वाय॑ । शि॒वाय॑ च च शि॒वाय॑ शि॒वाय॑ च ।

॥ घनपाठः ॥

नमः शि॒वाय॑ शि॒वाय॒ नमो॒ नमः शि॒वाय॑ च च शि॒वाय॒ नमो॒ नमः शि॒वाय॑ च । शि॒वाय॑ च च शि॒वाय॑ शि॒वाय॑ च ।

॥ मृत्युञ्जय महामन्त्रः ॥

॥ संहितापाठः ॥

त्र्यंम्बकं यजामहे सुगन्धिं पुंष्टिवर्धनम् । उर्वारुकमिंव बन्धंनान्मृत्योर्मुंक्षीय माऽमृतांत् ॥

॥ घनपाठः ॥

त्र्यंम्बकं यजामहे यजामहे त्र्यंम्बकं त्र्यंम्बकं यजामहे सुगन्धिगं सुंगन्धिं यंजामहे त्र्यंम्बकं त्र्यंम्बकं यजामहे सुगन्धिम्। त्र्यंम्बकमितित्रि-अम्बकम् ॥

यजामहे सुगन्धिगं सुंगन्धिं यंजामहे यजामहे सुगन्धिं पुंष्टिवर्धनं पुंष्टिवर्धनगं सुगन्धिं यंजामहे यजामहे सुगन्धिं पुंष्टिवर्धनम् ।

सुगन्धिं पुंष्टिवर्धनं पुष्टिवर्धनगं सुगन्धिगं सुंगन्धिं पुंष्टिवर्धनम् । सुगन्धिमितिंसु-गन्धिं पुष्टिवर्धन-मितिंपुष्टि-वर्धनम् ॥

उर्वारुकमिंवेवोर्वारुक - मुंर्वारुकमिंव बन्धंनाद्बन्धंनादि वोर्वारुक - मुंर्वारुकमिंव बन्धंनात् ।

इव बन्धंनाद्बन्धंनादिवेव बन्धंनान्मृत्यो-र्मृत्यो-र्बन्धंनादिवेव बन्धंनान्मृत्योः ।

बन्धंनान्मृत्यो-र्मृत्योर्बन्धंनाद्बन्धंनान्मृत्यो-र्मुंक्षीय मुक्षीय मृत्यो-र्बन्धंनाद्बन्धंनान्मृत्योर्मुंक्षीय ।

मृत्योर्मुंक्षीय मुक्षीय मृत्योर्मृत्यो-र्मुंक्षीय मा मा मुंक्षीय मृत्योर्मृत्यो-र्मुंक्षीय मा ।

मुक्षीय मा मा मुंक्षीय मुक्षीय माऽमृतांदमृतान्मा मुंक्षीय मुक्षीय माऽमृताँत् । मामृतांदमृतान्मा माऽमृताँत् । अमृतादित्यमृताँत् ॥

॥ रुद्रनमस्कार-मन्त्रः ॥

॥ संहितापाठः ॥

यो रुद्रो अग्नौ यो अप्सु य ओषंधीषु यो रुद्रो विश्वा भुवंना विवेश तस्मैं रुद्राय नमों अस्तु ॥

॥ घनपाठः ॥

यो रुद्रो रुद्रो यो यो रुद्रो अग्नावग्नौ रुद्रो यो यो रुद्रो अग्नौ । रुद्रो अग्नावग्नौ रुद्रो रुद्रो अग्नौ यो यो अग्नौ रुद्रो रुद्रो अग्नौ यः ।

अग्नौ यो यो अग्नावग्नौ यो अप्स्वंप्सु यो अग्नावग्नौ यो अप्सु । यो अप्स्वंप्सु यो यो अप्सु यो यो अप्सु यो यो अप्सु यः ।

अप्सु यो यो अप्स्वंप्सु य ओषंधीष्वोषंधीषु यो अप्स्वंप्सु य ओषंधीषु । अप्स्वित्यंप्-सु ।

य ओषंधीष्वोषंधीषु योय ओषंधीषु योय ओषंधीषु योय ओषंधीषु यः ।

ओषंधीषु योय ओषंधीष्वोषंधीषु यो रुद्रो रुद्रो य ओषंधीष्वोषंधीषु यो रुद्रः ।

यो रुद्रो रुद्रो यो यो रुद्रो विश्वा विश्वां रुद्रो यो यो रुद्रो विश्वाँ । रुद्रो विश्वा विश्वां रुद्रो रुद्रो विश्वा भुवंना भुवंना विश्वां रुद्रो रुद्रो विश्वा भुवंना ।

विश्वा भुवंना भुवंना विश्वा विश्वा भुवंना विवेशांविवेश भुवंना विश्वा विश्वा भुवंना विवेशं ।

भुवंना विवेशांविवेश भुवंना भुवंना विवेश तस्मै तस्मां आविवेश भुवंना भुवंना विवेश तस्मैँ । आविवेश तस्मै तस्मां आविवेशां विवेश तस्मैं रुद्रायं रुद्राय तस्मां आविवेशां विवेश तस्मैं रुद्रायं । आविवेशेत्याँ-विवेशं ।

तस्मैं रुद्रायं रुद्राय तस्मै तस्मैं रुद्राय नमो नमों रुद्राय तस्मै तस्मैं रुद्राय नमंः ।

रुद्राय नमो नमों रुद्रायं रुद्राय नमों अस्त्वस्तु नमों रुद्रायं रुद्राय नमों अस्तु । नमों अस्त्वस्तु नमो नमों अस्तु । अस्त्वित्यंस्तु ॥

॥ गायत्री-सामगानम् ॥

१ र र र र —
ॐ तत्सवितुर्वरेणियोम् । भार्गो देवस्य धीमाहीऽ२ ॥
२ १र र॰ २ १ — १॰
धियोयोनः प्रचोऽ१२१२ ॥ हिं(स्थि)आऽ२ ॥ दायो ॥
२ १११
आऽ३४५ ॥

॥ रथन्तर-सामगानम् ॥

२॰ र र र॰२ १ · १॰ २र र र र॰
आभित्वा शूरनोनु मोवा ॥ आदुग्धा इव धेनव ईशानमस्य
१ ३ २ १ र॰ २ १ ४ ^ १
जगतः ॥ सुवाऽ२३र्दृशाम् ॥ आइशानमा२३इन्द्राऽ३ ॥ सूस्थूऽ
र॰ ४र॰ ५ ५
२३४ षा । ओवाऽ६ ॥ हाउवा ॥
२र॰ १॰ १ २ २ र र र २ र॰
ईशोवा ॥ नामिन्द्र सुस्थुषो नत्वावाङ् अन्यो दिवियः ॥
१ ३ २ १ र॰ २र॰ १ ४ १ · र॰
नपाऽ२३र्थिवाः ॥ न जातो ना२३ जाऽ३ ॥ नाइष्याऽ२३४ ता ॥
४र॰ ५ ५
ओवाऽ६ ॥ हा उवा ॥
२ १॰ १॰ २ र र र॰ २
नजोवा । तोन जनिष्यते अश्वायन्तो मघवन्नि ॥
१ ३ २ १ २ १ ४ १ र॰
द्रवाऽ२३जिनाः ॥ गव्यन्तस्त्वाऽ२३ हाऽ३ वामाऽ२३४ हा ॥
४र॰ ५ ५ १
ओवाऽ६ ॥ हा उवा ॥ अस् ॥

॥ बृहत्-सामगानम् ॥

२र र र र॰ · २ २र॰ र॰ र ·
औ हो इत्वा मिद्धिहवा महाऽ३ए ॥ सातौवाजा ॥
१॰ २ ३ ५ १ २ ३र ४र॰ ५ २ १
स्याकाराऽ२३४वाः ॥ तुवाऽ३४ ॥ औहोवा ॥ वृत्राइषुवाइ ॥
१ २ १ २ ३ ५ १र॰ र॰ २ ३र ४र॰ ५
द्रासाऽ३१ त् ॥ पतिन्नाऽ२३४ राः ॥ त्वां काष्टाऽ३४ ॥ औहोवा ॥
१— १ · ४ ५ ५ ५ १
सूऽ२ आर्वाऽ२३४ ॥ ताऽः ॥ उहुवाऽ६ हाउ ॥ वा । हस् ॥

॥ आरण्यक-गानम् ॥

स्वर्ग्यम् सेतुषाम पुरुषगतिर्वा विशोकं वा । प्रजापति स्त्रिष्टुवात्मा ॥

२र॰ र र॰ १र॰ र॰ २ २ १ १
हा उहा उहा उ ॥ सेतूगं् स्तर ॥ (त्रिः) दुस्त ॥ रान् ॥ (द्वे त्रिः)
१र॰२र॰१र र॰ २ २र॰ र र॰ २ र॰ १
दानेना दानम् (त्रिः) हा उहा उहा उ ॥ अहमस्मि प्रथमजा ऋताऽ२३
२ १ १ १ २र॰ र र॰ १र॰ र॰ २ २ १ १
स्याऽ३४५ ॥ हा उहा उहा उ ॥ सेतूगं् स्तर (त्रिः) ॥ दुस्त ॥ रान् ॥
१ र॰ २र॰ १र॰ २
(द्वे त्रिः) अक्रोधेन क्रोधम् (द्विः) ॥
१ र॰ २र॰ २ १र २र॰ र र॰
अक्रोधेन क्रोधम् ॥ हा उहा उहा उ ॥
२र॰ र र र॰ २ १ १ २ १ १ १ २र॰ र र॰
पूर्वं देवेभ्यो अमृतस्यनाऽ२३ माऽ३४५ ॥ हा उहा उहा उ ॥
१र॰ र॰ २
सेतूगं् स्तर (त्रिः) ॥

२ १ १ २ १ १र १ २र· २र· र
दुस्त ॥ रान् ॥ (द्वे त्रिः) श्रद्धया श्रद्धाम् (त्रिः) ॥ हा उहा
र· २र र र र·१ १ २ १ १ १
उहा उ ॥ योमा ददाति सइदेव माऽ२३वाऽ३४५त् ॥
२र· र र· १र· र· २ २ १ १
हा उहा उहा उ ॥ सेतूगं् स्तर (त्रिः) ॥ दुस्त ॥ रान् ॥ (द्वे त्रिः)
२ १र· र· १ २
सत्येना नृतम् ॥ (त्रिः)
२र· र र· २ १ २ १ १ १
हा उहा उहा उ ॥ अहमन्नमन्नमदन्तमाऽ२३ द्मीऽ३४५ ॥
२ २र· र
हा उहा उहा उवा ॥ एषा गतिः (त्रिः) ॥
२र· १ २ १ १ २ १र २
एतदमृतम् (त्रिः) ॥ स्वर्गच्छ (त्रिः) ॥ ज्योतिर्गच्छ (त्रिः) ॥
१र· र· २र· १र· २ १ १ १ १
सेतूगं् स्तीर्त्वा चतुरा२३४५ः ॥

यं ध्यायन्ति बुधाः समाधिसमये शुद्धं वियत्सन्निभं
नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणम् ।
व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं विभुं
तं संसारविनाशहेतुमजरं वन्दे हरिं मुक्तिदम् ॥

ब्रह्मपुराणम् - अध्यायः १

Adoration unto the Lord, the destroyer of all worldliness and bestower of salvation, the undecaying and infinite Being, the One who is attainable through meditation alone, who is free from illusion, and beyond the manifest and the unmanifest; the One who is of the form of bliss eternal, who is gracious, taintless, and without any attributes, who is the overlord; the One who is pure and limitless like the ether, and who is contemplated in Samadhi by the wise.

॥ श्रीरुद्रप्रश्नः ॥

॥ लघुन्यासः ॥

ॐ नमो भगवतें रुद्राय ॥

ॐ अथात्मानग्ं शिवात्मानग् श्रीरुद्ररूपं ध्यायेत् ॥ शुद्धस्फटिकसंकाशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥ नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयं च वरेण्यमभय-प्रदम् ॥ कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम् । ज्वलन्तं पिङ्गलजटा-शिखामुद्योतधारिणम् ॥ वृषस्कन्ध-समारूढं उमादेहार्ध-धारिणम् । अमृतेनाप्लुतं शान्तं दिव्यभोग-समन्वितम् ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् । नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ सर्वव्यापिन-मीशानं रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः । आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासा देवाभिमुखः स्थित्वा आत्मनि देवताः स्थापयेत् ॥

प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु । हस्तयोर्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्ठतु । जठरेऽग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु ।

नयनयोश्चन्द्रादित्यौ तिष्ठेताम्। कर्णयोरश्विनौ तिष्ठेताम्। ललाटे रुद्रास्तिष्ठन्तु। मूर्ध्न्यादित्यास्तिष्ठन्तु। शिरसि महादेवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु। पार्श्वयोः शिवाशङ्करौ तिष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहिः सर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु। सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु। मागं् रक्षन्तु॥

अग्निर्मे॑ वा॒चि श्रि॒तः। वाग्धृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। वा॒युर्मे॒ प्रा॒णे श्रि॒तः। प्रा॒णो हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। सूर्यो॑ मे॒ चक्षु॑षि श्रि॒तः। चक्षु॑र्हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः। मनो॒ हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। दिशो॑ मे॒ श्रोत्रे॑ श्रि॒ताः। श्रोत्र॑ग्ं॒ हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। आपो॑ मे॒ रेत॑सि श्रि॒ताः। रेतो॒ हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। पृ॒थि॒वी मे॒ शरी॑रे श्रि॒ताः। शरी॑र॒ग्ं॒ हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। ओष॑धि॒व॒न॒स्प॒तयो॑ मे॒ लोम॑सु श्रि॒ताः। लोमा॑नि॒ हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। इन्द्रो॑ मे॒ बले॑ श्रि॒तः। बल॑ग्ं॒ हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। प॒र्ज॒न्यो॑ मे मू॒र्ध्नि श्रि॒तः। मू॒र्धा हृद॑ये। हृद॑यं॒ मयि॑। अ॒हम॒मृते॑। अमृ॑तं॒ ब्रह्म॑णि। ईशा॑नो मे म॒न्यौ श्रि॒तः।

मन्युर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः । आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायुरागात् । पुनः प्राणः पुनराकूतमागात् । वैश्वानरो रश्मिभिर्वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

अस्य श्री रुद्राध्यायप्रश्नमहामन्त्रस्य अघोर ऋषिः, अनुष्टुप्-छन्दः, सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता । नमः शिवायेति बीजम् । शिवतरायेति शक्तिः । महादेवायेति कीलकम् । श्रीसाम्बसदाशिव-प्रसादसिद्ध्यर्थे जपे विनियोगः ॥

ओं अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः । दर्शपूर्णमासात्मने तर्जनीभ्यां नमः । चातुर्मास्यात्मने मध्यमाभ्यां नमः । निरूढपशुबन्धात्मने अनामिकाभ्यां नमः । ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः । सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः ॥ अग्निहोत्रात्मने हृदयाय नमः । दर्शपूर्णमासात्मने शिरसे स्वाहा । चातुर्मास्यात्मने शिखायै वषट् । निरूढपशुबन्धात्मने कवचाय हुं । ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् । सर्वक्रत्वात्मने अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्

आपाताळ-नभः स्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुर-
ज्ज्योतिः स्फाटिक-लिङ्ग-मौळि-विलसत्पूर्णेन्दु-वान्तामृतैः ।

अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानुवाकाञ्जपन्

ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे-च्छिवम् ॥

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः

कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्डकोदण्डहस्ताः ।

त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदा

रुद्राः श्रीरुद्रसूक्त-प्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

ॐ गणानाँ त्वा गणपतिग्ं हवामहे कविं कवीना-मुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥ महागणपतये नमः ॥

॥ शान्तिपाठः ॥

शं चं मे मयश्च मे प्रियं चं मेऽनुकामश्चं मे कामश्च मे सौमनसश्चं मे भद्रं चं मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता चं मे धर्ता चं मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्चं मे ज्ञात्रं च मे सूश्चं मे प्रसूश्चं मे सीरं च मे लयश्चं म ऋतं चं मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं चं मेऽनमित्रं च मेऽभयं च मे सुगं चं मे शयनं च मे सूषा चं मे सुदिनं च मे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ श्रीरुद्रप्रश्नः ॥

कृष्णयजुर्वेदीय तैत्तिरीय संहिता
चतुर्थं वैश्वदेवं काण्डम् पञ्चमः प्रपाठकः

ॐ नमो भगवते रुद्राय ॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः । या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय । या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि । यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् । शिवेन वचसा त्वा गिरिशाच्छावदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् । अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीगꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः । असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमागꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषागꣳ हेड ईमहे । असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः । नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः । प्रमुञ्च धन्वनस्त्वमुभयोरार्त्निꣳ योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप । अवतत्य

धनुस्त्वग्ं सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव । विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत । अनेशन्नस्येषव आभुरस्य निषंगथिः । या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्, विश्वतस्त्वमयक्ष्मया परिब्भुज । नमस्ते अस्त्वायुधायानाततायै धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने । परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥ १ ॥

शम्भवे नमः । नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमः उच्चैर्घोषायाक्रन्दयते

पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्त्वनां पतये नमः ॥ २ ॥

नमः सहमानाय निव्याधिनं आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिणं इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचरायं कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥ ३ ॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः, क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो

नमो॒ रथे॑भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒ नमः॑ सेना॑भ्यः॒ सेना॑निभ्यश्च वो॒ नमो॒ नमः॑, क्ष॒त्तृभ्यः॑ संग्रही॒तृभ्य॑श्च वो॒ नमो॒ नम॒स्तक्षभ्यो॒ रथका॒रेभ्य॑श्च वो॒ नमो॒ नमः॑ कुला॒लेभ्यः॑ क॒र्मारे॑भ्यश्च वो॒ नमो॒ नमः॑ पुञ्जिष्टे॑भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒ नम॑ इषुकृ॒द्भ्यो॑ धन्वकृ॒द्भ्य॑श्च वो॒ नमो॒ नमो॑ मृग॒युभ्यः॑ श्व॒निभ्य॑श्च वो॒ नमो॒ नमः॑ श्व॒भ्यः॑ श्वप॑तिभ्यश्च वो॒ नमः॑ ॥ ४ ॥

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ नम॑: श॒र्वाय॑ च पशु॒पत॑ये च॒ नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒ नम॑: कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒ नम॑: सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒ नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒ नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒ नमो॑ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ नमो॑ बृ॒हते॑ च॒ वर्षी॑यसे च॒ नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒ नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒ नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ नम॑: शीघ्रि॒याय॑ च॒ शीभ्या॑य च॒ नम॑ ऊ॒र्म्याय॑ चावस्व॒न्याय॑ च॒ नम॑: स्रोत॒स्याय॑ च॒ द्वीप्या॑य च ॥ ५ ॥

नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नम॑: पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्याय॑ च॒ बुध्नि॑याय च॒ नम॑: सो॒भ्याय॑ च प्रतिस॒र्याय॑ च॒ नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒ नम॑ उर्व॒र्याय॑ च॒ खल्या॑य च॒ नम॑: श्लोक्या॑य चाऽवसा॒न्याय॑ च॒ नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ नम॑: श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒ नम॑

आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तु पाय च ॥ ७ ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ ८ ॥

नमः इरिण्याय च प्रपथ्याय च नमः किग्ंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाग्ं सव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नमः ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नमः आक्खिदते चः प्रक्खिदते च नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नमः आनिर्हतेभ्यो नमः आमीवत्केभ्यः ॥ ९ ॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत् । या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे । इमाग्ं रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् । मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तवः रुद्र प्रणीतौ । मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा नः उक्षितम् । मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः । मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते । आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः । स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः । परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि । विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रगं हेतयोन्यमस्मन्निवपन्तु ताः । सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि । अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । नीलग्रीवाः शितिकण्ठाः शर्वा अधः, क्षमाचराः । नीलग्रीवाः शितिकण्ठा दिवगं रुद्रा उपश्रिताः । ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । ये भूतानामधिपतयो विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । ये पथां पथिरक्षय ऐलबृदा यव्युधः । ये तीर्थानि प्रचरन्ति

सृकावंन्तो निषङ्गिणः । य एतावंन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि । नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दशं दक्षिणा दशं प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ११ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु । तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य । अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे विश्वभेषजोऽयग्ं शिवाभिमर्शनः । ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे । तान्यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा । ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥ सदाशिवोम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ चमकप्रश्नः ॥

संहिता पाठः

ॐ अग्नाविष्णू सजोषसेमावर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूगंषि च मे शरीराणि च मे ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ २ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे

द्रविणं च मे यन्ता चं मे धर्ता चं मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्चं मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं चं मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं चं मेऽनमित्रं च मेऽभयं च मे सुगं चं मे शयनं च मे सूषा चं मे सुदिनं च मे ॥ ३ ॥

ऊर्क्चं मे सूनृता च मे पयश्च मे रसश्च मे घृतं चं मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं चं मे पुष्टिश्च मे विभु चं मे प्रभु चं मे बहु चं मे भूयश्च मे पूर्णं चं मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाँश्च मे माषाँश्च मे तिलाँश्च मे मुद्गाश्च मे खल्वाँश्च मे गोधूमाँश्च मे मसुराँश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाँश्च मे नीवाराँश्च मे ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं चं मे लोहं चं मेऽग्निश्चं म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं चं मेऽकृष्टपच्यं चं मे ग्राम्याश्चं मे पशवं आरण्याश्चं यज्ञेनं कल्पन्तां वित्तं चं मे वित्तिश्च मे भूतं चं मे भूतिश्च मे वसु च मे वसतिश्चं मे कर्म च मे

शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥

अगुंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागुंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च

म॒ आग्नी॑ध्रं च मे ह॒विर्धा॑नं च मे गृ॒हाश्च॑ मे॒ सद॑श्च मे पुरो॒डाशा॑श्च मे पच॒ताश्च॑ मेऽवभृ॒थश्च॑ मे स्वगाका॒रश्च॑ मे ॥ ८ ॥

अ॒ग्निश्च॑ मे घ॒र्मश्च॑ मेऽर्कश्च॑ मे॒ सूर्य॑श्च मे प्रा॒णश्च॑ मेऽश्वमे॒धश्च॑ मे पृथि॒वी च॒ मेऽदि॑तिश्च मे॒ दिति॑श्च मे॒ द्यौश्च॑ मे॒ शक्व॑रीर॒ङ्गुल॑यो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्पन्ता॒मृक्च॑ मे॒ साम॑ च मे॒ स्तोम॑श्च मे॒ यजु॑श्च मे दी॒क्षा च॑ मे॒ तप॑श्च म ऋ॒तुश्च॑ मे व्र॒तं च॑ मेऽहोरा॒त्रयो॑र्वृ॒ष्ट्या बृ॑हद्रथन्त॒रे च॑ मे य॒ज्ञेन॑ कल्पेताम् ॥ ९ ॥

गर्भा॑श्च मे व॒त्साश्च॑ मे॒ त्र्यवि॑श्च मे॒ त्र्यवी॑च॑ मे दित्य॒वाट् च॑ मे दित्यौ॒ही च॑ मे॒ पञ्चा॑विश्च मे पञ्चा॒वी च॑ मे त्रिव॒त्सश्च॑ मे त्रिव॒त्सा च॑ मे तुर्य॒वाट् च॑ मे तुर्यौ॒ही च॑ मे पष्ठ॒वाट् च॑ मे पष्ठौ॒ही च॑ म उ॒क्षा च॑ मे व॒शा च॑ म ऋ॒षभश्च॑ मे वे॒हच्च॑ मेऽन॒ड्वाञ्च॑ मे धे॒नुश्च॑ म आयु॒र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पतामपा॒नो य॒ज्ञेन॑ कल्पतां व्या॒नो य॒ज्ञेन॑ कल्पता॒ चक्षु॑र्य॒ज्ञेन॑ कल्पता॒ श्रोत्रं॑ य॒ज्ञेन॑ कल्पता॒ मनो॑ य॒ज्ञेन॑ कल्पता॒ वाग्य॒ज्ञेन॑ कल्पतामा॒त्मा य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पताम् ॥ १० ॥

एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे स॒प्त च॑ मे॒ नव॑ च म एका॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च मे स॒प्तद॑श च मे॒ नव॑दश च म एक॑विग्ंशतिश्च मे॒ त्रयो॑विग्ंशतिश्च मे॒ पञ्च॑विग्ंशतिश्च मे स॒प्तविग्ं॑शतिश्च मे॒ नव॑विग्ंशतिश्च म

एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विंशतिश्च मे चतुर्विंशतिश्च मेऽष्टाविंशतिश्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मेऽष्टाचत्वारिंशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ ११ ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानिं शग्सिषद्विश्वे देवाः सूक्तवाचः पृथिविमातर्मा मा हिंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

नमामीशमीशाननिर्वाणरूपं
विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।
अजं निर्गुणं निर्विकल्पं निरीहं
चिदाकारमाकाशवासं भजेऽहम् ॥

श्रीतुलसीदासस्य रामायणम् - ७, शिवाष्टकम् - १

Salutations unto Thee, thou all-pervading and great Lord. Thou art liberation itself, and the revealed scripture is Thy embodied form. I worship Thee, the unborn, attributeless and unconditioned one. Thou art without any desire. Intelligence itself is Thy nature, and the sky Thy garment.

॥ अरुणप्रश्नः ॥

तैत्तिरीयारण्यकम्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । आपमापामपः सर्वीः । अस्मादस्मादितोऽमुतः ॥ १ ॥

अग्निर्वायुश्च सूर्यश्च । सह संचस्करद्भिया । वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्वायं मे सुत । महानाम्नीर्महामानाः । महसो महस्स्वः । देवीः पर्जन्यसूवरीः । पुत्रवत्वायं मे सुत ॥ २ ॥

अपाश्न्युष्णिमपा रक्षः । अपाश्न्युष्णिमपारघम् । अपाघ्रामपं चावर्तिम् । अपदेवीरितो हित । वज्रं देवीरजीताग्श्च । भुवनं देवसूवरीः । आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत ।

शिवानश्शन्तंमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि ॥ ३ ॥

स्मृतिः प्रत्यक्षमैतिह्यम्॑ । अनुमानश्चतुष्टयम् । एतैरादित्य-मण्डलम् । सर्वैरेव विधास्यते । सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि । तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् । नदीव प्रभवात्काचित् । अक्षय्यात्स्यन्दते यथा ॥ ४ ॥

तान्नद्योऽभिसंमायन्ति । सोरुस्सतीं न निवर्तते एवन्नाना-संमुत्थानाः । कालास्संवत्सरग्ग् श्रिताः । अणुश्च महश्च । सर्वे समवयन्तिंतम् । सतैस्सर्वैस्संमाविष्टः । ऊरुस्सन्न निवर्तते । अधिसंवत्सरं विद्यात् । तदेवं लक्षणे ॥ ५ ॥

अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते । संवत्सरः प्रत्यक्षेण । नाधिसंत्वः प्रदृश्यते । पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् । यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते । एकग्ंहि शिरो नाना मुखे । कृत्स्नं तदृतुलक्षणम् ॥ ६ ॥

उभयतस्सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते । शुक्लकृष्णे संवत्सरस्य । दक्षिणवामयोः पार्श्वयोः । तस्यैषा भवति । शुक्रं ते अन्यद्यजतं ते अन्यत् । विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्तिवितिं । नात्र भुवनम् । न पूषा । न पशवः । नादित्यस्संवत्सर एव प्रत्यक्षेण प्रियतमं विद्यात् ।

एतद्वै संवत्सरस्य प्रियतमग्ं रूपम् । योऽस्य महानर्थ उत्पत्स्यमानो भवति । इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् ॥ ७ ॥

साकंजानाग्ं सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति । तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः । को नु मर्या अमिंथितः । सखा सखायमब्रवीत् । जहाको अस्म दीषते । यस्त्यिाज सखिविदग्ं सखायम् । न तस्य वाच्यपि भागो अस्ति । यदीग्ं शृणोत्यलकग्ं शृणोति ॥ ८ ॥

न हि प्रवेद सुकृतस्य पन्थामिति । ऋतुरृतुना नुद्यमानः । विनंनादाभिधावः । षष्टिश्च त्रिग्ंशका वलगाः । शुक्लकृष्णौ च षाष्टिकौ । सारागवस्त्रैर्जरदक्षः । वसन्तो वसुभिस्सह संवत्सरस्य सवितुः । प्रैषकृत्प्रथमः स्मृतः । अमूनादयतेत्यन्यान् ॥ ९ ॥

अमूग्श्चं परिरक्षतः । एता वाचः प्रयुज्यन्ते । यत्रैतदुपदृश्यते । एतदेव विजानीयात् । प्रमाणं कालपर्यये । विशेषणं तु वक्ष्यामः । ऋतूनाँ तन्निबोधत । शुक्लवासा रुद्रगणः । ग्रीष्मेणाऽऽवर्तते सह । निजहन् पृथिवीग्ं सर्वाम् ॥ १० ॥

ज्योतिषाँऽप्रतिख्येन सः । विश्वरूपाणि वासाग्ंसि । आदित्यानाँ निबोधत । संवत्सरीणं कर्मफलम् । वर्षाभिर्ददताग्ं सह । अदुःखो दुःखचक्षुरिव । तद्वाऽऽपीत इव दृश्यते । शीतेनाँव्यथयन्निव । रुरुदक्ष इव दृश्यते । ह्लादयताँ ज्वलंतश्चैव । शाम्यतश्चास्य चक्षुषी ।

या वै प्रजा भ्रंग्श्यन्ते। संवत्सरात्ता भ्रंग्श्यन्ते। याः प्रतिंतिष्ठन्ति। संवत्सरे ताः प्रतिंतिष्ठन्ति। वर्षाभ्यं इत्यर्थः ॥ ११ ॥

अक्षिंदुःखोत्थिंतस्यैव। विप्रसंन्ने कनीनिंके। आङ्क्तेचाङ्गंणं नास्ति। ऋभूणाँ तन्निबोधंत। कनकाभानिं वासागुंसि। अहतांनि निबोधंत। अन्नमश्नीतं मृज्मीत। अहं वों जीवनप्रंदः। एता वाचः प्रंयुज्यन्ते। शारद्यंत्रोपदृश्यंते ॥ १२ ॥

अभिधून्वन्तोऽभिघ्नंन्त इव। वातवंन्तो मरुद्गंणाः। अमुतो जेतुमिषुमुंखमिव। सन्नद्धास्सह दंदृशे ह। अपध्वस्तैर्वस्तिवंर्णैरिव। विशिखासंः कपर्दिनः। अक्रुद्धस्य योत्स्यंमानस्य। क्रुद्धस्येंव लोहिंनी। हेमतश्चक्षुंषी विद्यात्। अक्ष्णयोः, क्षिपणोरिंव ॥ १३ ॥

दुर्भिक्षं देवंलोकेषु। मनूनांमुदकं गृंहे। एता वाचः प्रंवदन्तीः। वैद्युतों यान्ति शैशिंरीः। ता अग्निः पवंमाना अन्वैक्षत। इह जींविकामपंरिपश्यन्। तस्यैषा भवंति। इहेहवंस्स्वतपसः। मरुंतस्सूर्यत्वचः। शर्म सप्रथा आवृंणे ॥ १४ ॥

अतिंताम्राणिं वासागुंसि। अष्टिवंज्रिशतघ्निं च। विश्वे देवा विप्रंहरन्ति। अग्निर्जिह्वा असश्चंत। नैव देवों न मर्त्यः। न राजा वंरुणो विभुः। नाग्निर्नेन्द्रो न पंवमानः। मातृक्कंच्चन विद्यंते। दिव्यस्यैका धनुंरार्त्निः। पृथिव्यामपंरा श्रिता ॥ १५ ॥

तस्येन्द्रो वम्रिंरूपेण। धनुर्ज्यांमछिनथ्स्वंयम्। तदिंन्द्रधनुं-

रित्यज्यम् । अभ्रवर्णेषु चक्षते । एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः । रुद्रस्य त्वेव धनुरार्त्निः । शिर उत्पिपेष । स प्रवर्ग्योऽभवत् । तस्माद्यस्सप्रवर्ग्येण यज्ञेन यजते । रुद्रस्य स शिरः प्रतिदधाति । नैनꣳ रुद्र आरुको भवति । य एवं वेद ॥ १६ ॥

अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रदृश्यते । नैव रूपं न वासाꣳसि । न चक्षुः प्रतिदृश्यते । अन्योन्यं तु न हिꣳस्रातः । सतस्तद्वलक्षणम् । लोहितोऽक्षिणि शारशीर्ष्णिः । सूर्यस्योदयनं प्रति । त्वं करोषिन्यञ्जलिकाम् । त्वं करोषि निजानुकाम् ॥ १७ ॥

निजानुकामेन्यञ्जलिका । अमी वाचमुपासतामिति । तस्मै सर्व ऋतवो नमन्ते । मर्यादाकरत्वात्प्रपुरोधाम् । ब्राह्मणं आप्नोति । य एवं वेद । स खलु संवत्सर एतैस्सेनानीभिस्सह । इन्द्राय सर्वान्कामानभिवहति । स द्रप्सः । तस्यैषा भवति ॥ १८ ॥

अवद्रप्सो अꣳशुमतीमतिष्ठत् । इयानः कृष्णो दशभिस्सहस्रैः । आवर्तमिन्द्रः शच्या धमन्तम् । उपस्नुहि तं नृमणामथद्रामिति । एतयैवेन्द्रः सलावृक्या सह । असुरान् परिवृश्चति । पृथिव्यꣳशुमती । तामन्ववस्थितः संवत्सरो दिवं च । नैवं विदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् । इत्यृतुमण्डलानि । सूर्यमण्डलान्याख्यायिकाः । अत ऊर्ध्वꣳ-सनिर्वचनाः ॥ १९ ॥

आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषीमान् विभासः । ते अस्मै सर्वे दिवमांतपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । कश्यंपोऽष्टमः । स महामेरुं नं जहाति । तस्यैषा भवंति । यत्ते शिल्पंकश्यप रोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्त्सूर्या अर्पिंतास्सप्त साकम् ॥ २० ॥

तस्मिन् राजानमधिविश्रयेंममिति । ते अस्मै सर्वे कश्यपाज्ज्योतिंर्लभन्ते । तान्त्सोमः कश्यपादधिंनिर्द्धमति । भ्रस्ता-कर्मकृंदिवैवम् । प्राणो जीवानीन्द्रियंजीवानि । सप्त शीर्षण्याः प्राणाः । सूर्या इंत्याचार्याः । अपश्यमहमेतान्त्सप्त सूँर्यानिति । पञ्चकर्णों वात्स्यायनः । सप्तकर्णश्च प्लाक्षिः ॥ २१ ॥

आनुश्रविक एव नौ कश्यंप इति । उभौं वेदयिते । न हि शेकुमिव महामेंरुं गन्तुम् । अपश्यमहमेत्सूर्यमण्डलं परिवंर्तमानम् । गार्ग्यः प्राणत्रातः । गच्छन्त मंहामेरुम् । एकं चाजहतम् । भ्राजपटरपतंङ्गा निहने।तिष्ठन्नांतपन्ति।तस्मांदिह तप्त्रिंतपाः॥ २२ ॥

अमुत्रेतरे । तस्मांदिहातप्त्रिंतपाः । तेषांमेषा भवंति । सप्त सूर्या दिवमनुप्रविंष्टाः । तानन्वेतिं पथिभिंर्दक्षिणावान् । ते अस्मै सर्वे घृतमांतपन्ति । ऊर्जं दुहाना अनपस्फुरंन्त इति । सप्तर्त्विजस्सूर्या इंत्याचार्याः । तेषांमेषा भवंति । सप्त दिशो नानांसूर्याः ॥ २३ ॥

सप्त होतारं ऋत्विजः । देवा आदित्यां ये सप्त । तेभिस्सोमाँभीरक्षंण इति । तदप्याम्नायः । दिग्भ्राज ऋतूँन् करोति । एतयैवावृता सहस्रसूर्यताया इति वैशंपायनः । तस्यैषा भवंति । यद्द्यावं इन्द्र ते शतगंशतं भूमीः । उतस्युः । नत्वां वज्रिन् सहस्रगं् सूर्याः ॥ २४ ॥

अनुनजातमष्ट रोदंसी इति । नानालिङ्गत्वादृतूनां नानांसूर्यत्वम् । अष्टौ तु व्यवसिंता इति । सूर्यमण्डलान्यष्टांत ऊर्ध्वम् । तेषांमेषा भवंति । चित्रं देवानामुदंगादनींकम् । चक्षुर्मित्रस्य वरुंणस्याग्नेः । आप्रा द्यावांपृथिवी अन्तरिंक्षम् । सूर्य आत्मा जगतस्तस्थुंषश्चेति ॥ २५ ॥

क्वेदमभ्रंन्निविशते । क्वायगं् संवत्सरो मिंथः । क्वाहः क्वेयन्देंव-रात्री । क्व मासा ऋंतवः श्रिताः । अर्द्धमासां मुहूर्ताः । निमेषास्तुंटिभिस्सह । क्वेमा आपो निंविशन्ते । यदीतों यान्ति संप्रंति । काला अप्सुनिंविशन्ते । आपस्सूर्ये समाहिंताः ॥ २६ ॥

अभ्राँण्यपः प्रंपद्यन्ते । विद्युत्सूर्ये समाहिंता । अनवर्णे इंमे भूमी । इयं चांऽसौ च रोदंसी । किग्स्विदत्रान्तंरा भूतम् । येनेमे विंधृते उभे । विष्णुनां विधृंते भूमी । इति वंत्सस्य वेदंना । इरांवती धेनुमती हि भूतम् । सूयवसिनी मनुंषे दशस्यें ॥ २७ ॥

व्यंष्टभ्नाद्रोदंसी विष्णंवेते । दाधर्थ पृथिवीमभितों मयूखैः ।

किन्तद्विष्णोर्बलमाहुः । का दीप्तिः किं परायणम् । एको यद्धारयद्देवः । रेजतीं रोदसी उभे । वाताद्विष्णोर्बलमाहुः । अक्षराद्दीप्तिरुच्यते । त्रिपदाद्धारयद्देवः । यद्विष्णोरेकमुत्तमम् ॥ २८ ॥

अग्नयो वायवश्चैव । एतदस्य परायणम् । पृच्छामि त्वा परं मृत्युम् । अवमं मध्यमञ्चतुम् । लोकञ्च पुण्यपापानाम् । एतत्पृच्छामि संप्रति । अमुमाहुः परं मृत्युम् । पवमानं तु मध्यमम् । अग्निरेवावमो मृत्युः । चन्द्रमाश्चतुरुच्यते ॥ २९ ॥

अनाभोगाः परं मृत्युम् । पापास्संयन्ति सर्वदा । आभोगास्त्वेवं संयन्ति । यत्र पुण्यकृतो जनाः । ततो मध्यममायन्ति । चतुमंग्निं च संप्रति । पृच्छामि त्वा पापकृतः । यत्र यातयते यमः । त्वन्नस्तद्ब्रह्मन् प्रब्रूहि । यदि वेत्थाऽसतो गृहान् ॥ ३० ॥

कश्यपादुदितास्सूर्याः । पापान्निर्घ्नन्ति सर्वदा । रोदस्योरन्तर्देशेषु । तत्र न्यस्यन्ते वासवैः । तेऽशरीराः प्रपद्यन्ते । यथाऽपुण्यस्य कर्मणः । अपाण्यपादकेशासः । तत्र तेयोनिजा जनाः । मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानास्स्वकर्मभिः ॥ ३१ ॥

आशातिकाः क्रिमय इव । ततः पूयन्ते वासवैः अपैतं मृत्युं जयति । य एवं वेद । स खल्वेवं विद्ब्राह्मणः । दीर्घश्रुत्तमो भवति । कश्यपस्यातिथिस्सिद्धगमनस्सिद्धागमनः । तस्यैषा भवति । आयस्मिन्थ्सप्त वासवाः । रोहन्ति पूर्व्या रुहः ॥ ३२ ॥

ऋषिर् ह दीर्घश्रुत्तमः । इन्द्रस्य घर्मो अतिथिरिति । कश्यपः पश्यंको भवति । यत्सर्वं परिपश्यतीति सौक्ष्म्यात् । अथाग्नेरष्ट-पुरुषस्य । तस्यैषा भवंति । अग्ने नयं सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठान्ते नम उक्तिं विधेमेति ॥ ३३ ॥

अग्निश्च जातवेदाश्च । सहोजा अंजिराप्रभुः । वैश्वानरो नर्यापाश्च । पङ्क्तिरांधाश्च सप्तमः विसर्पेवाऽष्टमोऽग्नीनाम् । एतेऽष्टौ वसवः, क्षिता इति । यथर्त्वेवाग्नेरर्चिर्वर्ण-विशेषाः । नीलार्चिश्च पीतकार्चिश्चेति । अथ वायो-रेकादशपुरुषस्यै-कादशस्त्रीकस्य । प्रभ्राजमाना व्यवदाताः ॥ ३४ ॥

याश्च वासुकिवैद्युताः । रजताः परुषाः श्यामाः । कपिला अंतिलोहिताः । ऊर्ध्वा अवपतन्ताश्च । वैद्युत इत्येकादश । नैनं वैद्युतो हिनस्ति । य एवं वेद । स होवाच व्यासः पाराशर्यः । विद्युद्वधमेवाहं मृत्युमैच्छमिति । न त्वकामगृह्णन्ति ॥ ३५ ॥

य एवं वेद । अथ गन्धर्वगणाः । स्वानभ्राट् । अङ्घारिर्बम्भारिः । हस्तस्सुहस्तः । कृशानुर्विश्वावसुः । मूर्धन्वान्थ्सूर्यवर्चाः । कृतिरित्ये-कादश गन्धर्वगणाः । देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः ॥ ३६ ॥

नैनं गरो हिनस्ति । य एवं वेद । गौरी मिमाय सलिलानि तक्षती ।

एकंपदी द्विपदी सा चतुंष्पदी । अष्टापंदी नवंपदी बभूवुषीँ। सहस्राक्षरा परमे व्योंमन्निति । वाचों विशेषणम् । अथ निगदंव्याख्याताः। ताननुक्रंमिष्यामः। वराहवंस्स्वतपसः ॥ ३७ ॥

विद्युन्महसो धूपंयः । श्वापयो गृहमेधाँश्चेत्येते । ये चेमे ऽशिंमिविद्विषः। पर्जन्यास्सप्त पृथिवीमभिवंर्षन्ति। वृष्टिंभिरिति। एतयैव विभक्तिविंपरीताः। सप्तभिर्वा तैंरुदीरिताः। अमून्लोकानभि वंर्षन्ति। तेषांमेषा भवंति। समानमेतदुदंकम् ॥ ३८ ॥

उच्चैत्यंवचाहंभिः । भूमिं पर्जन्या जिन्वंन्ति । दिवं जिन्वन्त्यग्नंय इति । यदक्षंरं भूतकृंतम् । विश्वें देवा उपासंते । महर्षिंमस्य गोप्तारमँ् । जमदंग्निमकुंर्वत । जमदंग्निराप्यांयते । छन्दोंभिश्चतुरुत्तरैः। राज्ञस्सोमंस्य तृप्तासंः ॥ ३९ ॥

ब्रह्मंणा वीर्यांवता । शिवा नंः प्रदिशो दिशंः । तच्छंयोरावृंणीमहे । गातुं यज्ञायं । गातुं यज्ञपंतये । दैवीँस्वस्तिरंस्तु नः। स्वस्तिर्मानुंषेभ्यः। ऊर्ध्वं जिंगातु भेषजम्। शन्नों अस्तु द्विपदेँ। शं चतुंष्पदे। सोमपा (३) असोमपा (३) इति निगदंव्याख्याताः ॥ ४० ॥

सहस्रवृदिंयं भूमिः । परं व्योंम सहस्रंवृत् । अश्विनां भुज्यूं नासत्या । विश्वस्यं जगतस्पंती । जाया भूमिः पंतिर्व्योम । मिथुनंन्ता अतुर्यंथुः। पुत्रो बृहस्पंती रुद्रः। सरमां इतिं स्त्रीपुमम्।

शुक्रं वामन्यद्यजतं वामन्यत्। विषुरूपे अहनी द्यौरिव स्थः ॥ ४१ ॥

विश्वा हि माया अवथः स्वधावन्तौ । भद्रा वां पूषणाविह रातिरस्तु। वासीत्यौ चित्रौ जगतो निधानौ । द्यावाभूमी चरथः सगं सखायौ । तावश्विना रासभाश्वा हवं मे । शुभस्पती आगतगं सूर्यया सह । त्युग्रोह भुज्युमश्विनोदमेघे । रयिन्न कश्चिन्ममृवां (२) अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिः । अन्तरिक्षप्रुड्भिरपोदकाभिः ॥ ४२ ॥

तिस्रः, क्षपस्त्रिरहातिव्रजद्भिः। नासत्या भुज्युमूहथुः पतङ्गैः । समुद्रस्य धन्वन्नार्द्रस्य पारे। त्रिभीरथैरश्शतपद्भिः षडश्वैः। सवितारं वितन्वन्तम्। अनुबध्नाति शाबरः। आपपूर्षबरश्चैव। सवितारेपसोऽभवत्। त्यगं सुतृप्तं विंदित्वैव। बहुसोम गिरं वंशी ॥ ४३ ॥

अन्वेति तुग्रो वंक्रियान्तम् । आयसूयान्त्सोमंतृप्सुषु । स सङ्ग्रामस्तमोद्योऽत्योतः । वाचो गाः पिंपाति तत् । स तद्गोभिस्तवाँऽत्येत्यन्ये । रक्षसांनन्विताश्चं ये । अन्वेति परिवृत्याऽस्तः । एवमेतौस्थो अश्विना । ते एते द्युःपृथिव्योः । अहरहर्गर्भन्दधाथे ॥ ४४ ॥

तयोरेतौ वत्सावहोरात्रे । पृथिव्या अहः । दिवो रात्रिः । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ । अग्निश्चादित्यश्च । रात्रेर्वत्सः । श्वेत आदित्यः । अन्होऽग्निः ॥ ४५ ॥

ताम्रो अरुणः। ता अविसृष्टौ। दम्पती एव भवतः। तयोरेतौ वत्सौ। वृत्रश्च वैद्युतश्च। अग्नेर्वृत्रः। वैद्युत आदित्यस्य। ता अविसृष्टौ। दम्पती एव भवतः। तयोरेतौ वत्सौ ॥ ४६ ॥

उष्मा च नीहारश्च। वृत्रस्योष्मा। वैद्युतस्य नीहारः। तौ तावेव प्रतिपद्येते। सेयगृरात्रीं गर्भिणीं पुत्रेण संवसति। तस्या वा एतदुल्बणम्। यद्रात्रौ रश्मयः। यथा गोर्गर्भिण्यां उल्बणम्। एवमेतस्यां उल्बणम्। प्रजयिष्णुः प्रजया च पशुभिश्च भवति। य एवं वेद। एतमुद्यन्तमपियन्तं चेति। आदित्यः पुण्यस्य वत्सः। अथ पवित्राङ्गिरसः ॥ ४७ ॥

पवित्रवन्तः परिवाजमासते। पितैषां प्रत्नो अभिरक्षति व्रतम्। महस्समुद्रं वरुणस्तिरोदधे। धीरा इच्छेकुर्धरुणेष्वारभम्। पवित्रं ते वितततं ब्रह्मणस्पते। प्रभुर्गात्राणि पर्येषिविश्वतः। अतप्ततनूर्न तदामो अश्नुते। शृतास इद्वहन्तस्तत्समाशत। ब्रह्मा देवानाम्। असतस्सद्ये ततक्षुः ॥ ४८ ॥

ऋषयस्सप्तात्रिश्च यत्। सर्वेऽत्रयो अंगस्त्यश्च। नक्षत्रैश्शङ्कृतोऽवसन्। अथ सवितुः श्यावाश्वस्याऽवर्तिकामस्य। अमी य ऋक्षा निहितास उच्चा। नक्तं ददृश्रे कुहाचिद्दिवेयुः। अदब्धानि वरुणस्य व्रतानि। विचाकशच्चन्द्रमा नक्षत्रमेति। तत्सवितुर्वरेण्यम्। भर्गो देवस्य धीमहि ॥ ४९ ॥

धियो यो नः प्रचोदयात्। तत्सवितुर्वृणीमहे। वयन्देवस्य भोजनम्। श्रेष्ठꣳसर्वधातमम्। तुरं भगस्य धीमहि। अपागूहत सविता तृभीन्। सर्वान्दिवो अन्धसः। नक्तन्तान्यंभवन्दृशे। अस्थ्यस्थ्ना संभविष्यामः। नाम नामैव नाम मे॥ ५०॥

नपुगꣳसकं पुमाग्स्त्र्यस्मि। स्थावरोऽस्म्यथ जङ्गमः। यजेऽयक्षि यष्टाहे च। मया भूतान्यंयक्षत। पशवो ममं भूतानि। अनूबन्ध्यो ऽस्म्यंहं विभुः। स्त्रियस्सतीः। ता उमे पुꣳस आहुः। पश्यं-दक्षण्वान्नविचेंतदन्धः। कविर्यः पुत्रस्स इमा चिकेत॥ ५१॥

यस्ता विंजानाथ्संवितुः पितासत्। अन्धो मणिमंविन्दत्। तमंनङ्गुलिरावंयत्। अग्रीवः प्रत्यंमुञ्चत्। तमजिंह्वा असश्चंत। ऊर्ध्वमूलमंवाक्छाखम्। वृक्षं यो वेद सम्प्रति। न स जातु जनंः श्रद्दध्यात्। मृत्युर्मा मार्यादितिः। हसितगꣳरुदितङ्गीतम्॥ ५२॥

वीणांपणवलासितम्। मृतञ्जीवं च यत्किंचित्। अज्ञानिं स्नेव विद्धिं तत्। अतृष्यग्स्तृष्यंध्यायत्। अस्माज्जाता मेंमिथू चरन्नं। पुत्रो निर्ऋत्यां वैदेहः। अचेतां यश्च चेतनः। स तं मणिमंविन्दत्। सोंऽनङ्गुलिरावंयत्। सोऽग्रीवः प्रत्यंमुञ्चत्॥ ५३॥

सोऽजिंह्वो असश्चंत। नैतमृषिं विदित्वा नगंरं प्रविशेत्। यंदि प्रविशेत्। मिथौ चरिंत्वा प्रविशेत्। तथ्सम्भवंस्य व्रतम्। आतमंग्ने रथन्तिंष्ठ। एकाꣳश्वमेकयोजंनम्। एकचक्रंमेकधुरम्। वातध्रांजिगतिं

विंभो। न रिष्यतिं न व्यथते ॥ ५४ ॥

नास्याक्षोंं यातु सज्जंति। यच्छ्वेताँन्रोहिंताग्श्चाग्नेः। रथे युंक्त्वा ऽधितिष्ठंति।एकया च दशभिश्चं स्वभूते।द्वाभ्यामिष्टये विगंशत्या च। तिसृभिश्च वहसे त्रिगंशता च।नियुद्भिर्वायविहतां विमुञ्च ॥ ५५ ॥

आतंनुष्व प्रतंनुष्व । उद्धमाऽऽधंम सन्धंम । आदित्ये चन्द्रंवर्णानाम् । गर्भमाधेंहि यः पुमान् । इतस्सिक्तगंसूर्यंगतम् । चन्द्रमंसे रसंङ्कुधि । वारादञ्जनंयाग्रेऽग्निम् । य एकों रुद्र उच्यंते । असङ्ख्यातास्संहस्राणि । स्मर्यतें न च दृश्यंते ॥ ५६ ॥

एवमेतन्निंबोधत । आमन्द्रैरिंन्द्र हरिंभिः । याहि मयूरंरोमभिः । मा त्वा केचिन्नियेमुरिंन्न पाशिनः । दधन्वेव ता इंहि । मा मन्द्रै-रिंन्द्र हरिंभिः । यामि मयूरंरोमभिः । मा मा केचिन्नियेमुरिंन्न पाशिनः । निधन्वेव तां (२) इंमि । अणुभिश्च मंहद्भिश्च ॥ ५७ ॥

निघृष्वैंरसमायुंतैः।कालैर्हरित्वंमापन्नैः।इन्द्रायांहि सहस्रंयुक्। अग्निर्विभ्राष्टिंवसनः । वायुश्श्वेतंसिकद्रुकः । संवथ्सरो विंषूवर्णैः। नित्यास्तेऽनुचंरास्तव । सुब्रह्मण्योगं सुब्रह्मण्योगं सुंब्रह्मण्योम् । इन्द्रागच्छ हरिव आगच्छ मेंधातिथेः।मेष वृषणश्वंस्य मेने ॥ ५८ ॥

गौरावस्कन्दिन्नहल्यांयै जार । कौशिकब्राह्मण गौतमंब्रुवाण । अरुणाश्चां इहागंताः । वसंवः पृथिविक्षितंः । अष्टौदिग्वासंसो ऽग्नयंः । अग्निश्च जातवेदाँश्चेत्येते । ताम्राश्चाँस्ताम्ररथाः । ताम्रवर्णा-

स्तथाऽसिताः। दण्डहस्ताँः खादुग्दतः। इतो रुद्राँः पराङ्गताः॥ ५९॥

उक्तग्स्थानं प्रमाणञ्चं पुर इत। बृहस्पतिंश्च सविता चं। विश्वरूपैरिहागंताम्। रथोंनोदकवर्त्मना। अप्सुषा इति तद्द्वयोः। उक्तो वेषों वासाग्ंसि च। कालावयवानामितंः प्रतीज्या। वासात्यां इत्यश्विनोः। कोऽन्तरिक्षे शब्दङ्करोतीति। वासिष्टो रौहिणो मीमाग्ंसाञ्चक्रे। तस्यैषा भवंति। वाश्रेवं विद्युदितिं। ब्रह्मंण उदरंणमसि। ब्रह्मंण उदीरणंमसि। ब्रह्मंण आस्तरंणमसि। ब्रह्मंण उपस्तरंणमसि॥ ६०॥ [अपंक्रामत गर्भिण्यंः]

अष्टयोंनीमष्टपुंत्राम्। अष्टपंत्नीमिमां महीँम्। अहं वेद न मेंं मृत्युः। नचामृंत्युरघाहंरत्। अष्टयोँन्यष्टपुंत्रम्। अष्टपंदिद-मन्तरिंक्षम्। अहं वेद न मेंं मृत्युः। नचामृंत्युरघाहंरत्। अष्टयोंनीमष्टपुंत्राम्। अष्टपंत्नीममून्दिवमँ्॥ ६१॥

अहं वेद न मेंं मृत्युः। नचामृंत्युरघाहंरत्। सुत्रामांणं महीमूषु। अदिंतिर्द्यौरदिंतिरन्तरिंक्षम्। अदिंतिर्माता स पिता स पुत्रः। विश्वेंं देवा अदिंतिः पञ्चजनाँः। अदिंतिर्जातमदिंतिर्जनिंत्वम्। अष्टौ पुत्रासो अदिंतेः। ये जातास्तन्वंः परिं। देवां (२) उपंप्रैत्सप्तभिंः॥ ६२॥

परा मार्ताण्डमास्यंत्। सप्तभिंः पुत्रैरदिंतिः। उपप्रैत्पूर्व्यं युगमँ्। प्रजायैं मृत्यवे तंत्। परा मार्ताण्डमाभंरदितिं।

ताननुक्रमिष्यामः। मित्रश्च वरुणश्च। धाता चार्यमा च। अगंशश्च भगश्च। इन्द्रश्च विवस्वाग्श्चेत्येते। हिरण्य गर्भो हग्सश्शुचिषत्। ब्रह्मजज्ञानं तदित्पदमितिं गर्भः प्राजापत्यः। अथ पुरुषः सप्त पुरुषः ॥ ६३ ॥ [यथास्थानं गार्भिण्यः]

योऽसौं तपन्नुदेतिं। स सर्वेषां भूतानाँ प्राणानादायोदेतिं। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणानादायोदंगाः। असौ योऽस्तमेतिं। स सर्वेषां भूतानाँ प्राणानादायाऽस्तमेतिं। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणानादायाऽस्तंङ्गाः। असौ य आपूर्यति। स सर्वेषां भूतानाँ प्राणैरापूर्यति ॥ ६४ ॥

मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरापूरिंष्ठाः। असौ योंऽपक्षीयंति। स सर्वेषां भूतानाँ प्राणैरपंक्षीयति। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणै-रपंक्षेष्ठाः। अमूनि नक्षंत्राणि। सर्वेषां भूतानाँ प्राणैरपंप्रसर्पन्ति चोत्संर्पन्ति च। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरपंप्रसृपत मोत्सृंपत ॥ ६५ ॥

इमे मासाँश्चार्धमासाश्चं। सर्वेषां भूतानाँ प्राणैरपंप्रसर्पन्ति चोत्संर्पन्ति च। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरपंप्रसृपत मोत्सृंपत। इम ऋतवंः। सर्वेषां भूतानाँ प्राणैरपंप्रसर्पन्ति चोत्संर्पन्ति च। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरपं प्रसृपत मोत्सृंपत। अयग् संवत्सरः। सर्वेषां भूतानाँ

प्राणैरपंप्रसर्पति चोत्संर्पति च ॥ ६६ ॥

मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरपंप्रसृप मोत्सृंप। इदमहं:। सर्वेषां भूतानाँ प्राणैरपंप्रसर्पति चोत्संर्पति च। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरपंप्रसृप मोत्सृंप। इयग्रात्रिं:। सर्वेषां भूतानाँ प्राणैरपंप्रसर्पति चोत्संर्पति च। मा मे प्रजाया मा पंशूनाम्। मा मम प्राणैरपंप्रसृप मोत्सृंप। ॐ भूर्भुवस्स्वं:। एतद्वो मिथुनं मा नो मिथुंनग्ंरीढ्वम् ॥ ६७ ॥

अथादित्यस्याष्टपुंरुषस्य। वसूनामादित्यानाग्स्थाने स्वतेजंसा भानि। रुद्राणामादित्यानाग्स्थाने स्वतेजंसा भानि। आदित्याना-मादित्यानाग्स्थाने स्वतेजंसा भानि। सताग्ंसत्यानाम्। आदित्यानाग्स्थाने स्वतेजंसा भानि। अभिधून्वतांमभिघ्नताम्। वातवंतां मरुताम्। आदित्यानाग्स्थाने स्वतेजंसा भानि। ऋभूणामादित्यानाग्स्थाने स्वतेजंसा भानि। विश्वेषाँन्देवानाम्। आदित्यानाग्स्थाने स्वतेजंसा भानि। संवत्सरंस्य सवितुः। आदित्यस्यस्थाने स्वतेजंसाभानि। ॐ भूर्भुवस्स्वं:। रश्मयो वो मिथुनं मा नो मिथुंनग्ंरीढ्वम् ॥ ६८ ॥

आरोगस्य स्थाने स्वतेजंसा भानि। भ्राजस्य स्थाने स्वतेजंसा भानि। पटरस्य स्थाने स्वतेजंसा भानि। पतङ्गस्य स्थाने स्वतेजंसा भानि। स्वर्णरस्य स्थाने स्वतेजंसा भानि।

ज्योतिषीमतस्य स्थाने स्वतेजंसा भानि । विभासस्य स्थाने स्वतेजंसा भानि । कश्यपस्य स्थाने स्वतेजंसा भानि । ॐ भूर्भुवस्स्वः । आपो वो मिथुनं मा नो मिथुनग्ं रीढ्वम् ॥ ६९ ॥

अथ वायोरेकादशपुरुषस्यैकादशंस्त्रीकृस्य । प्रभ्राजमानानाग्ं-रुद्राणाग्स्थाने स्वतेजंसा भानि । व्यवदातानाग्ंरुद्राणाग्स्थाने स्वतेजंसा भानि।वासुकिवैद्युतानाग्ंरुद्राणाग्स्थाने स्वतेजंसा भानि। रजतानाग्ं रुद्राणाग्स्थाने स्वतेजंसा भानि। परुषाणाग्ंरुद्राणाग्-स्थाने स्वतेजंसा भानि।श्यामानाग्ंरुद्राणाग्स्थाने स्वतेजंसा भानि। कपिलानाग्ं रुद्राणाग्स्थाने स्वतेजंसा भानि। अतिलोहितानाग्ं-रुद्राणाग्स्थाने स्वतेजंसा भानि । ऊर्ध्वानाग्ंरुद्राणाग्स्थाने स्वतेजंसा भानि ॥ ७० ॥

अवपतन्तानाग्ंरुद्राणाग्स्थाने स्वतेजंसा भानि। वैद्युतानाग्ं रुद्राणाग्स्थाने स्वतेजंसा भानि। प्रभ्राजमानीनाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि। व्यवदातीनाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि। वासुकिवैद्युतीनाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि। रजतानाग्ं-रुद्राणीनाग्स्थाने स्वतेजंसा भानि । परुषाणाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि। श्यामानाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि। कपिलानाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि । अतिलोहितीनाग्ं-रुद्राणीनाग्स्थाने स्वतेजंसा भानि । ऊर्ध्वानाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि। अवपतन्तीनाग्ंरुद्राणीनाग्स्थाने स्वतेजंसा भानि।

वैद्युतीनाग्ं रुद्राणीनाग्स्थाने स्वतेजंसा भानि । ॐ भूर्भुवस्स्वंः । रूपाणि वो मिथुनं मा नो मिथुंनग्ंरीद्वम् ॥ ७१ ॥

अथाग्नेंरष्टपुंरुषस्य । अग्नेःपूर्वदिश्यस्य स्थाने स्वतेजंसा भानि । जातवेदस उपदिश्यस्य स्थाने स्वतेजंसा भानि । सहोजसो दक्षिणदिश्यस्य स्थाने स्वतेजंसा भानि । अजिराप्रभव उपदिश्यस्य स्थाने स्वतेजंसा भानि । वैश्वानरस्याऽपरदिश्यस्य स्थाने स्वतेजंसा भानि । नर्यापस उपदिश्यस्य स्थाने स्वतेजंसा भानि । पङ्क्तिराधस उदग्दिश्यस्य स्थाने स्वतेजंसा भानि । विसर्पिण उपदिश्यस्य स्थाने स्वतेजंसा भानि । ॐ भूर्भुवस्स्वंः । दिशो वो मिथुनं मा नो मिथुंनग्ंरीद्वम् ॥ ७२ ॥

दक्षिणपूर्वस्यान्दिशि विसंर्पी नरकः । तस्मान्नः पंरिपाहि । दक्षिणापरस्यां दिश्यविसंर्पी नरकः । तस्मान्नः पंरिपाहि । उत्तरपूर्वस्यान्दिशि विषांदी नरकः । तस्मान्नः पंरिपाहि । उत्तरापरस्यान्दिश्यविषांदी नरकः । तस्मान्नः पंरिपाहि । आ यस्मिन्त्सप्त वासवा इन्द्रियाणि शतक्रतंवित्येते ॥ ७३ ॥

इन्द्रघोषा वो वसुंभिः पुरस्तादुपंदधताम् । मनोंजवसो वः पितृभिंर्दक्षिणत उपंदधताम् । प्रचेंता वो रुद्रैः पश्चादुपंदधताम् । विश्वकंर्मा व आदित्यरुत्तरत उपंदधताम् । त्वष्टां वो रूपैरुपरिंष्टा-दुपंदधताम् । संज्ञानं वः पंश्चादिति । आदित्यस्सर्वोऽग्निः

पृथिव्याम्। वायुरन्तरिक्षे। सूर्यो दिवि। चन्द्रमा दिक्षु। नक्षत्राणि स्वलोके। एवा ह्येव। एवा ह्यग्ने। एवा हि वायो। एवा हीन्द्र। एवा हि पूषन्। एवा हि देवाः ॥ ७४ ॥

आपमापामपस्सर्वीः। अस्मादस्मादितोऽमुतः। अग्निर्वायुश्च सूर्यश्च। सह संञ्चस्करद्भिया। वाय्वश्वा रश्मिपतयः। मरीच्यात्मानो अद्रुहः। देवीर्भुवनसूवरीः। पुत्रवत्त्वायं मे सुत। महानाम्नीर्महामानाः। महसो महस्स्वः ॥ ७५ ॥

देवीः पर्जन्यसूवरीः। पुत्रवत्त्वायं मे सुत। अपाऽश्न्युष्णिमपारक्षः। अपाऽऽश्न्युष्णिमपारघम्। अपाघ्रामपचाऽवर्तिम्। अपदेवीरितो हित। वज्रन्देवीरजीताग्श्च। भुवनन्देवसूवरीः। आदित्यानदितिन्देवीम्। योनिनोर्ध्वमुदीषत ॥ ७६ ॥

भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु। केतवो अरुणासश्च। ऋषयो वातरशनाः। प्रतिष्ठाग्ंशतधा हि। समाहितासो सहस्रधायसम्। शिवा नश्शन्तमा भवन्तु। दिव्या आप ओषधयः। सुमृडीका सरस्वति। मा ते व्योम सन्दृशि ॥ ७७ ॥

योऽपां पुष्पं वेद। पुष्पवान् प्रजावाँन् पशुमान् भवति। चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावाँन् पशुमान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। अग्निर्वा अपामायतनम्। आयतनवान् भवति। योऽग्नेरायतनं वेद ॥ ७८ ॥

आयतनवान् भवति। आपो वा अग्नेरायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। वायुर्वा अपामायतनम्। आयतनवान् भवति। यो वायोरायतनं वेद। आयतनवान् भवति ॥ ७९ ॥

आपो वै वायोरायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। असौ वै तपन्नपामायतनम्। आयतनवान् भवति। योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति। आपो वा अमुष्य तपत आयतनम् ॥ ८० ॥

आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। चन्द्रमा वा अपामायतनम्। आयतनवान् भवति। यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति। आपो वै चन्द्रमस आयतनम्। आयतनवान् भवति ॥ ८१ ॥

य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति। यो नक्षत्राणामायतनं वेद। आयतनवान् भवति। आपो वै

नक्षत्राणामायतनम्। आयतनवान् भवति। य एवं वेद ॥ ८२ ॥

योऽपामायतनं वेद। आयतनवान् भवति। पर्जन्यो वा अपामायतनम्। आयतनवान् भवति। यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति। आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद ॥ ८३ ॥

आयतनवान् भवति। संवत्सरो वा अपामायतनम्। आयतनवान् भवति। यस्संवत्सरस्यायतनं वेद। आयतनवान् भवति। आपो वै संवत्सरस्यायतनम्। आयतनवान् भवति। य एवं वेद। योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति ॥ ८४ ॥

इमे वै लोका अप्सु प्रतिष्ठिताः। तदेषाऽभ्यनूक्ता। अपागूंरसमुदयगंसन्। सूर्ये शुक्रगंसमाभृतम्। अपागूंरसस्य यो रसः। तं वो गृह्णाम्युत्तममिति। इमे वै लोका अपागूंरसः। तेऽमुष्मिन्नादित्ये सभाभृताः। जानुदघ्नीमुत्तरवेदीङ्कृत्वा। अपां पूरयित्वा गुल्फदघ्नम् ॥ ८५ ॥

पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सग्गस्तीर्य। तस्मिन्विहायसे। अग्निं प्रणीयोपसमाधायं। ब्रह्मवादिनो वदन्ति। कस्मात्प्रणीते ऽयमग्निश्चीयते। साप्रणीतेऽयमप्सु ह्ययंश्चीयते। असौ भुवनेष्य-नाहिताग्निरेताः। तमभितं एता अबीष्टका उपदधाति। अग्निहोत्रे दर्शपूर्णमासयोः। पशुबन्धे चातुर्मास्येषु ॥ ८६ ॥

अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । एतद्ध स्म वा आहुश्शाण्डिलाः । कमग्निश्चिनुते । सत्रियमग्निश्चिन्वानः । संवत्सरं प्रत्यक्षेण । कमग्निश्चिनुते । सावित्रमग्निश्चिन्वानः । अमुमादित्यं प्रत्यक्षेण । कमग्निश्चिनुते ॥ ८७ ॥

नाचिकेतमग्निश्चिन्वानः । प्राणान्प्रत्यक्षेण । कमग्निश्चिनुते । चातुर्होत्रियमग्निश्चिन्वानः । ब्रह्म प्रत्यक्षेण । कमग्निश्चिनुते । वैश्वसृजमग्निश्चिन्वानः । शरीरं प्रत्यक्षेण । कमग्निश्चिनुते । उपानुवाक्यमाशुमग्निश्चिन्वानः ॥ ८८ ॥

इमान् लोकान्प्रत्यक्षेण । कमग्निश्चिनुते । इममारुणकेतुकमग्निश्चिन्वान इति । य एवासौ । इतश्चाऽमुतश्चाऽव्यतीपाती । तमिति । योऽग्नेर्मिथूया वेद । मिथुनवान्भवति । आपो वा अग्नेर्मिथूयाः । मिथुनवान्भवति । य एवं वेद ॥ ८९ ॥

आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामस्समवर्तत । इदगंसृजेयमिति । तस्माद्यत्पुरुषो मनसाभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता । कामस्तदग्रे समवर्ततादिं । मनसो रेतः प्रथमं यदासीत् ॥ ९० ॥

सतो बन्धुमसति निरविन्दन्न् । हृदि प्रतीष्या कवयो मनीषेति । उपैनन्तदुपनमति । यत्कामो भवति । य एवं वेद । स तपो

ऽतप्यत। स तपस्तप्त्वा। शरीरमधूनुत। तस्य यन्माग्ंसमासीत्। ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन् ॥ ९१ ॥

ये नखाः। ते वैखानसाः। ये वालाः। ते वालखिल्याः। यो रसः। सोऽपाम्। अन्तरतः कूर्मं भूतग्ंसर्पन्तम्। तमब्रवीत्। मम वैत्वङ्माग्ंसा। समभूत् ॥ ९२ ॥

नेत्यब्रवीत्। पूर्वमेवाहमिहासमिति। तत्पुरुषस्य पुरुषत्वम्। स सहस्रशीर्षा पुरुषः। सहस्राक्षस्सहस्रपात्। भूत्वोदतिष्ठत्। तमब्रवीत्। त्वं वै पूर्वग्ंसमभूः। त्वमिदं पूर्वः कुरुष्वेति। स इत आदायापः ॥ ९३ ॥

अञ्जलिना पुरस्तादुपादधात्। एवाह्येवेति। तत आदित्य उदतिष्ठत्। सा प्राची दिक्। अथाऽरुणः केतुर्दक्षिणत उपादधात्। एवाह्यग्न इति। ततो वा अग्निरुदतिष्ठत्। सा दक्षिणा दिक्। अथारुणः केतुः पश्चादुपादधात्। एवाहि वायो इति ॥ ९४ ॥

ततो वायुरुदतिष्ठत्। सा प्रतीची दिक्। अथारुणः केतुरुत्तरत उपादधात्। एवाहीन्द्रेति। ततो वा इन्द्र उदतिष्ठत्। सोदीची दिक्। अथारुणः केतुर्मध्य उपादधात्। एवाहि पूषन्निति। ततो वै पूषोदतिष्ठत्। सेयन्दिक् ॥ ९५ ॥

अथारुणः केतुरुपरिष्टादुपादधात्। एवाहि देवा हति। ततो देवमनुष्याः पितरः। गन्धर्वाप्सरसश्चोदतिष्ठन्। सोर्ध्वा

दिक् । या विप्रुषो विपरापतन् । ताभ्योऽसुरा रक्षाग्ंसि पिशाचाश्चोदतिष्ठन् । तस्मात्ते परांभवन् । विप्रुड्भ्यो हि ते समंभवन् । तदेषाभ्यनूक्ता ॥ ९६ ॥

आपो ह यद्बृहतीर्गर्भमायन्न् । दक्षन्दधाना जनयन्तीस्स्वयंभुम् । ततं इमेध्यसृज्यन्त सर्गाः । अद्भ्यो वा इदग्ं समभूत् । तस्मांदिदग्ंसर्वं ब्रह्मं स्वयंम्भितिं । तस्मांदिदग् सर्वग्ं शिथिंलमिवा ऽध्रुवंमिवाभवत् । प्रजापंतिर्वाव तत् । आत्मनात्मानं विधायं । तदेवानुप्राविंशत् । तदेषाभ्यनूक्ता ॥ ९७ ॥

विधायं लोकान् विधायं भूतानिं । विधाय सर्वाः प्रदिशो दिशश्च । प्रजापंतिः प्रथमजा ऋतस्यं । आत्मनात्मानंमभि-संविंवेशेतिं । सर्वमेवेदमाप्त्वा । सर्वमवरुद्ध्यं । तदेवानुप्रविंशति । य एवं वेदं ॥ ९८ ॥

चतुंष्टय्य आपो गृह्णाति । चत्वारि वा अपाग्ंरूपाणिं । मेघो विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुन्धे । आतपंति वर्ष्यो गृह्णाति । ताः पुरस्तादुपंदधाति । एता वै ब्रह्मवर्चस्या आपंः । मुखत एव ब्रह्मवर्चसमवरुन्धे । तस्मांन्मुखतो ब्रह्मवर्चसितरः ॥ ९९ ॥

कूप्यां गृह्णाति । ता दंक्षिणत उपंदधाति । एता वै तेंजस्विनीरापंः । तेजं एऽवास्यं दक्षिणतो दंधाति । तस्माद्दक्षिणो ऽर्धस्तेजस्वितरः । स्थावरा गृंह्णाति । ताः पश्चादुपंदधाति । प्रतिंष्ठिता

वै स्थाऀवराः। पश्चादेव प्रतिऀतिष्ठति। वहन्तीर्गृह्णाति ॥ १०० ॥

ता उत्तरत उपदधाति। ओजसा वा एता वहन्तीरिवोद्वहन्तीरिव आकूजन्तीरिव धावन्तीः। ओजऀ एवास्यौँत्तरतो दधाति। तस्मादुत्तरोऽर्धऀ ओजस्वितरः। संभार्या गृह्णाति। ता मध्य उपदधाति। इयं वै संभार्याः। अस्यामेव प्रतिऀतिष्ठति। पल्वल्या गृह्णाति। ता उपरिऀष्टादुपादधाति ॥ १०१ ॥

असौ वै पल्वल्याः। अमुष्यामेव प्रतिऀतिष्ठति। दिक्षूपदधाति। दिक्षु वा आपः। अन्नं वा आपः। अद्भ्यो वा अन्नऀआयते। यदेवाद्भ्योऽन्नऀआयते। तदवरुन्धे। तं वा एतमरुणाः केतवो वातरशना ऋषयोऽचिन्वन्। तस्मादारुणकेतुकः ॥ १०२ ॥

तदेषाम्यनूँक्ता। केतवो अरुणासश्च। ऋषयो वातरशनाः। प्रतिष्ठागं् शतधाऀहि। समाहिऀतासो सहस्रधायसमितिऀ। शतशाश्चैव सहस्रशश्च प्रतिऀतिष्ठति। य एतमग्निञ्चिनुते य उचैनमेवं वेदऀ ॥ १०३ ॥

जानुदघ्नीमुत्तरवेदीङ्कृत्वा। अपां पूरयति। अपागं् सर्वत्वायऀ। पुष्करपर्णगं्रुक्मं पुरुषमित्युपदधाति। तपो वै पुष्करपर्णम्। सत्यगं्रुक्मः। अमृतं पुरुषः। एतावद्वा वाँस्ति। यावदेतत्। यावदेवास्तिऀ ॥ १०४ ॥

तदवरुन्धे। कूर्ममुपदधाति। अपामेव मेधमवरुन्धे। अथोँ

स्वर्गस्यं लोकस्य समष्ट्यै । आपंमापामपस्सर्वीः । अस्मादस्मादितोऽमुतः । अग्निर्वायुश्च सूर्यश्च । सहसंञ्चस्करर्द्धियेति । वाय्वश्वां रश्मिपतयः । लोकं पृणच्छिद्रं पृण ॥ १०५ ॥

यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुंभिरेवाह्वेवेतिं । पञ्चचितय उपदधाति । पाङ्क्तोऽग्निः । यावानेवाग्निः । तञ्चिनुते । लोकंपृणया द्वितीयामुपदधाति । पञ्च पदा वै विराट् । तस्या वा इयं पादः । अन्तरिक्षं पादः । द्यौः पादः । दिशः पादः । परोरंजाः पादः । विराज्येव प्रतितिष्ठति । य एतमग्निञ्चिनुते । य उंचैनमेवं वेद ॥ १०६ ॥

अग्निं प्रणीयोपसमाधायं । तमभित एता अबीष्टंका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु । अथो आहुः । सर्वेषु यज्ञक्रतुष्वितिं । अथं हस्माहारुणस्स्वायंभुवः । सावित्रः सर्वोऽग्निरित्यनंनुषङ्गं मन्यामहे । नाना वा एतेषां वीर्याणि । कमग्निञ्चिनुते ॥ १०७ ॥

सत्रियमग्निञ्चिन्वानः । कमग्निञ्चिनुते । सावित्रमग्निञ्चिन्वानः । कमग्निञ्चिनुते । नाचिकेतमग्निञ्चिन्वानः । कमग्निञ्चिनुते । चातुर्होत्रिय-मग्निञ्चिन्वानः । कमग्निञ्चिनुते । वैश्वसृजमग्निञ्चिन्वानः । कमग्निञ्चिनुते ॥ १०८ ॥

उपानुवाक्यमाशुमग्निञ्चिन्वानः । कमग्निञ्चिनुते । इममारुणकेतुक

मग्निश्चिन्वान इतिं । वृषा वा अग्निः । वृषांणौ सग्ग्स्फालयेत् । हन्येताँस्य यज्ञः । तस्मान्नानुषज्यंः । सोत्तंरवेदिषुं क्रतुषुं चिन्वीत । उत्तरवेद्याग्ह्यंग्निश्चीयतेँ । प्रजाकांमश्चिन्वीत ॥ १०९ ॥

प्राजापत्यो वा एषोँऽग्निः । प्राजापत्याः प्रजाः । प्रजावाँन् भवति । य एवं वेदं । पशुकांमश्चिन्वीत । संज्ञानं वा एतत् पंशूनाम् । यदापंः पशूनामेव संज्ञानेऽग्निश्चिंनुते । पशुमान् भंवति । य एवं वेदं ॥ ११० ॥

वृष्टिंकामश्चिन्वीत । आपो वै वृष्टिंः । पर्जन्यो वर्षुंको भवति । य एवं वेदं । आमयावी चिंन्वीत । आपो वै भेंषजम् । भेषजमेवास्मैं करोति । सर्वमायुंरेति । अभिचरग्ंश्चिन्वीत । वज्रो वा आपंः ॥ १११ ॥

वज्रंमेव भ्रातृंव्येभ्यः प्रहंरति । स्तृणुत एंनम् । तेजंस्कामो यशंस्कामः । ब्रह्मवर्चसकांमस्स्वर्गकांमश्चिन्वीत । एतावद्वा वाँस्ति । यावंदेतत् । यावंदेवास्तिं । तदवंरुन्धे । तस्यैतद्व्रतम् । वर्षंति न धांवेत् ॥ ११२ ॥

अमृतं वा आपंः । अमृतस्यानंन्तरित्यै । नाप्सु मूत्रंपुरीषङ्कुर्यात् । न निष्ठींवेत् । न विवसंनस्स्नायात् । गुह्यो वा एषोँऽग्निः । एतस्याग्नेरनंतिदाहाय । न पुष्करपर्णानि हिरंण्यंवाऽधितिष्ठेँत् । एतस्याग्नेरनंभ्यारोहाय । न कूर्मस्याश्नींयात् । नोदकस्याघातुं-

कान्येनमोदकानिं भवन्ति। अघातुका आपः। य एतमग्निञ्चिनुते। य उचैनमेवं वेदं ॥ ११३ ॥

इमानुकं भुवना सीषधेम। इन्द्रश्च विश्वे च देवाः। यज्ञञ्च नस्तन्वञ्च प्रजाञ्च। आदित्यैरिन्द्रस्सह सीषधातु। आदित्यैरिन्द्र-स्सगणो मरुद्भिः। अस्माकं भूत्वविता तनूनाम्। आप्लवस्व प्रप्लवस्व। आण्डीभवज मा मुहुः। सुखादीन्दुःखनिधनाम्। प्रतिमुञ्चस्व स्वां पुरम् ॥ ११४ ॥

मरीचयस्स्वायंभुवाः। ये शरीराण्यकल्पयन्। ते तें देहङ्कल्पयन्तु। मा चं ते ख्यास्मं तीरिषत्। उत्तिष्ठत मा स्वप्त। अग्निमिच्छध्वं भारताः। राज्ञस्सोमस्य तृप्तासः। सूर्येण सयुजोषसः। युवा सुवासाः। अष्टाचक्रा नवद्वारा ॥ ११५ ॥

देवानां पूरयोध्या। तस्यागंहिरण्मयः कोशः। स्वर्गो लोको ज्योतिषाऽऽवृतः। यो वै तां ब्रह्मणो वेद। अमृतेनाऽऽवृतां पुरीम्। तस्मैं ब्रह्म चं ब्रह्मा च। आयुः कीर्तिं प्रजान्ददुः। विभ्राजमानागंहरिणीम्। यशसा संपरीवृताम्। पुरगंहिरण्मयीं ब्रह्मा ॥ ११६ ॥

विवेशाऽपराजिता। पराङ्गेत्यंज्यामयी। पराङ्गेत्यंनाशकी। इहचामुत्रंचान्वेति। विद्वान्देवासुरानुभयान्। यत्कुमारी मन्द्रयते। यद्योषिद्यत्पतिव्रता। अरिष्टं यत्किंचं क्रियते। अग्निस्तदनुवेधति।

अशृतांसश्शृंतासश्च ॥ ११७ ॥

यज्वानो येऽप्ययज्वनः। स्वर्यन्तो नापेँक्षन्ते। इन्द्रमग्निञ्च ये विदुः । सिकता इव संयन्ति । रश्मिभिस्समुदीरिताः । अस्माल्लोकादमुष्माच्च। ऋषिभिरदात्पृश्निभिः। अपेत वीत वि च सर्पतातः । येऽत्रस्थ पुराणा ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तम् ॥ ११८ ॥

यमो ददात्ववसानमस्मै। नृ मुंणन्तु नृपात्वर्यः। अकृष्टा ये च कृष्टजाः। कुमारीषु कनीनीषु। जारिणीषु च ये हिताः। रेतःपीता आण्डपीताः। अङ्गारेषु च ये हुताः। उभयाँन् पुत्रपौत्रकान्। युवेऽहं यमराजंगान्। शतमिन्नु शरदः ॥ ११९ ॥

अदो यद्ब्रह्म विलबम् । पितृणाञ्च यमस्य च । वरुणस्याश्विनोरग्नेः । मरुताञ्च विहायसाम् । कामप्रयवणं मे अस्तु। स ह्येवास्मि सनातनः। इति नाको ब्रह्मिश्रवो रायो धनम्। पुत्रानापो देवीरिहाऽऽहित ॥ १२० ॥

विशीर्ष्णीङ्गृध्रंशीर्ष्णीञ्च। अपेतो निरृतिगृंहथः। परिबाधग्ग्-श्वेतकुक्षम्। निजङ्घगंशबलोदरम्। स तान् वाच्यायया सह। अग्ने नाशय सन्दृशः। ईर्ष्यासूये बुभुक्षाम्। मन्युं कृत्यां च दीधिरे। रथेन किग्ंशुकावता। अग्ने नाशय सन्दृशः ॥ १२१ ॥

पर्जन्याय प्रगायत। दिवस्पुत्राय मीढुषे। स नो यवसमिच्छतु।

इदं वचः पर्जन्यांय स्वराजेँ। हृदो अस्त्वन्तरन्तर्द्युयोत। मयोभूर्वातो विश्वकृष्टयस्सन्त्वस्मे। सुपिप्पला ओषधीर्देवगोपाः। यो गर्भमोषधीनाम्। गवाँङ्कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाँम् ॥ १२२ ॥

पुनर्मामैत्विन्द्रियम्। पुनरायुः पुनर्भगः। पुनर्ब्राह्मणमैतु मा। पुनर्द्रविणमैतु मा । यन्मेऽद्य रेतः पृथिवीमस्कान्। यदोषधीरप्यसरद्यदापः। इदन्तत्पुनराददे। दीर्घायुत्त्वाय वर्चसे। यन्मे रेतः प्रसिच्यते। यन्म आजायते पुनः। तेन मामृतं कुरु। तेन सुप्रजसङ्कुरु ॥ १२३ ॥

अद्भ्यस्तिरोधाऽजायत । तव वैश्रवणस्सदा । तिरोधेहि सपत्नान्नः। ये अपोऽश्नन्ति केचन । त्वाष्ट्रीं मायां वैँश्रवणः । रथगंसहस्रवन्धुरम् । पुरुश्चक्रगंसहस्राश्वम् । आस्थायायांहि नो बलिम् । यस्मैं भूतानिं बलिमावहन्ति । धनञ्जावो हस्तिहिरण्यमश्वान् ॥ १२४ ॥

असाम सुमतौ यज्ञियस्य। श्रियं बिभ्रतोऽन्नमुखीं विराजमँ्। सुदर्शने चं क्रौञ्चे चं। मैनागे चं महागिरौ। शतद्वाट्टारंगमन्ता। सगंहार्यन्नगरं तवं। इति मन्त्राँः। कल्पोंऽत ऊर्ध्वम्। यदि बलिगं् हरेँत्। हिरण्यनाभयें वितुदयें कौबेरायायं बलिः ॥ १२५ ॥

सर्वभूतधिपतये नंम इति। अथ बलिगंहृत्वोपंतिष्ठेत। क्षत्रं क्षत्रं वैँश्रवणः। ब्राह्मणां वयग्गस्मः। नमंस्ते अस्तु मा मां हिगंसीः।

अस्मात्प्रविश्यान्नंमद्धीति । अथ तमग्निमांदधीत । यस्मिन्नेतत्कर्म प्रंयुञ्जीत । तिरोधा भूः । तिरोधा भुवंः ॥ १२६ ॥

तिरोधास्वंः । तिरोधा भूर्भुवस्स्वंः । सर्वेषां लोकानामाधिपत्यें सीदेति । अथ तमग्निंमिन्धीत । यस्मिन्नेतत्कर्म प्रंयुञ्जीत । तिरोधा भूस्स्वाहाँ । तिरोधा भुवस्स्वाहाँ । तिरोधास्स्वंस्स्वाहाँ । तिरोधा भूर्भुवस्स्वंस्स्वाहाँ । यस्मिन्नस्य काले सर्वा आहुतीर् हुतां भवेयुः ॥ १२७ ॥

अपि ब्राह्मणंमुखीनाः । तस्मिन्नह्नः काले प्रंयुञ्जीत । परंस्सुप्त-जंनाद्वेपि । मास्म प्रमाद्यन्तंमाध्यापयेत् । सर्वार्थाँस्सिद्ध्यन्ते । य एंवं वेद । क्षुध्यन्निदंमजानताम् । सर्वार्था नं सिद्ध्यन्ते । यस्तें विघातुंको भ्राता । ममान्तर्हृदये श्रितः ॥ १२८ ॥

तस्मां इममग्रपिण्डंञुहोमि । स मेँऽर्थान्मा विवंधीत् । मयि स्वाहाँ । राजाधिराजायं प्रसह्यसाहिनेँ । नमों वयं वैँश्रवणायं कुर्महे । स मे कामान्कामकामांय मह्यम्ँ । कामेश्वरो वैँश्रवणो दंदातु । कुबेरायं वैश्रवणायं । महाराजाय नमंः । केतवो अरुंणासश्च । ऋषयो वातंरशनाः । प्रतिष्ठाग्ंशतधां हि । समाहिंतासो सहस्रधायंसम् । शिवानश्शन्तंमा भवन्तु । दिव्या आप ओषंधयः । सुमृडीका सरंस्वति । मा ते व्योंम सन्दृशिं ॥ १२९ ॥

संवत्सरमेतंद्व्रतं चरेत् । द्वौं वा मासौ । नियमस्संमासेन ।

तस्मिन्नियमंविशेषाः । त्रिषवणमुदकोंपस्पर्शी । चतुर्थकालपानं-भक्तस्स्यात् । अहरहर्वा भैक्षंमश्नीयात् । औदुंबरीभिस्समिद्भिरग्निं परिचरेत् । पुनर्मामैत्विन्द्रियमित्येतेनाऽनुवाकेन । उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वीत ॥ १३० ॥

अंसञ्चयवान् । अग्नये वायवें सूर्याय । ब्रह्मणे प्रंजापतये । चन्द्रमसे नंक्षत्रेभ्यः । ऋतुभ्यस्संवत्सराय । वरुणायारुणायेति व्रंतहोमाः । प्रवर्ग्यवंदादेशः । अरुणाः काँण्डऋषयः । अरण्यें ऽधीयीरन्। भद्रङ्कर्णेभिरिति द्वें जपित्वा ॥ १३१ ॥

महानाम्नीभिरुदकगं् संग्स्पर्श्य । तमाचाँर्यो दद्यात् । शिवानश्शन्तमेत्योषधींरालभते। सुमृडीकेंति भूमिम्। एवमंपवर्गे। धेंनुर्दक्षिणा। कगंसं वासंश्च क्षौमम्। अन्यंद्वा शुक्लम्। यंथाशक्ति वा । एवग्स्वाध्यायंधर्मेण । अरण्येंऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुंण्यो भवति ॥ १३२ ॥

ॐ भद्रङ्कर्णेंभिश्शृणुयामं देवाः । भद्रं पंश्येमाक्षभिर्यजंत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसंस्तनूभिंः । व्यशेंम देवहितं यदायुंः । स्वस्ति न इन्द्रों वृद्धश्रंवाः । स्वस्ति नंः पूषा विश्ववेंदाः । स्वस्ति नस्तार्क्ष्यो अरिंष्टनेमिः । स्वस्ति नो बृहस्पतिंर्दधातु ॥ १३३ ॥

॥ ॐ शान्तिः शान्तिः शान्तिंः ॥

॥ पुरुषसूक्तम् ॥

तैत्तिरीयारण्यकम् - तृतीयः प्रश्नः

ॐ तच्छं योरावृणीमहे । गातुं यज्ञायं । गातुं यज्ञपतये । दैवीँ स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदेँ । शं चतुष्पदे । ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुष एवेदगं् सर्वमँ् । यद्भूतं यच्च भव्यमँ् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायाग्ंश्च पूरुषः ॥ १ ॥

पादोँऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोँऽस्येहाऽऽभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माँद्विराडजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ २ ॥

यत्पुरुषेण हविषाँ । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यमँ् । ग्रीष्म इध्मश्शरद्धविः । सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ॥ ३ ॥

तेनं देवा अयजन्त । साध्या ऋषयश्च ये । तस्माँद्यज्ञात्सर्वहुतः ।

संभृतं पृषदाज्यम्। पशूंस्ताग्श्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दाग्ंसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत ॥ ४ ॥

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः ॥ ५ ॥

ऊरू तदस्य यद्वैश्यः। पद्भ्याग्ं शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाग्ं अकल्पयन् ॥ ६ ॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन्, यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः ॥ ७ ॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे।

वेदाहमेतं पुरुषं महान्तम्॑ । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे॑ अन्तः । अजायमानो बहुधा विजायते ॥ ८ ॥

तस्य धीराः परिजानन्ति योनिम्॑ । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति । यो देवाना॑ं पुरोहितः । पूर्वो यो देवेभ्यो॑ जातः । नमो॑ रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्रा॑ह्मणो विद्यात् । तस्य॑ देवा असन् वशे॑ ॥ ९ ॥

ह्रीश्च॑ ते लक्ष्मीश्च पत्न्यौ॑ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम्॑ । इष्टं मनिषाण । अमुं मनिषाण । सर्वं॑ मनिषाण ॥ १० ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ नारायणसूक्तम् ॥

तैत्तिरीयारण्यकम् - 4 प्रपाठकः - 10 अनुवाकः - 13

ॐ सह नाववतु । सह नौ॑ भुनक्तु । सह वीर्यं॑ करवावहै । तेजस्वि-नावधीतमस्तु मा विद्विषावहै॑ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ॥ सहस्रशीर्षं॑ देवं विश्वाक्षं॑ विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं॑ परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणगं॑ हरिम् । विश्वमेवेदं पुरुष-स्तद्विश्व-मुपजीवति । पतिं॑ विश्वस्यात्मेश्वरगं॑ शाश्वतगं॑ शिव-मच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायणपरं

ब्रह्म तत्त्वं नारायणः परः । नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यतेऽपि वा ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । अनन्तमव्ययं कविगं् समुद्रेऽन्तं विश्वशम्भुवम् । पद्मकोश-प्रतीकाशगं् हृदयं चाप्यधोमुखम् । अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्ततगं् शिलाभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरगं् सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्नि-र्विश्वार्चि-र्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः । तिर्यगूर्ध्व-मधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वं देहमापादतलमस्तकः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

ऋतगं् सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ विष्णुसूक्तम् ॥

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोररा॑टमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सः । प्रतद्विष्णुस्स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ॥

उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम् । परमस्य विथ्से । विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । ऊरुक्षितिꣳ सुजनिमाचकार । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषꣳह्यस्य स्थविरस्य नाम ॥

अतो देवा अवन्तुनो यतो विष्णु-र्विचक्रमे । पृथिव्यास्सप्त धामभिः । इदं विष्णु-र्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳ सुरे । त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । ततो धर्माणि धारयन् । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य

युज्यस्सखाँ ॥

तद्विष्णोँः परमं पदगं् सदा पश्यन्ति सूरयः । दिवीव चक्षुरातंतम् । तद्विप्रासो विपन्यवो जागृवागं् सस्समिंन्धते । विष्णो-र्यत्परमं पदम् । पर्याप्त्या अनंन्तरायाय सर्वस्तोमोऽति रात्र उंत्तम महंर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाँप्नोति सर्वं जयति ॥

ॐ शान्तिः शान्तिः शान्तिंः ॥

॥ श्रीसूक्तम् ॥

ऋ. सं. अष्टकम्. 4 अ. 4 परि. सू. 11

ॐ ॥ हिरंण्यवर्णां हरिंणीं सुवर्णरजतस्रंजाम् । चन्द्रां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह ॥ तां म आवंह जातंवेदो लक्ष्मीमनं-पगामिनीँम् । यस्यां हिरंण्यं विन्देयं गामश्वं पुरुंषानहम् ॥ अश्वपूर्वां रंथमध्यां हस्तिनाँद-प्रबोधिंनीम् । श्रियं देवीमुपंह्वये श्रीर्माँ देवीर्जुषताम् ॥ कां सोस्मितां हिरंण्यप्राकारांमार्द्रां ज्वलंन्तीं तृप्तां तर्पयंन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपंह्वये श्रियम् ॥ चन्द्रां प्रंभासां यशसा ज्वलंन्तीं श्रियं लोके देवजुंष्टामुदाराम् । तां पद्मिनींमीं शरंणमहं प्रपंद्येऽलक्ष्मीर्मेँ नश्यतां त्वां वृंणे ॥ आदित्यवर्णे तपसोऽधिंजातो वनस्पतिस्तवं वृक्षोऽथ बिल्वः । तस्य फलाँनि तपसा नुंदन्तु मायान्तरायाश्चं बाह्या अंलक्ष्मीः ॥

उपैंतु मां देंवसखः कीर्तिश्च मणिंना सह । प्रादुर्भूतोऽस्मिं राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ क्षुत्पिंपासामलां ज्येष्ठामलक्ष्मीं नांशयाम्यहम् । अभूंतिमसंमृद्धिं च सर्वां निर्णुद मे गृहांत् ॥ गन्धद्वारां दुराधर्षां नित्यपुंष्टां करीषिणींम् । ईश्वरीग्ं सर्वंभूतानां तामिहोपंह्वये श्रियम् ॥ मनंसः काममाकूंतिं वाचः सत्यमंशीमहि । पशूनां रूपमन्नंस्य मयि श्रीः श्रंयतां यशंः ॥ कर्दमेंन प्रंजाभूता मयि संभंव कर्दम । श्रियं वासयं मे कुले मातरं पद्ममालिंनीम् ॥ आपंः सृजन्तु स्निग्धानि चिक्लीत वंस मे गृहे । नि चं देवीं मातरं श्रियं वासयं मे कुले । आर्द्रां पुष्करिंणीं पुष्टिं पिङ्गलां पंद्ममालिनीम् । चन्द्रां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह ॥ आर्द्रां यः करिंणीं यष्टिं सुवर्णां हेंममालिनीम् । सूर्यां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह । तां म आवंह जातंवेदो लक्ष्मीमनंपगामिनींम् । यस्यां हिरंण्यं प्रभूतं गावों दास्यो ऽश्वांन्, विन्देयं पुरुंषानहम् ॥

यः शुचिः प्रयंतो भूत्वा जुहुयांदाज्य मन्वंहम् । श्रियंः पञ्चदंशर्चं च श्रीकामंः सततं जंपेत् । पद्मानने पंद्म ऊरू पद्माक्षीं पद्मसंभंवे । त्वं मौं भजस्वं पद्माक्षी येन सौंख्यं लभाम्यंहम् ॥ अश्वंदायी गोंदायी धनदांयी महाधंने । धनं मे जुषंतां देवि सर्वकांमांश्च देहिं मे ॥ पुत्रपौत्र धंनं धान्यं हस्त्यश्वांदिगवे रंथम् ।

प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्नुते ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः । रोहन्तु सर्वबीजान्यव ब्रह्म द्विषो जहि ॥ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि । विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी । गम्भीरा वर्तनाभिः स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ॥ लक्ष्मीर्दिव्यै-र्गजेन्द्रैर्मणिगण खचितै-स्स्नापिता हेमकुम्भैः ।

नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥ लक्ष्मीं क्षीरसमुद्र राजतनयां श्रीरङ्गधामेश्वरीम् । दासीभूतसमस्त देव वनितां लोकैक दीपांकुराम् । श्रीमन्मन्दकटाक्षलब्ध विभव ब्रह्मेन्द्रगङ्गाधराम् । त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

सिद्धलक्ष्मी-र्मोक्षलक्ष्मी-र्जयलक्ष्मीस्सरस्वती । श्रीलक्ष्मीर्वर लक्ष्मीश्च प्रसन्ना मम सर्वदा । वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् । बालार्क कोटि प्रतिभां त्रिणेत्रां भजेहमाद्यां

जंगदीश्वरीं त्वाम् ॥

सर्वमङ्गलमाङ्गल्यें शिवे सर्वार्थ साधिके । शरंण्ये त्र्यम्बंके देवि नारायंणि नमोऽस्तुं ते ॥ नारायंणि नमोऽस्तुं ते । नारायंणि नमोऽस्तुं ते ॥

सरसिज-निलये सरोंजहस्ते धवलतरांशुक गन्धमाँल्यशोभे । भगवति हरिवल्लभें मनोज्ञे त्रिभुवनभूतिकरि प्रंसीद मह्यम् ॥

विष्णुंपत्नीं क्षंमां देवीं माधवीं" माधवप्रिंयाम् । विष्णोंः प्रियसंखीं देवीं नमाम्यच्युंत- वल्लभाम् ॥

महालक्ष्मी चं विद्महें विष्णुपत्नी चं धीमहि । तन्नों लक्ष्मीः प्रचोदयाँत् ॥ श्री-वर्चस्य-मायुंष्य-मारोंग्यमाविंधात् पवंमानं महीयतें" । धनं धान्यं पशुं बहुपुंत्रलाभं शतसंवत्सरं दीर्घमायुंः ॥ ऋणरोगादि-दारिद्र्य-पापक्षुंदपमृत्यंवः । भयंशोकमंनस्तापा नश्यन्तुं मम सर्वदा ॥

श्रियें जात श्रिय आनिंर्याय श्रियं वयों" जनितृभ्यों" दधातु । श्रियं वसाँना अमृतत्वमाँयन् भजंति सद्यः संविता विदध्यूनं् ॥ श्रियं एवैनं तच्छ्रियामांदधाति । सन्ततमृचा वंषट्कृत्यं सन्धंत्तं सन्धींयते प्रजया पशुभिः । य एंवं वेद । ॐ महादेव्यै चं विद्महें विष्णुपत्नी चं धीमहि । तन्नों लक्ष्मीः प्रचोदयाँत् ॥

ॐ शान्तिः शान्तिः शान्तिंः ॥

॥ भूसूक्तम् ॥

तैत्तिरीय संहिता काण्डम् - 1 प्रपाठकः - 5 अनुवाकः - 3

तैत्तिरीय ब्राह्मणम् अष्टकम् - 3 प्रश्नः - 1 अनुवाकः - 2

ॐ ॥ भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निमन्नाद-मन्नाद्यायादधे । आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः । त्रिगुंशद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः । अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः । यत्त्वाक्रुद्धः परोवपमन्युना यदवर्त्या । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि । यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् ।

मेदिनीं देवी वसुन्धरा स्याद्वसुधा देवी वासवीम् । ब्रह्मवर्चसः पितृणाग् श्रोत्रं चक्षुर्मनः । देवी हिरण्यगर्भिणी देवी प्रसूवरी । सदने सत्यायने सीद । समुद्रवती सावित्रीह नो देवी मह्यङ्गीम् । महीधरणी महोव्यथिष्ठा-श्शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणीम् । इन्द्रपत्नी व्यापिनीं सुरसरिदिह । वायुमतीं जलशयनी श्रियंधाराजा सत्यन्धोपरिमेदिनी । श्वोपरिधत्तं परिगाय ।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मीम् प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ।

ॐ धनुर्धरायैं विद्महें सर्वसिद्धयै चं धीमहि । तन्नों धरा प्रचोदयाँत् । महीं देवीं विष्णुंपत्नी-मजूर्याम् । प्रतीचीं मेनाग्ं हविषा यजामः । त्रेधा विष्णुंरुरुगायो विचंक्रमे । महीं दिवं पृथिवीमन्तरिंक्षम् । तच्छ्रोणैतिश्रवं-इच्छमांना । पुण्यग्ं श्लोकं यजंमानाय कृण्वती ॥ ॐ शान्तिः शान्तिः शान्तिंः ॥

॥ नीळासूक्तम् ॥

तैत्तिरीय संहिता . काण्डम् - 4 प्रपाठकः - 4 अनुवाकः - 12

ॐ ॥ गृणाहि । घृतवंती सवितराधिंपत्यैः पयंस्वतीरन्तिराशांनो अस्तु । ध्रुवा दिशां विष्णुंपत्न्यघोंराऽस्येशांनासहंसोया मनोताँ । बृहस्पतिं-मातरिश्वोत वायुस्संन्धुवानावातां अभि नों गृणन्तु । विष्टम्भो दिवोधरुणंः पृथिव्या अस्येश्यांना जगंतो विष्णुंपत्नी ॥

ॐ शान्तिः शान्तिः शान्तिंः ॥

यथा बिम्बमेकं रवेरम्बरस्थं
प्रतिच्छायया तावदेकोदकेषु ।
समुद्भासतेऽनेकरूपं यथावत्
त्वमेका परब्रह्मरूपेण सिद्धा ॥

महाकालसंहिता

As the one sun, reflected in the different pools of water, appears as so many different suns, so Thou, too, O Mother, appear as many through delusion. But still Thou art the One without a second, known as the Brahman supreme.

॥ दुर्गासूक्तम् ॥

तैत्तिरीयारण्यकम् - 4 प्रपाठकः - 10 अनुवाकः - 2

ॐ ॥ जातवेदसे सुनवाम सोमं मरातीयतो निदहाति वेदः । स नः पर्षदतिं दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीगं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरतिं दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतना जितगं सहमानमुग्रमग्निगं हुवेम परमाथ्सधस्थात् । स नः पर्षदतिं दुर्गाणि विश्वा क्षामद्देवो अतिं दुरिताऽत्यग्निः ॥ प्रत्नोषिं कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम । नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

[ॐ कात्यायनाय विद्महे कन्यकुमारिं धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥] ॐ शान्तिः शान्तिः शान्तिः ॥

॥ देवीसूक्तम् ॥

ऋग्वेद - संहिता . मण्डलम् - 10 अष्टकम् - 8 सूक्तम् - 125

ॐ ॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १ ॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् । अहं दधामि द्रविणं हविष्मते सुप्राव्ये ए ३ यजमानाय सुन्वते ॥ २ ॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्या वेशयन्तीम् ॥ ३ ॥

मया सोऽअन्नमत्ति यो विपश्यति यः प्राणिति यई शृणोत्युक्तम् । अमन्तवोमान्त उपक्षियन्ति श्रुधिश्रुत श्रद्धिवं ते वदामि ॥ ४ ॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः । यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५ ॥

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवेहन्त वा उ । अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ ६ ॥

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्व (अ) न्तः समुद्रे । ततो वितिष्ठे भुवनानु विश्वो तामूं द्यां वर्ष्मणोपस्पृशामि ॥ ७ ॥

अहमेव वातऽइव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा परएना पृथिव्यै तावती महिना संबभूव ॥ ८ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ मेधासूक्तम् ॥

तैत्तिरीयारण्यकम् - 4 प्रपाठकः - 10 अनुवाकः - 41-44

ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृताꣳस्म्बभूव। स मेन्द्रो मेधयाँ स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ मेधादेवी जुषमाणा न आगाँ-द्विश्वाचीं भद्रा सुमनस्यमाना। त्वया जुष्टा नुदमाना दुरुक्ताँन् बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषि-र्भवति देवि त्वया ब्रह्माऽऽगतश्रीं-रुत त्वयाँ। त्वया जुष्ट-श्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभा-वाधत्तां पुष्करस्रजा। अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवीँ मेधा सरस्वती सा माँ मेधा सुरभिं-र्जुषताग् स्वाहाँ ॥

आमाँ मेधा सुरभिं-र्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा माँ मेधा सुप्रतीका जुषन्ताम् ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

[ॐ हंस हंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयाँत्॥] ॐ शान्तिः शान्तिः शान्तिः ॥

॥ सरस्वतीसूक्तम् ॥

(ऋग्वेद संहिता)

ॐ इयमंददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वायं दाशुषे। या शश्वन्तमाचखादावसं पणिं ता ते दात्राणिं तविषा सरस्वती ॥ १ ॥ इयं शुष्मेभिर्बिसखा इवारुजत्सानुं गिरीणां तविषेभिरूर्मिभिः। पारावतघ्नीमवसे सुवृक्तिभिः सरस्वती मा विवासेमधीतिभिः ॥ २ ॥ सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः। उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ॥ ३ ॥ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु ॥ ४ ॥

यस्त्वा देवि सरस्वत्युपब्रूते धने हिते। इन्द्रं न वृत्रतूर्ये ॥ ५ ॥ त्वं देवि सरस्वत्यवा वाजेषु वाजिनि। रदा पूषेव नः सनिम् ॥ ६ ॥ उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः। वृत्रघ्नी वष्टि सुष्टुतिम् ॥ ७ ॥ यस्या अनन्तो अहुतस्त्वेषश्चरिष्णुरर्णवः। अमश्चरति रोरुवत् ॥ ८ ॥

सा नो विश्वा अति द्विषः स्वसृरन्या ऋतावरी। अतन्नहेव सूर्यः ॥ ९ ॥ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत् ॥ १० ॥ आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम्।

सरंस्वती निदस्पाँतु ॥ ११ ॥ त्रिषधस्थाँ सप्तधाँतुः पञ्च जाता वर्धयँन्ती । वाजेँवाजे हव्याँभूत् ॥ १२ ॥

प्र या महिम्ना महिनाँसु चेकिंते द्युम्नेभिंरन्या अपसाँमपस्तमा । रथं इव बृहती विभ्वनेँ कृतोपस्तुत्याँ चिकितुषा सरंस्वती ॥ १३ ॥ सरंस्वत्यभि नोँ नेषि वस्यो मापं स्फरीः पयसा मा न आ धंक् । जुषस्वं नः सख्या वेश्याँ च मा त्वत् क्षेत्राण्यरंणानि गन्म ॥ १४ ॥ प्र क्षोदंसा धायंसा सस्र एषा सरंस्वती धरुणमायंसी पूः । प्रबाबंधाना रथ्येँव याति विश्वाँ अपो महिना सिन्धुंरन्याः ॥ १५ ॥ एकाँचेतत् सरंस्वती नदीनां शुचिँर्यती गिरिभ्य आ संमुद्रात् । रायश्चेतँन्ती भुवंनस्य भूरेँर्घृतं पयोँ दुदुहे नाहुंषाय ॥ १६ ॥

स वाँवृधे नर्यो योषंणासु वृषा शिशुँर्वृषभो यज्ञियाँसु । स वाजिनेँ मघवद्भ्यो दधाति वि सातयेँ तन्वेँ मामृजीत ॥ १७ ॥ उत स्या नः सरंस्वती जुषाणोपं श्रवत् सुभगाँ यज्ञे अस्मिन् । मितज्ञुंभिर्नमस्यैँरियाना राया युजा चिदुत्तरा सखिंभ्यः ॥ १८ ॥ इमा जुह्वाँना युप्मदा नमोँभिः प्रति स्तोमेँ सरस्वति जुषस्व । तव शर्मन्ँ प्रियतंमे दधाँना उपं स्थेयाम शरणं न वृक्षम् ॥ १९ ॥ अयमुं ते सरस्वति वसिंष्ठो द्वाराँवृतस्यं सुभगे व्याँवः । वर्ध शुभ्रे स्तुवते राँसि वाजान् , यूयं पाँत स्वस्तिभिः सदाँ नः ॥ २० ॥

बृहदु॑ गायिषे॒ वचो॑ऽसु॒र्यां॑ न॒दीना॑म् । सर॑स्वतीमिन्म॑हया सुवृ॒क्तिभि॒: स्तोमै॑रवसिष्ठ रोद॑सी ॥ २१ ॥ उ॒भे यत्ते॑ महि॒ना शु॑भ्रे अन्ध॑सी अधिक्षि॒यन्ति॑ पू॒रव॑: । सा नो॑ बोध्यवि॒त्री म॒रुत्स॑खा॒ चोद॒ राधो॑ म॒घोना॑म् ॥ २२ ॥ भ॒द्रमिद् भ॒द्रा कृ॑णव॒त् सर॑स्व॒त्यक॑वारी चेतति वा॒जिनी॑वती । गृ॒णा॒ना ज॑मदग्निवत् स्तु॒वा॒ना च॑ वसिष्ठवत् ॥ २३ ॥ ज॒नी॒यन्तो॒ न्वग्र॑वः पुत्री॒यन्त॑: सु॒दान॑वः । सर॑स्वन्तं हवामहे ॥ २४ ॥

ये ते॑ सरस्व ऊ॒र्मयो॒ मधु॑मन्तो घृत॒श्चुत॑: । तेभि॑र्नोऽवि॒ता भ॑व ॥ २५ ॥ पीपि॒वांस॑ सर॑स्वत॒: स्तन॑ यो वि॒श्वद॑र्शत: । भ॒क्षी॒महि॑ प्र॒जामिष॑म् ॥ २६ ॥ अम्बि॑तमे॒ नदी॑तमे॒ देवि॑तमे॒ सर॑स्वति । अप्र॒शस्ता॑ इव स्मसि॒ प्रश॑स्तिमम्ब नस्कृधि ॥ २७ ॥ त्वे विश्वा॑ सरस्वति श्रि॒तायू॑ंषि दे॒व्याम् । शुन॑हो॒त्रेषु॑ मत्स्व प्र॒जां दे॑वि दिदिड्ढि नः ॥ २८ ॥

इ॒मा ब्रह्म॑ सरस्वति जुषस्व॑ वाजिनीवति । या ते॒ मन्म॑ गृत्सम॒दा ऋ॑तावरि प्रि॒या दे॒वेषु॒ जुह्व॑ति ॥ २९ ॥ पा॒व॒का नः॒ सर॑स्वती वाजे॑भिर्वा॒जिनी॑वती । य॒ज्ञं व॑ष्टु धि॒यावसु॑: ॥ ३० ॥ चो॒द॒यि॒त्री सू॒नृता॑नां॒ चेत॑न्ती सुमती॒नाम् । य॒ज्ञं द॑धे॒ सर॑स्वती ॥ ३१ ॥ म॒हो अर्ण॑: सर॑स्वती॒ प्र चे॑तयति के॒तुना॑ । धियो॒ विश्वा॒ वि रा॑जति ॥ ३२ ॥

सरंस्वतीं देवयन्तो॑ हवन्ते सरंस्वतीमध्वरे तायमा॑ने । सरंस्वतीं सुकृतो॑ अह्वयन्त सरंस्वती दाशुषे वार्यं॑दात् ॥ ३३ ॥ सरंस्वति या सरथं॑ ययाथं स्वधाभिर्देवि पितृभिर्मदं॑न्ती । आसद्यास्मिन् बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ॥ ३४ ॥ सरंस्वतीं यां पितरो हवं॑न्ते दक्षिणा यज्ञमभिनक्षंमाणाः । सहस्रार्घमिळो अत्रं भागं रायस्पोषं यजमानेषु धेहि ॥ ३५ ॥ आ नो॑ दिवो बृंहतः पर्वतादा सरंस्वती यजता गं॑न्तु यज्ञम् । हवं॑ देवी जुंजुषाणा घृताचीं॑ शग्मां नो वाचमुशती शृंणोतु ॥ ३६ ॥

राकामहं सुहवां॑ सुष्टुती हुंवे शृणोतु नः सुभगा बोधंतु त्मना॑ । सीव्यत्वपः सूच्याच्छिंद्यमानया ददा॑तु वीरं शतदा॑यमुक्थ्यम्॑ ॥ ३७ ॥ यास्ते॑ राके सुमतयः सुपेशंसो याभिर्ददा॑सि दाशुषे वसू॑नि । ताभि॑र्नो अद्य सुमना॑ उपागंहि सहस्रपोषं सुभगे रराणा ॥ ३८ ॥ सिनी॑वालि पृथुंष्टुके या देवानामसि स्वसा॑ । जुषस्व हव्यमाहुंतं प्रजां दे॑वि दिदिड्ढि नः ॥ ३९ ॥ या सुंबाहुः स्वंङ्गुरिः सुषूमा॑ बहुसूवंरी । तस्यै॑ विश्पत्न्यै॑ हविः सिंनीवाल्यै जुंहोतन ॥ ४० ॥ या गुङ्गूर्या सिंनीवाली या राका या सरंस्वती । इन्द्राणीमह्व ऊतये॑ वरुणानीं स्वस्तये॑ ॥ ४१ ॥

ॐ शान्तिः शान्तिः शान्तिंः ॥

॥ रात्रीसूक्तम् ॥

ऋग्वेदसंहिता : मण्डलम् - 10 अष्टकम् - 8 सूक्तम् - 127

ॐ रात्री व्यख्यदायती पुरुत्रा देव्य(अ)१ क्षभिः । विश्वा अधि श्रियोऽधित ॥ १ ॥ ओर्वप्रा अमर्त्या निवतो देव्यु(उ)१ द्वतः । ज्योतिषा बाधते तमः ॥ २ ॥ निरुस्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥ ३ ॥ सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षेन वसतिं वयः ॥ ४ ॥ नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः । नि श्येनासश्चिदर्थिनः ॥ ५ ॥ यावया वृक्यं(अ)१ वृकं यवयस्तेन-मूर्म्ये । अथा नः सुतरा भव ॥ ६ ॥ उपमा पेपिशत्तमः कृष्णं व्यक्तमस्थित । उषऋणेव यातय ॥ ७ ॥ उप ते गा इवाकरं वृणीष्व दुहित-र्दिवः । रात्रिस्तोमं न जिग्युषे ॥ ८ ॥

आ रात्रि पार्थिवं रजः पितरः प्रायु धामभिः । दिवः सदांसि बृहती वि तिष्ठस आत्वेषं वर्तते तमः ॥ १ ॥ ये ते रात्रि नृचक्षसो युक्तासो नवतिर्नव । अशीतिः सन्त्वष्टा उतो ते सप्त सप्तीः ॥ २ ॥ रात्रीं प्रपद्ये जननीं सर्वभूतनिवेशनीम् । भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥ ३ ॥ सुवेशिनीं संयमिनीं ग्रहनक्षत्रमालिनीम् । प्रपन्नोऽहं शिवां रात्रीं भद्रे पारमशीमहि [भद्रे पारमशीमह्यों नमः] ॥ ४ ॥ स्तोष्यामि प्रयतो

देवीँ॑ शरण्याँ॑ ब्रह्मचप्रियाम्। सहस्रसंमितां दुर्गां जातवेँदसे सुनवाम सोममँ॑ ॥ ५ ॥

शान्त्यर्थं तद् द्विजातीनाँमृषिभिः सोमपाश्रिताः। ऋग्वेँदे त्वं संमुत्पन्नाऽरात्रीयतो नि दंहाति वेदः ॥ ६ ॥ ये त्वाँ देवि प्र पद्यन्ँति ब्राह्मणाँ हव्यवाहंनीम्। अविद्या बहुंविद्या वा सनः पर्षदतिं दुर्गाणि विश्वाँ ॥ ७ ॥ ये अग्निवर्णां शुंभां सौम्यां कीर्तयिंष्यन्ति ये द्विंजाः। तांस्तारयति दुर्गाँणि नावेव सिन्धुँ दुरितात्यग्निः ॥ ८ ॥ दुर्गेँषु विषंमे घोरे संग्रामेँ रिपुसंकंटे। अग्निचोरनिंपातेषु दुष्टग्रंहनिवारिंणि ॥ ९ ॥ दुर्गेँषु विषंमेषु त्वं संग्रामेँषु वनेषुं च। मोहयित्वा प्रंपद्यन्ते तेषां मेँ अभयं कुरु ॥ १० ॥

केशिनींँ॑ सर्वभूतानां पञ्चमीँति च नामं च। सा मां समा निशा देवीँ सर्वतंः परि रक्षंतु सर्वतंः[परि रक्षत्वोन्नमंः]॥ ११ ॥ तामग्निवंर्णां तपंसा ज्वलन्तीं वैँरोचनीं कंर्मफलेषु जुष्टाँ। दुर्गां देवीं शरंणमहं प्रपंद्ये सुतरंसि तरसे नमंः सुतरंसि तरसे नमंः ॥ १२ ॥ दुर्गाँ दुर्गेषुं स्थानेषु शं नो देँवीरभिष्टंये। य इमं दुर्गास्तवं पुण्यं रात्रौराँत्रौ सदा पंठेत् ॥ १३ ॥ [रात्रिः कुशिंकसोभरो रात्रिर्वा भाँरद्वाजी रात्रिस्तवोँगायत्री।] रात्रीँसूक्तं जंपेन्नित्यं तत्कालंमुप-पद्यंते ॥ १४ ॥ उलूँकायातुं शुशुलूकंयातुं जहि श्वयाँतुमुत

कोकंयातुम् । सुपर्ण्याँतुमुत गृध्रंयातुं दृषदेँव प्रमृंण रक्षं इन्द्र ॥ १५ ॥

पिशांगंभृष्टिमम्भृणं पिशाचिंमिन्द्र सं मृंण । सर्वं रक्षो निबँर्हय ॥ १६ ॥ हिमस्यं त्वा जरायुंणा शाले परिं व्ययामसि । [उत ह्रदो हिं नो धियोऽग्निर्ददातु भेषजम्] ॥ १७ ॥ शीँतह्रदो हिं नो धियोऽग्निर्ददातु भेषजम् । अन्तिकामग्निमजनंय दूवाँदः शशहागंमत् ॥ १८ ॥ अजातपुत्रपक्षायाँ हृदयं ममं दूयते । विपुंलं वनं बह्वाकाँशं चरं जातवेदः कामाँय ॥ १९ ॥ मां च रक्ष पुत्राँश्च शरंणमभूत् तवं । पिंगाक्ष लोहितग्रीँव कृष्णवंर्ण नमोऽस्तुं ते ॥ २० ॥

अस्मान्निबर्हरस्येनां सागरंस्योर्मयो यंथा । इन्द्रः क्षत्रं ददातु वरुंणमभि षिंचतु ॥ २१ ॥ शत्रवो निधंनं यान्तु जय त्वँ ब्रह्मतेजंसा ॥ २२ ॥ कपिलजटीँ सर्वभक्षं चाग्निं प्रत्यक्ष-दैवंतम् ॥ २३ ॥ वरुणं च वशाम्यग्रेँ मम पुंत्रांश्च रक्षंतु [मम पुंत्रांश्च रक्षत्वोन्नमंः] ॥ २४ ॥ साग्रं वर्षशतं जीँव पिब खाँद च मोदं च ॥ २५ ॥

दुःखितांश्च द्विंजांश्चैव प्रजां चं पशु पालंय ॥ २६ ॥ यावंदादित्यस्तंपति यावंद्भ्राजति चन्द्रंमाः । यावद्वायुः प्लवाँयति तावंज्जीव जयाँ जय ॥ २७ ॥ येनं केन प्रंकारेण को हि नाँम नु

जीवंति । परेंषामुपंकारार्थं यज्जीवंति स जीवंति । एतां वैश्वानरीं सर्वदेवान्नमोऽस्तु ते ॥ २८ ॥ न चोरभयं न चं सर्पभयं न चं व्याघ्रभयं न चं मृत्युभयम् । यस्यापमृत्युर्न च मृत्युः सर्वं लभते सर्वं जयते ॥ २९ ॥ (इति परिशिष्टम्)

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ अक्षीभ्यां ते सूक्तम् ॥

ऋग्वेदः मं-10, सू-163, ऋषिः विवृहा काश्यपः यक्ष्मनाशनम् अनुष्टुप्

अक्षीभ्यांं ते नासिंकाभ्यां कर्णांभ्यां छुबुंकादधिं ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृंहामि ते ॥ १ ॥
ग्रीवाभ्यंस्त उष्णिहांभ्यः कीकंसाभ्यो अनूक्यांत् ।
यक्ष्मं दोषण्य (अ)१ंसांभ्यां बाहुभ्यां वि वृंहामि ते ॥ २ ॥
आन्त्रेभ्यंस्ते गुदांभ्यो वनिष्ठोर्हृदंयादधिं ।
यक्ष्मं मतंस्नाभ्यां यक्नः प्लाशिभ्यो वि वृंहामि ते ॥ ३ ॥
ऊरुभ्यांं ते अष्ठीवद्भ्यां पार्ष्णिंभ्यां प्रपंदाभ्याम् ।
यक्ष्मं श्रोणिंभ्यां भासंदाद्भंसंसो वि वृंहामि ते ॥ ४ ॥
मेहंनाद्वनंकरंणाल्लोमंभ्यस्ते नखेभ्यंः ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृंहामि ते ॥ ५ ॥
अङ्गांदङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृंहामि ते ॥ ६ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ अग्निसूक्तम् ॥

ऋग्वेदसंहिता. मण्डलम् - 10, अष्टकम् - 8, सूक्तम् - 80

अग्निः सप्तिं॑ वाजंभरं ददात्यग्निर्वीरं श्रुत्यं॑ कर्मनिष्ठाम् ।
अग्नी रोदसी॒ वि च॑रत् समञ्जन्नग्निर्नारीं॑ वीरकुक्षिं॒ पुरं॑धिम् ॥ १ ॥

अग्नेरप्नसः समिदस्तु भद्राऽग्निर्महो रोदसी॒ आ विवेश ।
अग्निरेकं॑ चोदयत् सम-त्स्वग्निर्वृत्राणिं॑ दयते पुरूणिं ॥ २ ॥

अग्निर्ह॒ त्यं जर॑तः कर्णमावा॒ऽग्नि-रद्भ्यो निर॑दह॒ज्जर॑ूथम् ।
अग्निरत्रिं॑ घर्म उरुष्यदन्त-रग्निर्नृमेधं॑ प्रजयाँसृजत् सम् ॥ ३ ॥

अग्निर्दाद्-द्रविणं वीरपे॑शा अग्निर्ऋषिं यः सहस्रा॑ सनोतिं ।
अग्निर्दिवि ह॒व्यमा त॑तानाऽग्नेर्धामा॑नि विभृता पुरुत्रा ॥ ४ ॥

अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः ।
अग्निं वयो॑ अन्तरिक्षे पतन्॑तोऽग्निः सहस्रा॒ परिं याति॒ गोनाम्॑ ॥ ५ ॥

अग्निं विशं ईळते मानुषी॒र्या अग्निं मनुषो॒ नहुषो॒ वि जा॒ताः ।
अग्निर्गान्धर्वीं पथ्या॑मृतस्याऽग्नेर्गव्यू॑तिर्घृत आ निषत्ता ॥ ६ ॥

अग्नये ब्रह्म ऋभवस्ततक्षु-रग्निं महामवोचामा सुवृक्तिम् ।
अग्ने प्रावं जरितारं॑ यविष्ठाऽग्ने महि द्रविणमा यजस्व ॥ ७ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ आयुष्यसूक्तम् ॥

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाँः पिनाकी ।
ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ १ ॥

विभ्राजमानः सरिरस्य मध्या-द्रोचमानो घर्मरुचिर्य आगात् ।
स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः ॥ २ ॥

ब्रह्मज्योति-र्ब्रह्म-पत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम् ।
सुवर्णरमग्रह-मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ ३ ॥

श्रियं लक्ष्मी-मौबला-मंबिकां गां षष्ठीं च यामिन्द्रसेनेँत्युदाहुः ।
तां विद्यां ब्रह्मयोनिगं् सरूपामिहायुषे तर्पयामो घृतेन ॥ ४ ॥

दाक्षायण्यः सर्वयोन्यः स योन्यः सहस्रशो विश्वरूपा विरूपाः ।
ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्ताम् ॥ ५ ॥

दिव्या गणा बहुरूपाँः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजागं् रीरिषो मोत वीरान् ॥ ६ ॥

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनगं् साँपराये स नो हविर्घृत-मिहायुषेँत्तु देवः ॥ ७ ॥

वसून् रुद्रा-नादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान्
गन्धर्वाग्श्च पितृग्श्च विश्वान् । भृगून् सर्पाग्श्चांगिरसोऽथ सर्वान्
घृतगं् हुत्वा स्वायुष्या महयाम शश्वत् ॥ ८ ॥

विष्णो त्वं नो अन्तमश्शर्मयच्छ सहन्त्य । प्रतेधारां मधुश्चुत
उथ्सं दुहते अक्षितम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ आ नो भद्राः सूक्तम् ॥

ऋग्वेदसंहिता. मण्डलम् - 1, अष्टकम् 1, सूक्तम् - 89

आ नो॑ भ॒द्राः क्र॒तवो॑ यन्तु वि॒श्वतोऽद॑ब्धासो॒ अप॑रीतास उ॒द्भिद॑:। दे॒वा नो॒ यथा॒ सद॒मिद् वृ॒धे अस॒न्नप्रा॑युवो रक्षि॒तारो॑ दि॒वेदि॑वे ॥ १ ॥

दे॒वानां॑ भ॒द्रा सु॑म॒तिर्ऋ॑जूय॒तां दे॒वानां॑ रा॒तिर॒भि नो॒ नि व॑र्तताम्। दे॒वानां॑ स॒ख्यमुप॑ सेदिमा व॒यं दे॒वा न॒ आयु॒: प्रति॑रन्तु जी॒वसे॑ ॥ २ ॥

तान् पू॒र्वया॒ नि॒विदा॑ हूमहे व॒यं भगं॑ मि॒त्रमदि॑तिं दक्ष॒मस्रि॑धम्। अ॒र्य॒मणं॑ वरु॒णं सोम॑म॒श्विना॒ सर॑स्वती नः सु॒भगा॒ मय॑स्करत् ॥ ३ ॥

तन्नो॒ वातो॑ मयो॒भुवा॑तु भेष॒जं तन्मा॒ता पृ॑थि॒वी तत् पि॒ता द्यौः। तद् ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतं धिष्ण्या युवम् ॥ ४ ॥

तमीशा॑नं॒ जग॑तस्त॒स्थुष॒स्पतिं॑ धियंजि॒न्वमव॑से हूमहे व॒यम्। पूषा नो॒ यथा॒ वेद॑सामस॒द् वृधे॑ र॒क्षिता॑ पा॒युरद॑ब्धः स्व॒स्तये॑ ॥ ५ ॥

स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः। स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥ ६ ॥

पृष॑दश्वा म॒रुत॒: पृश्नि॑मातरः शु॒भं या॒वा॑नो वि॒दथे॑षु जग्मयः। अ॒ग्नि॒जि॒ह्वा मन॑व॒: सूर॑चक्षसो॒ विश्वे॑ नो दे॒वा अव॒सा ग॑मन्नि॒ह ॥ ७ ॥

भ॒द्रं कर्णे॑भिः शृणुयाम देवाः भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः। स्थि॒रैर॑ङ्गै॒स्तुष्टु॑वांस॒स्त॒नूभि॒-र्व्य॑शेम दे॒वहि॑तं॒ यदायु॑: ॥ ८ ॥

शतमिन्नु शरदो अन्तिं देवा यत्रां नश्चक्रा जरसंं तनूनांम् ।
पुत्रासो यत्र पितरो भवन्ंति मा नोंं मध्यारींरिषतायुर्गन्तोंः ॥ ९ ॥

अदिंतिर्द्यौरदिंतिरन्तरिंक्ष-मदिंतिर्मांता स पिता स पुत्रः । विश्वेंं देवा अदिंतिः पञ्च जना अदिंतिर्जातमदिंतिर्जनिंत्वम् ॥ १० ॥

ॐ शान्तिः शान्तिः शान्तिंः ॥

॥ नवग्रहसूक्तम् ॥

ॐ शुक्लांबरधंरं विष्णुं शशिवंर्णं चतुर्भुजम् ।
प्रसंन्नवदंनं ध्यायेत्सर्व विंघ्नोपशान्तंये ॥

ॐ भूः ॐ भुवः ओग्ंसुवः ॐ महः ॐ जनः ॐ तपः ओग्ंसत्यम् । ॐ तत्संवितुर्वरेंण्यं भर्गोंदेवस्यं धीमहि । धियो यो नंः प्रचोदयांत् । ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्तसमस्तदुरितक्षंयद्वारा श्रीपरमेंश्वरप्रीत्यर्थं आदिंत्यादि-नवग्रहदेवता-प्रसांदसिद्ध्यर्थं आदिंत्यादि-नवग्रहनमस्कारांन् करिष्ये ॥

ॐ आसत्येन रजंसा वर्तमानो निवेशयंन्नमृतं मर्त्यंच । हिरण्ययेंन सविता रथेनाऽऽदेवो यांतिभुवंना विपश्यन् । अग्निं दूतं वृंणीमहे होतांरं विश्ववेंदसम् । अस्य यज्ञस्यं सुक्रतुम्ं । येषामीशें पशुपतिंः पशूनां चतुंष्पदामुत चं द्विपदांम् । निष्क्रींतोऽयं यज्ञियं भागमेंतु रायस्पोषा यजंमानस्य सन्तु ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय आदिंत्याय नमंः ॥ १ ॥

ॐ आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य संगथे । अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निञ्च विश्वशंभुवमापश्च विश्वभेषजीः । गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय सोमाय नमः ॥ २ ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपागं्रेतागं्सि जिन्वति । स्योना पृथिवि भवाऽनृक्षरा निवेशनी । यच्छान्नश्शर्म सप्रथाः । क्षेत्रस्य पतिना वयगं्हिते नेव जयामसि । गामश्वं पोषयित्न्वा स नो मृडातीदृशे ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय अङ्गारकाय नमः ॥ ३ ॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सगं्सृजेथामयञ्च । पुनः कृण्वग्ग्स्त्वा पितरं युवानमन्वातागं्सीत्त्वयि तन्तुमेतम् । इदं विष्णु-र्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपागं् सुरे । विष्णोः रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय बुधाय नमः ॥ ४ ॥

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् । इन्द्रमरुत्व

इह पाहि सोमं यथा शार्याते अपिबस्सुतस्यं । तव प्रणीती तवं शूर शर्मन्नाविवासन्ति कवयस्सुयज्ञाः । ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । सबुध्नियां उपमा अस्य विष्ठास्सतश्च योनिमसंतश्च विवः ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय बृहस्पतयें नमः ॥ ५ ॥

ॐ प्रवश्शुक्रायं भानवें भरध्वम् । हव्यं मतिं चाग्नये सुपूतम् । यो दैव्यानि मानुषा जनूगंषिं । अन्तर्विश्वानि विद्म ना जिगांति । इन्द्राणीमासु नारिषु सुपत्नीमहमंश्रवम् । न ह्यस्या अपरंचन जरसा मरंते पतिः । इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकंमस्तु केवलः ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय शुक्रांय नमः ॥ ६ ॥

ॐ शन्नों देवीरभिष्टंय आपों भवन्तु पीतयें । शंयोरभिस्रवन्तु नः । प्रजांपते न त्वदेतान्यन्यो विश्वां जातानि परिता बंभूव । यत्कामास्ते जुहुमस्तन्नों अस्तु वयग्स्यांम पतंयो रयीणाम् । इमं यंमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः । आत्वा मन्त्राः कविशस्ता वंहन्त्वेना रांजन्, हविषां मादयस्व ॥

ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय शनैश्चरांय नमः ॥ ७ ॥

ॐ कयां नश्चित्र आभुंवदूती सदावृधस्सखां । कया शचिंष्ठया वृता । आऽयङ्गौः पृश्निरक्रमीदसंनन्मातरं पुनः । पितरंञ्च

प्रयन्त्सुवः। यत्ते देवी निर्ऋतिराबबन्ध दामं ग्रीवास्वविचर्त्यम्। इदन्ते तद्विष्याम्यायुषो न मध्यादथांजीवः पितुमद्धि प्रमुक्तः ॥
ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय राहवे नमः ॥ ८ ॥

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः। ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणाग्स्वधितिर्वनानाग्ं सोमः पवित्रमत्येति रेभन्। सचित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम्। चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ॥
ॐ अधिदेवता-प्रत्यधिदेवता-सहितेभ्यः केतुभ्यो नमः ॥ ९ ॥

॥ ॐ आदित्यादि नवग्रह देवताभ्यो नमो नमः ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ नक्षत्रसूक्तम् ॥

तै. ब्रा : अष्टकम् - 3 प्रश्नः - 1 तै. संहिता : कां - 3 प्रपाठकः - 5 अनु - 1

ॐ ॥ अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम्। इदमासां विचक्षणम्। हविरासं जुहोतन। यस्य भान्तिं रश्मयो यस्यं केतवः। यस्येमा विश्वा भुवनानि सर्वा। स कृत्तिकाभिरभिसंवसानः। अग्निर्नो देवस्सुविते दधातु ॥ १ ॥

प्रजापते रोहिणीवेतु पत्नी। विश्वरूपा बृहती चित्रभानुः। सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदस्सवीराः। रोहिणी देव्युदगात्पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिग्

ह॒विषा॑ व॒र्धय॑न्ती । प्रि॒या दे॒वाना॒-मुप॑यातु य॒ज्ञम् ॥ २ ॥

सोमो॒ राजा॑ मृगशी॒र्षेण॒ आग॑न्न् । शि॒वं न॑क्षत्रं प्रि॒यम॑स्य॒ धाम॑ । आ॒प्याय॑मानो॒ बहु॒धा जने॑षु । रेत॑: प्र॒जां यज॑माने दधातु । यत्ते॒ नक्ष॑त्रं मृगशी॒र्षमस्ति॑ । प्रि॒यग्ं रा॑जन् प्रि॒यत॑मं प्रि॒याणा॑म् । तस्मै॑ ते सोम ह॒विषा॑ विधेम । शन्न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे ॥ ३ ॥

आ॒र्द्रया॑ रु॒द्र: प्रथ॑मा न एति । श्रेष्ठो॑ दे॒वाना॒ पति॑रघ्नि॒याना॑म् । नक्ष॑त्रमस्य ह॒विषा॑ विधेम। मा न॑: प्र॒जाग्ं रीरि॑ष॒न्मोत वी॒रान् । हे॒ती रु॒द्रस्य॒ परि॑णो वृणक्तु । आ॒र्द्रा न॑क्षत्रं जुषताग्ं ह॒विर्न॑: । प्र॒मु॒ञ्च॒मा॑नौ दु॒रि॒तानि॒ विश्वा॑ । अप॒ाघश॑ग्ं॒सन्नु॒दता॒मरा॑तिम् ॥ ४ ॥

पुन॑र्नो दे॒व्यदि॑ति॒स्स्पृणो॑तु । पुन॑र्वसू॒न: पु॒नरे॒तां य॒ज्ञम् । पुन॑र्नो दे॒वा अ॒भिय॑न्तु॒ सर्वे॑ । पुन॑: पुनर्वो ह॒विषा॑ यजामः । ए॒वा न दे॒व्यदि॑ति॒रन॒र्वा । विश्व॑स्य भ॒र्त्री जग॑त: प्रति॒ष्ठा । पुन॑र्वसू ह॒विषा॑ व॒र्धय॑न्ती । प्रि॒यं दे॒वाना॒-मप्ये॑तु पाथ॑: ॥ ५ ॥

बृ॒ह॒स्पति॑: प्र॒थ॒मं जाय॑मानः । ति॒ष्यं॑ नक्ष॑त्रम॒भि सम्ब॑भूव । श्रेष्ठो॑ दे॒वानां॑ पृत॑नासुजि॒ष्णुः । दि॒शोऽनु॒ सर्वा॒ अभ॑यन्नो अस्तु । ति॒ष्य॑: पु॒रस्ता॑दुत म॑ध्य॒तो न॑: । बृ॒ह॒स्पति॑र्न॒: परि॑पातु प॒श्चात् । बाधे॑ता॒न्द्वेषो॒ अभ॑यं कृणुताम् । सु॒वीर्य॑स्य॒ पत॑यस्स्याम ॥ ६ ॥

इ॒दग्ं सर्पे॑भ्यो॒ ह॒वि॒र॑स्तु जुष्ट॑म्॑ । आ॒श्रे॒षा येषा॑मनु॒यन्ति॒ चेत॑: । ये अ॒न्तरि॑क्षं पृथि॒वीं क्षि॒यन्ति॑ । ते न॑स्स॒र्पासो॒ ह॒व॒मागं॑मिष्ठाः ।

ये रोंचने सूर्यस्यापिं सर्पाः। ये दिवं देवीमनुसञ्चरंन्ति। येषांमाश्रेषा अंनुयन्ति काममँ्। तेभ्यंस्सर्पेभ्यो मधुंमज्जुहोमि ॥ ७॥

उपंहूताः पितरो ये मघासुं। मनोंजवसस्सुकृतंस्सुकृत्याः। ते नो नक्षंत्रे हवमागंमिष्ठाः। स्वधाभिर्यज्ञं प्रयंतं जुषन्ताम्। ये अंग्निदग्धा येऽनंग्निदग्धाः। येंऽमुल्लोकं पितरंः, क्षियन्तिं। याग्श्वं विद्मयाग् उं च न प्रंविद्म। मघासुं यज्ञग् सुकृंतं जुषन्ताम् ॥ ८॥

गवां पतिः फल्गुंनीनामसि त्वम्। तदंर्यमन्वरुणमित्र चारुं। तं त्वां वयग् संनितारग्ं सनीनाम्। जीवा जीवंन्तमुप संविंशेम। येनेमा विश्वा भुवंनानि सञ्जिंता। यस्यं देवा अंनुसंयन्ति चेतंः। अर्यमा राजाऽजरस्तु विंष्मान्। फल्गुंनीनामृषभो रोंरवीति ॥ ९॥

श्रेष्ठों देवानाँं भगवो भगासि। तत्त्वां विदुः फल्गुंनीस्तस्यं वित्तात्। अस्मभ्यं क्षत्रमजरग्ं सुवीर्यमँ्। गोमदश्वंवदुपसन्नुंदेह। भगोंह दाता भग इत्प्रंदाता। भगों देवीः फल्गुंनीराविंवेश। भगस्येत्तं प्रंसवं गंमेम। यत्रं देवैस्संधमादं मदेम ॥ १०॥

आयांतु देवस्संवितोपंयातु। हिरण्ययेंन सुवृता रथेंन। वहन्, हस्तग्ं सुभगं विद्मनापंसम्। प्रयच्छंन्तं पपुंरिं पुण्यमच्छं। हस्तः प्रयंच्छ त्वमृतं वसीयः। दक्षिंणेन प्रतिंगृभ्णीम एनत्। दाता-रंमद्य संविता विंदेय। यो नो हस्तांय प्रसुवातिं यज्ञम् ॥ ११॥

त्वष्टा नक्षंत्रमभ्येंति चित्राम्। सुभगं संसंयुवतिग् राचंमानाम्। निवेशयंन्नमृतान्मर्त्यांग्श्च। रूपाणिं पिग्ंशन्भुवंनानि विश्वाँ।

तन्नस्त्वष्टा तदु चित्रा विचष्टाम् । तन्नक्षत्त्रं भूरिदा अस्तु मह्यम् । तन्नः प्रजां वीरवतीग् सनोतु । गोभिर्नो अश्वैस्समनक्तु यज्ञम् ॥ १२ ॥

वायुर्नक्षत्त्रमभ्येति निष्ट्याम् । तिग्मशृंगो वृषभो रोरुवाणः । समीरयन्भुवना मातरिश्वा । अप द्वेषाग्ंसि नुदतामरातीः । तन्नो वायुस्तदु निष्ट्या शृणोतु । तन्नक्षत्त्रं भूरिदा अस्तु मह्यम् । तन्नो देवासो अनुजानन्तु कामम् । यथा तरेम दुरितानि विश्वा ॥ १३ ॥

दूरमस्मच्छत्रवो यन्तु भीताः । तदिन्द्राग्नी कृणुतां तद्विशाखे । तन्नो देवा अनुमदन्तु यज्ञम् । पश्चात् पुरस्तादभयन्नो अस्तु । नक्षत्त्राणामधिपत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ । विषूचश्शत्रूनपबाधमानौ । अपक्षुधन्नुदतामरातिम् ॥ १४ ॥

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधिसंवसन्तः । उत्तमे नाक इह मादयन्ताम् । पृथ्वी सुवर्चा युवतिः सजोषाः । पौर्णमास्युदगाच्छोभमाना । आप्याययन्ती दुरितानि विश्वा । उरु दुहां यजमानाय यज्ञम् ॥ १५ ॥

ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान्, हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । चित्रं नक्षत्त्रमुदगात्पुरस्तात् । अनूराधा स इति यद्वदन्ति । तन्मित्र एति पथिभिर्देवयानैः । हिरण्ययै-र्वितते-रन्तरिक्षे ॥ १६ ॥

इन्द्रो ज्येष्ठामनु नक्षत्त्रमेति । यस्मिन् वृत्रं वृत्र तूर्ये ततारं ।

तस्मिंन्वय-ममृतं दुहांनाः । क्षुधंन्तरेम दुरितिं दुरिष्टिम् । पुरन्दरायं वृषभायं धृष्णवेँ। अषांढाय सहंमानाय मीढुषेँ। इन्द्रांय ज्येष्ठा मधुंमद्दुहांना। उरुं कृणोतु यजंमानाय लोकम् ॥ १७॥

मूलं प्रजां वीरवंतीं विदेय । पराँच्येतु निर्ऋतिः पराचा । गोभिर्नक्षंत्त्रंपशुभिस्समंक्तम्। अहंर्भूयाद्यजंमानाय मह्यमँ् । अहंर्नो अद्य सुंविते दंधातु । मूलं नक्षंत्त्रमिति यद्वदंन्ति। परांचीं वाचा निर्ऋतिं नुदामि। शिवं प्रजायैं शिवमंस्तु मह्यमँ् ॥ १८॥

या दिव्या आपः पयंसा सम्बभूवुः । या अन्तरिंक्ष उत पार्थिंवीर्याः। यासां-मषाढा अंनुयन्ति काममँ्। ता न आपः शग्ग् स्योना भंवन्तु । याश्च कूप्या याश्चं नाद्याँस्समुद्रियाँः । याश्चं वैशन्तीरुत प्रांसचीर्याः । यासांमषाढा मधुं भक्षयंन्ति । ता न आपः शग्ग् स्योना भंवन्तु ॥ १९॥

तन्नो विश्वे उपं शृण्वन्तु देवाः। तदंषाढा अभिसंयंन्तु यज्ञम्। तन्नक्षंत्त्रं प्रथतां पशुभ्यंः। कृषिर्वृष्टि-र्यजंमानाय कल्पताम्। शुभ्राः कन्यां युवतयंस्सुपेशंसः। कर्मकृतं-स्सुकृतों वीर्यावतीः। विश्वाँन् देवान्, हविषां वर्धयंन्तीः। अषाढाः काममुपंयान्तु यज्ञम् ॥ २०॥

यस्मिन्ब्रह्माभ्यजंयत्सर्वमेतत्। अमुञ्चं लोक-मिदमूंच सर्वमँ्। तन्नो नक्षंत्त्र-मभिजिद्विजित्यं। श्रियं दधात्वहंणीयमानम् । उभौ लोकौ ब्रह्मंणा सञ्जिंतेमौ । तन्नो नक्षंत्त्रमभिजिद्विचंष्टाम्। तस्मिंन्वयं

पृतंनास्सञ्जयेम। तन्नो देवासो अनुजानन्तु काममँ् ॥ २१ ॥

शृण्वन्तिं श्रोणा-ममृतंस्य गोपाम् । पुण्यांमस्या उपंशृणोमि वाचमँ् । महीं देवीं विष्णुंपत्नी-मजूर्याम् । प्रतीचीं मेनाग्ं हविषां यजामः । त्रेधा विष्णुं-रुरुगायो विचंक्रमे । महीं दिवं पृथिवी-मन्तरिंक्षम् । तच्छ्रोणैतिश्रवं-इच्छमांना । पुण्यग्ं श्लोकं यजंमानाय कृण्वती ॥ २२ ॥

अष्टौ देवा वसंवस्सोम्यासंः । चतंस्रो देवी-रजराः श्रविंष्ठाः । ते यज्ञं पाँन्तु रजंसः पुरस्ताँत् । संवत्सरीणं-ममृतग्ग् स्वस्ति । यज्ञं नंः पान्तु वसंवः पुरस्ताँत् । दक्षिणतोंऽभियंन्तु श्रविंष्ठाः । पुण्यन्नक्षंत्त्रमभि संविंशाम।मा नो अरांति-रघशग्ंसाऽगन्नँ् ॥ २३ ॥

क्षत्त्रस्य राजा वरुंणोऽधिराजः। नक्षंत्त्राणाग्ं शतभिंषग्वसिंष्ठः। तौ देवेभ्यंः कृणुतो दीर्घमायुंः । शतग्ं सहस्रां भेषजानिं धत्तः । यज्ञन्नो राजा वरुंण उपंयातु । तन्नो विश्वें अभि संयंन्तु देवाः । तन्नो नक्षंत्त्रग्ं शतभिंषग्जुषाणम्।दीर्घमायुः प्रतिंरद्भेषजानिं ॥ २४ ॥

अज एकंपादुदंगात्पुरस्ताँत् । विश्वां भूतानिं प्रति मोदंमानः । तस्यं देवाः प्रंसवं यंन्ति सर्वेँ । प्रोष्ठपदासों अमृतंस्य गोपाः । विभ्राजंमानस्समिधान उग्रः । आऽन्तरिंक्षमरुहदगन्द्याम् । तग्ं सूर्यं देव-मजमेकंपादम् । प्रोष्ठपदासो अनुंयन्ति सर्वेँ ॥ २५ ॥

अहिंर्बुध्नियः प्रथंमान एति । श्रेष्ठों देवानांमुत मानुंषाणाम् ।

तं ब्राह्मणास्सोमपास्सोम्यासः । प्रोष्ठपदासोअभिरक्षन्ति सर्वे । चत्वार एकमभि कर्म देवाः । प्रोष्ठपदा स इति यान्, वदन्ति । ते बुध्नियं परिषद्यग्ग्ं स्तुवन्तः । अहिग्ं रक्षन्ति नमसोपसद्यं ॥ २६ ॥

पूषा रेवत्यन्वेति पन्थाम् । पुष्टिपती पशुपा वाजबस्त्यौ । इमानि हव्या प्रयता जुषाणा । सुगैर्नो यानैरुपयातां यज्ञम् । क्षुद्रान् पशून्रक्षतु रेवती नः । गावो नो अश्वाग्ं अन्वेतु पूषा । अन्नग्ं रक्षन्तौ बहुधा विरूपम् । वाजग्ं सनुतां यजमानाय यज्ञम् ॥ २७ ॥

तदश्विनावश्वयुजोपयाताम् । शुभङ्गमिष्ठौ सुयमेभिरश्वैः । स्वं नक्षत्त्रग्ं हविषा यजन्तौ । मध्वासम्पृक्तौ यजुषा समक्तौ । यौ देवानाभिषजौ हव्यवाहौ । विश्वस्य दूता-वमृतस्य गोपौ। तौ नक्षत्त्रं जुजुषाणोपयाताम् । नमोऽश्विभ्याग्ं कृणुमोऽश्वयुग्भ्याम् ॥ २८ ॥

अप पाप्मानं भरणीर्भरन्तु । तद्यमो राजा भगवान्, विचष्टाम् । लोकस्य राजा महतो महान्, हि । सुगं नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्त्रे यम एति राजा । यस्मिन्नेन-मभ्यषिंचन्त देवाः । तदस्य चित्रग्ं हविषा यजाम । अप पाप्मानं भरणीर्भरन्तु ॥ २९ ॥

निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती । सहस्र-पोषग्ं सुभगा रराणा सा न आगन्वर्चसा संविदाना । यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा । सा नो यज्ञं पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरम् ॥ ३० ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ नासदीय सूक्तम् ॥

ऋग्वेद संहिता.सूक्तम्.129,मण्डलम्.10,अष्टकम्.8,अ.7,अनु.11,वर्गम्.17,ऋक्.7

ऋषिः प्रजापतिः परमेष्ठी । भाववृत्तम् । त्रिष्टुप् ।

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥ १ ॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥ २ ॥

तम आसीत् तमसा गूळहनग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ॥ ३ ॥

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् । सतो
बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ ४ ॥

तिरश्चीनो विततो रश्मिरेषा मधः स्विदासी३दुपरि स्विदासी३त् । रेतोधा आसन् महिमान आसन्त्स्वधा अवस्तात् प्रयतिः परस्तात् ॥ ५ ॥

को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाऽथा को वेद यत आबभूव ॥ ६ ॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न । यो
अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥ ७ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ पुण्याहवाचनम् ॥

तै. संहिता - काण्डम् - 5, प्रपाठक : 6, अनु - 1
तै. ब्राह्मणम् - अष्टकम् - 1, प्रश्नः 4, अनु - 8

ॐ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्तान आपश्शग्ग् स्योना भवन्तु ॥ यासाग्ं राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शग्ग् स्योना भवन्तु ॥ यासाँ देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शग्ग् स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोप स्पृशत त्वचं मे। सर्वाग्ं अग्नीग् रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥१॥ पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मा देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूग्ं रनु। यत्ते पवित्रमर्चिषि। अग्ने वितंतमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्याँ देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे। वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदन्तः सधमाद्येषु। वयग्ग् स्याम पतयो रयीणाम्। वैश्वानरो रश्मिभिं-र्मा पुनातु। वातः प्राणेनेषिरो

मयो भूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्।

बृहद्भिः सवितस्तृभिः। वर्षिष्ठै-र्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा। येन देवा अपुनत। येनापो दिव्यंकशाः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे। यः पावमानीरद्ध्येति। ऋषिभि-स्संभृतꣳ रसम्। सर्वꣳ स पूतमश्नाति। स्वदितं मातरिश्वना। पावमानीर्यो अध्येति। ऋषिभिस्संभृतꣳ रसम्। तस्मै सरस्वती दुहे। क्षीरꣳ सर्पि-र्मधूदकम्॥ पावमानी-स्स्वस्त्ययनीः। सुदुघाहि पयस्वतीः। ऋषिभिस्संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्। पावमानीर्दिशन्तु नः। इमं लोकमथो अमुम्। कामान्थ्समर्धयन्तु नः। देवी-र्देवैः समाभृताः। पावमानीस्स्वस्त्ययनीः। सुदुघाहि घृतश्चुतः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्। येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनन्तु मा। प्राजापत्यं पवित्रम्। शतोद्यामꣳ हिरण्मयम्। तेन ब्रह्म विदो वयम्। पूतं ब्रह्म पुनीमहे। इन्द्रस्सुनीती सहमा पुनातु। सोमस्स्वस्त्या वरुणस्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु। भूर्भुवस्सुवः॥ २॥

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी-स्स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे। ॐ शान्ति-श्शान्ति-श्शान्तिः॥

॥ अथर्वण वेदमन्त्राः ॥

॥ रोग निवारणसूक्तम् ॥

(काण्डम्. 1 प्रपाठकः 1 अनुवाकः 3 सूक्तम्. 12)

जरायुजः प्रथम उस्रियो वृषा वातंभ्रजा स्तनयंन्नेति वृष्ट्या । स नों मृडाति तन्व ऋजुगो रुजन् य एकमोजंस्त्रेधा विंचक्रमे ॥ १ ॥

अङ्गेंअङ्गे शोचिषां शिश्रियाणं नंमस्यन्तंस्त्वा हविषां विधेम । अङ्कान्त्संमङ्कान् हविषां विधेम यो अग्रंभीत् पर्वंस्या ग्रभींता ॥ २ ॥

मुञ्च शींर्षक्त्या उत कांस एंनं परुंष्परुराविवेशा यो अंस्य । यो अंभ्रजा वांतजा यश्च शुष्मो वनस्पतींन्त्सचतां पर्वतांश्च ॥ ३ ॥

शं मे परंस्मै गात्रांय शमस्त्ववंराय मे । शं मे चतुर्भ्यो अङ्गेंभ्यः शमंस्तु तन्वे ३ मंम ॥ ४ ॥

यस्मात्सर्वमिदं प्रपञ्चरचितं मायाजगज्जायते
यस्मिंस्तिष्ठति याति चान्तसमये कल्पानुकल्पे पुनः ।
यं ध्यात्वा मुनयः प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं
तं वन्दे पुरुषोत्तमाख्यममलं नित्यं विभुं निश्चलम् ॥

ब्रह्मपुराणम् - अध्यायः १

Adoration unto the supreme Being, pure, eternal and all-pervading, the changeless Reality, the one Being, meditating upon whom sages attain liberation, eternal and undifferentiated; the One out of whom the visible world, the scene of diversity, comes into existence, in whom it rests, and to whom it returns in the end when the world-cycles come to a close.

॥ हिरण्यगर्भः सूक्तम् ॥

ऋग्वेदसंहिता : मं - 10 अष्टकम् - 8 सूक्तम् - 121

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ २ ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३ ॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ४ ॥

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ५ ॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥ ६ ॥

आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयंतीरग्निम् ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ ७ ॥

यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयंतीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥ ८ ॥

मा नो॑ हिंसीज्जनि॒ता यः पृ॑थि॒व्या यो वा॒ दिवं॑ स॒त्यध॑र्मा ज॒जान॑ ।
यश्चा॒पश्च॑न्द्रा बृ॑ह॒तीर्ज॒जान॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ ९ ॥

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव ।
यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒यं स्या॑म॒ पत॑यो र॒यीणाम् ॥ १० ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां॑सि जानताम् ।
दे॒वा भा॒गं यथा॒ पूर्वे॑ संजाना॒ना उ॒पास॑ते ।
स॒मा॒नो मन्त्रः समि॑तिः समा॒नी स॑मा॒नं मनः॑ स॒ह चि॒त्तमे॑षाम् ।
स॒मा॒नं मन्त्र॑मभि॒ मन्त्र॑ये वः समा॒नेन॑ वो ह॒विषा॑ जुहोमि ।
स॒मा॒नी व॒ आकू॑तिः समा॒ना हृद॑यानि वः ।
स॒मा॒नम॑स्तु वो॒ मनो॒ यथा॑ वः सुस॒हास॑ति ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ऋग्वेदसंहिता : १०/१९१/२-४

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैस्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

श्रीमद्भागवतम् - १२, १३, १.

॥ भाग्यसूक्तम् ॥

तै. ब्राह्मणम् - अष्टकम् - 2, प्रश्नः - 8, अनु - 9

ॐ प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना ।
प्रातर्भगꣳ पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रꣳ हुवेम ॥ १ ॥
प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्र-मदितेर्यो विधर्ता ।
आद्ध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २ ॥
भग प्रणेत-र्भग सत्यराधो भगेमां धियमुदवददन्नः ।
भगप्रणो जनय गोभि-रश्वैर्भगप्रनृभि-र्नृवन्तस्स्याम ॥ ३ ॥
उतेदानीं भगवन्तस्स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्थ्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥ ४ ॥
भगं एव भगवाꣳ अस्तु देवास्तेनं वयं भगवन्तस्स्याम ।
तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥ ५ ॥
समध्वरायोषसोऽनमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वावाजिन आवहन्तु ॥ ६ ॥
अश्वावती-र्गोमती-र्नउषासो वीरवतीस्सदं-मुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीनायूयं पात स्वस्तिभिस्सदा नः ॥ ७ ॥
यो माऽग्ने भागिनꣳ सन्त-मथाभागं चिकीर्षति ।
अभागमग्ने तं कुरु मामग्ने भागिनं कुरु ॥ ८ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ दशशान्तयः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्मा ऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासग्ं शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्मपृथिवी शर्म विश्वमिदं जगत्। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती। भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि

मधुं वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ३ ॥

ॐ शं नो वातःपवतां मातरिश्वा शं नस्तपतु सूर्यः। अहानि शं भवन्तु नश्शꣳ रात्रिः प्रतिधीयताम्। शमुषानो व्युच्छतु शमादित्य उदेतु नः। शिवा नश्शन्तमाभव सुमृडीका सरस्वति।

माते व्योम सन्दृशि। इडायैवास्त्वसि वास्तु मद्वास्तुमन्तो भूयास्म मा वास्तोः-श्छित्थस्मद्यवास्तुस्स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।

प्रतिष्ठासि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाः-श्छित्थस्मद्य प्रतिष्ठस्स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः। आवातवाहि भेषजं विवातवाहि यद्रपः। त्वꣳ हि विश्वभेषजो देवानां दूत ईयसे। द्वाविमौ वातौ वात आसिन्धोरापरावतः॥

दक्षं मे अन्य आवातु परान्योवातु यद्रपः। यददोवाततेगृहेऽमृतस्य निधिर् हितः। ततो नो देहि जीवसे ततो नो धेहि भेषजम्। ततो नो मह आवह वात आवातु भेषजम्।

शम्भूर्मयोभूर्नो हृदेप्रण आयूꣳषि तारिषत्। इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुस्साश्वः। सह यन्मे अस्ति तेन। भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवः प्रपद्ये वायुं प्रपद्येनार्तां देवतां

प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्मप्रपद्य ॐ प्रपद्ये ।

अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या स्वस्तिमान्तयाँ स्वस्त्या स्वस्तिमानसानि ।

प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मां हासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

द्युभि-रक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उतद्यौः । कयानश्चित्र आभुव दूती सदावृधस्सखा । कयाशचिष्ठया वृता । कस्त्वा सत्यो मदानां मगंहिष्ठो मथ्सदन्धसः । दृढा चिदारुजे वसु । अभीषुणस्सखीनामविता जरितॄणाम् ।

शतं भवास्यूतिभिः । वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णुहि पूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥

ईशानावार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् । सुमित्रान आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।

आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन। महेरणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाजयते ह नः। उशतीरिव मातरः। तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।

पृथिवी शान्ता साग्निना शान्ता सामे शान्ता शुचगं् शमयतु। अन्तरिक्षगं् शान्तं तद्वायुना शान्तं तन्मे शान्तगं् शुचगं् शमयतु। द्यौश्शान्ता सादित्येन शान्ता सा मे शान्ता शुचगं् शमयतु।

पृथिवी शान्तिरन्तरिक्षगं् शान्ति-र्द्यौ-श्शान्ति-र्दिश-श्शान्तिर-वान्तरदिशा-श्शान्तिर-ग्नि-श्शान्तिर-वायु-श्शान्तिर-रादित्य-श्शान्तिर-श्चन्द्रमा-श्शान्ति-र्नक्षत्राणि-शान्ति-राप-श्शान्ति-रोषधय-श्शान्ति-र्वनस्पतय-श्शान्ति-र्गौ-श्शान्तिर-जा-शान्ति-रश्व-श्शान्तिः पुरुष-श्शान्ति-र्ब्रह्म-शान्तिर-ब्राह्मण-श्शान्ति-श्शान्तिर-रेव शान्ति-श्शान्तिर-मे अस्तु शान्तिः।

तयाहगं् शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः॥

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्त-मनूत्तिष्ठन्तु मा माग् श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः।

उदायुषा स्वायुषोदोषधीनागं् रसेनोत्पर्जन्यस्य शुष्मेणो-दस्थाममृतागं् अनु। तच्चक्षुर्देवहितं पुरस्ताँच्छुक्रमुच्चरत्।

पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतगं् शृणवाम शरदश्शतं प्रब्रवाम शरदश्शतमजीतास्स्याम शरदश्शतं ज्योक्च सूर्यं दृशे।

य उदगान्महतोऽर्णवाँद्विभ्राजमानस्सरिरस्य मध्यात्समा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु॥

ब्रह्मणश्चोतन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीगं् सदेवां यदहं वेद तदहं धारयाणि मामद्वेदोऽधि विस्रसत्।

मेधामनीषे माविंशतागं् समीचीं भूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमायुरयाणि।

आभिर्गीर्भिर्यदतोन ऊनमाप्यायय हरिवो वर्धमानः। यदा स्तोतृभ्यो महिं गोत्रा रुजासिं भूयिष्ठभाजो अधं ते स्याम। ब्रह्म प्रावादिष्म तन्नो मा हासीत्॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ४॥

ॐ सं त्वां सिंचामि यजुषा प्रजामायुर्धनं च॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ५॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ६ ॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ७ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ८ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ९ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ १० ॥

॥ मन्त्रपुष्पम् ॥

ॐ भद्रङ्कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ॥ योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं वेद ॥

आयतनवान् भवति । आपो वा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति ॥

आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । असौ वै तपन्नपामायतनम् । आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद । आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् ॥

आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ।

आयतनवान् भवति । चन्द्रमा वा अपामायतनम् । आयतनवान् भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति ॥

य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । नक्षत्राणि वा अपामायतनम् । आयतनवान् भवति । यो नक्षत्राणामायतनं वेद । आयतनवान् भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान् भवति । य एवं वेद ॥

योऽपामायतनं वेद । आयतनवान् भवति । पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ॥

आयतनवान् भवति । संवत्सरो वा अपामायतनम् । आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥

ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

हरिः ॐ तत्सत् ॥

॥ क्षमा प्रार्थना ॥

ॐ विसर्ग बिन्दुमात्राणि पदपादाक्षराणि च । न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वर ॥ अपराध सहस्राणि क्रियन्तेऽहर्निशं मया । तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥

मध्ये मन्त्रतन्त्र स्वरवर्ण ध्याननियम न्यूनातिरिक्त लोपदोष प्रायश्चित्तार्थं अच्युतानन्तगोविन्द नामत्रय महामन्त्रजपं करिष्ये ॥

अच्युताय नमः ।
अनन्ताय नमः ।
गोविन्दाय नमः । [त्रिः]

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेस्स्वभावात् । करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

हरिः ॐ तत्सत् ॥

❁ ❁ ❁

॥ वेदान्त महावाक्यम् ॥

१. प्रज्ञानं ब्रह्म (ऋग्वेदः ऐतरेयोपनिषत् अ.३ खण्डः१ मं.३)
Consciousness is Brahman (Rigvedah)

२. अहं ब्रह्मास्मि (यजुर्वेदः बृहदारण्यकोपनिषत् अ.१ ब्रा.४ मं.१०)
I am Brahman (Yajurvedah)

३. तत्त्वमसि (सामवेदः छान्दोग्योपनिषत् अ.६ खण्डः ८ मं.७)
Thou art That (Samavedah)

४. अयमात्मा ब्रह्म (अथर्वण वेदः माण्डूक्योपनिषत् प्रथमः खण्डः१-२)*
This self is Brahman (Atharvanavedah)

Also for अयमात्मा ब्रह्म refer बृहदारण्यकोपनिषत् (अ.२ ब्रा.५ मं.१९)

श्री गायत्री देवी

[गायत्रीमन्त्रः]

ॐ भूर्भुव॒स्सुव॑ः ।
तत्स॑वि॒तुर्वरे॒ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥

(यजुर्वेदः)

श्री शारदा देवी

श्री शारदा देवी मन्दिरम् - रामकृष्ण मठ, खार (पश्चिम), मुम्बई

जननीं शारदां देवीं रामकृष्णं जगद्गुरुम् ।
पादपद्मे तयोः श्रित्वा प्रणमामि मुहुर्मुहुः ।।

- स्वामी अभेदानन्दः

To the Universal Mother Sarada devi and to Ramakrishna, the Teacher of the world, in bosom holding your Lotus Feet, I offer my Salutations to you again and again.

रामकृष्णानमनम्

श्रीरामाय श्रीकृष्णाय रामकृष्णाय ते नमः ।
सच्चिदानन्दरूपाय शारदापतये नमः ।।

I offer my salutation to Sri Rama, my salutation to Sri Krishna (-the previous divine incarnations of God); I offer my salutation to Ramakrishna (-Sri Ramakrishna clearly said "He who came as Rama and as Krishna has come now in this body-pointing to himself "). Sri Ramakrishna is known as great divine incarnation of God.

I offer my salutation to Him (Sri Ramakrishna) who is the embodiment of Existence-Knowledge-Bliss, my salutation to Him (Sri Ramakrishna) whose spiritual consort is Sarada Devi - the embodiment of divine power.

दिव्यस्तोत्रम्

त्वमेव माता च पिता

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव ।।

Prapanna Gita 28.

You are my Mother, you are my Father, you are my Friend, you are my Eternal Companion, you are my Knowledge, you are my Wealth, you are my All-in-All, O God of gods.

॥ श्रीः ॥

श्री महागणेशपञ्चरत्नस्तोत्रम् [1]

(श्री शङ्कराचार्य कृतम्)

मुदाकरात्त मोदकं सदा विमुक्तिसाधकम् । कलाधरावतंसकं विलासि लोकरक्षकम् । अनायकैक नायकं विनाशितेभदैत्यकम् । नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरम् । नमत्सुरारि निर्जरं नताधिकापदुद्धरम् । सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम् । महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्त लोकशङ्करं निरस्तदैत्यकुञ्जरम् । दरेतरोदरं वरं वरेभवक्त्रमक्षरम् । कृपाकरं क्षमाकरं मुदाकरं यशस्करम् । मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्ति भाजनम् । पुरारिपूर्व नन्दनं सुरारि गर्वचर्वणम् । प्रपञ्च नाशभीषणं धनञ्जयादि भूषणम् । कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

नितान्तकान्तदन्तकान्ति - मन्तकान्तकात्मजम् । अचिन्त्य-रूपमन्तहीन - मन्तरायकृन्तनम् । हृदन्तरे निरन्तरं वसन्तमेव योगिनाम् । तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महागणेश पञ्चरत्नमादरेण योऽन्वहम् । प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् । अरोगितामदोषतां सुसाहितीं सुपुत्रताम् । समाहितायु - रष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६ ॥

श्रीगणेशपञ्चरत्नम् [2]

सरागलोक दुर्लभं विरागिलोकपूजितम् । सुरासुरैर्नमस्कृतं जरापमृत्युनाशकम् । गिरागुरुं श्रियाहरिं जयन्ति यत्पदार्चकाः । नमामि तं गणाधिपं कृपापयः पयोनिधिम् ॥ १ ॥

गिरीन्द्रजामुखाम्बुज प्रमोददान भास्करम् । करीन्द्रवक्त्र मानताघ संघ वारणोद्यतम् । सरीसृपेशबद्धकुक्षिमाश्रयामि सन्ततम् । शरीरकान्ति निर्जिताब्ज बन्धुबालसन्ततिम् ॥ २ ॥

शुकादिमौनिवन्दितं गकारवाच्यमक्षरम् । प्रकाममिष्टदायिनं सकामनम्रपंक्तये । चकास तं चतुर्भुजैर्विकासपद्म पूजितम् । प्रकाशितात्मतत्त्वकं नमाम्यहं गणाधिपम् ॥ ३ ॥

नराधिपत्वदायकं स्वरादिलोकदायकम् । ज्वरादिरोगवारकं निराकृतासुरव्रजम् । कराम्बुजोल्लसत्सृणिं विकारशून्यमानसैः । हृदा सदा विभावितं मुदा नमामि विघ्नपम् ॥ ४ ॥

श्रमापनोदनक्षमं समाहितान्तरात्मनाम् । सुमादिभिस्सदार्चितं क्षमानिधिं गणाधिपम् । रमाधवादि पूजितं यमान्तकात्मसम्भवम् । शमादि षड्गुणप्रदं नमामि तं विभूतये ॥ ५ ॥

गणाधिपस्य पञ्चकं नृणामभीष्टदायकम् । प्रणामपूर्वकं जनाः पठन्ति ये मुदायुताः । भवन्ति ते विदां पुरः प्रगीत वैभवा जवात् । चिरायुषोधिक श्रियस्सुसूनवोनसंशयः ॥ ६ ॥

गणपति स्तोत्रम् [3]

अगजानन पद्मार्कं गजानन महर्निशम् । अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥ १ ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥ २ ॥

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ । अविघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥ ३ ॥

गजाननं भूत गणाधि सेवितं कपित्थ जम्बू फलसार भक्षकम् । उमासुतं शोकविनाश कारणं नमामि विघ्नेश्वर पाद पङ्कजम् ॥ ४ ॥

गुरुस्तोत्रम् [4]

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः । गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २ ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ३ ॥

अनेकजन्म-संप्राप्तकर्मबन्धविदाहिने । आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥ ४ ॥

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः । ममात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ ५ ॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् । द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ॥ ६ ॥

एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं । भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ७ ॥

- विश्वसारतन्त्रम्

गुर्वष्टकम् [5]

(श्री शङ्कराचार्य कृतम्)

शरीरं सुरूपं तथा वा कलत्रं
यशश्चारु चित्रं धनं मेरुतुल्यम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ १ ॥

कलत्रं धनं पुत्रपौत्रादि सर्वं
गृहं बान्धवाः सर्वमेतद्धि जातम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ २ ॥

षडङ्गादिवेदो मुखे शास्त्रविद्या
कवित्वादि गद्यं सुपद्यं करोति ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ३ ॥

विदेशेषु मान्यः स्वदेशेषु धन्यः
सदाचारवृत्तेषु मत्तो न चान्यः ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ४ ॥

क्षमामण्डले भूपभूपालवृन्दैः
सदा सेवितं यस्य पादारविन्दम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ५ ॥

यशो मे गतं दिक्षु दानप्रतापा-
ज्जगद्वस्तु सर्वं करे यत्प्रसादात् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ६ ॥

न भोगे न योगे न वा वाजिराजौ
न कान्तामुखे नैव वित्तेषु चित्तम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ७ ॥

अरण्ये न वा स्वस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ८ ॥

गुरोरष्टकं यः पठेत्पुण्यदेही
यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं
गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥ ९ ॥

सुवर्णमालास्तुतिः [6]

(श्री शङ्कराचार्य कृतम्)

ईश गिरीश नरेश परेश – महेश बिलेशय भूषण भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ १ ॥

उमया दिव्य सुमङ्गल विग्रह – यालिङ्गित वामाङ्ग विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ २ ॥

ऊरी कुरु मामज्ञमनाथं – दूरी कुरु मे दुरितं भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ३ ॥

ऋषिवर मानस हंस चराचर – जनन स्थिति लय कारण भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ४ ॥

अन्तःकरण विशुद्धिं भक्तिं – च त्वयि सतीं प्रदेहि विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ५ ॥

करुणा वरुणालय मयिदास – उदासस्तवोचितो न हि भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ६ ॥

जय कैलास निवास प्रमथ – गणाधीश भू सुरार्चित भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ७ ॥

झनुतक झङ्किणु झनुतत्किट तक – शब्दैर्नटसि महानट भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ८ ॥

धर्मस्थापन दक्ष त्र्यक्ष गुरो – दक्ष यज्ञशिक्षक भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ९ ॥

बलमारोग्यं चायुस्त्वद्गुण – रुचितां चिरं प्रदेहि विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ १० ॥

भगवन् भर्ग भयापह भूत-पते भूतिभूषिताङ्ग विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ ११ ॥

शर्व देव सर्वोत्तम सर्वद – दुर्वृत्त गर्वहरण विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ १२ ॥

षड्रिपु षड्ऊर्मि षड्विकार हर – सन्मुख षण्मुख जनक विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ १३ ॥

सत्यं ज्ञानमनन्तं ब्रह्मे – त्येतल्लक्षण लक्षित भो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ १४ ॥

हाऽहाऽहूऽहू मुख सुरगायक – गीता पदान पद्य विभो ।
साम्ब सदाशिव शम्भो शङ्कर – शरणं मे तव चरणयुगम् ॥ १५ ॥

शिवपञ्चाक्षरस्तोत्रम् [7]

(श्री शङ्कराचार्य कृतम्)

नागेन्द्रहाराय त्रिलोचनाय – भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय – तस्मै नकाराय नमः शिवाय ॥ १ ॥

मन्दाकिनी सलिल चन्दन चर्चिताय – नन्दीश्वर प्रमथनाथ महेश्वराय।
मन्दारपुष्पबहुपुष्पसुपूजिताय – तस्मै मकाराय नमः शिवाय ॥ २ ॥

शिवाय गौरीवदनाब्जबाल-सूर्याय दक्षाध्वरनाशकाय।
श्रीनीलकण्ठाय वृषध्वजाय – तस्मै शिकाराय नमः शिवाय ॥ ३ ॥

वसिष्ठकुम्भोद्भवगौतमार्य-मुनीन्द्रदेवार्चितशेखराय।
चन्द्रार्कवैश्वानरलोचनाय – तस्मै वकाराय नमः शिवाय ॥ ४ ॥

यज्ञस्वरूपाय जटाधराय – पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगम्बराय – तस्मै यकाराय नमः शिवाय ॥ ५ ॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ६ ॥

शिवषडक्षरस्तोत्रम् [8]

ॐकारं बिन्दु संयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥ १ ॥

नमन्ति ऋषयो देवा नमन्त्यप्सरसां गणाः।
नरा नमन्ति देवेशं नकाराय नमो नमः ॥ २ ॥

महादेवं महात्मानं महाध्यानं परायणम् ।
महापापहरं देवं मकाराय नमो नमः ॥ ३ ॥
शिवं शान्तं जगन्नाथं लोकानुग्रहकारकम् ।
शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४ ॥
वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् ।
वामे शक्तिधरं देवं वाकाराय नमो नमः ॥ ५ ॥
यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥ ६ ॥
षडक्षरमिदं स्तोत्रं यः पठेच्छिव सन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ७ ॥

इति श्री रुद्रयामले उमामहेश्वरसंवादे शिवषडक्षरस्तोत्रं सम्पूर्णम्

शिवाष्टकम् [9]

(श्री शङ्कराचार्य कृतम्)

तस्मै नमः परमकारणकारणाय–दीप्तोज्वलज्वलितपिङ्गल-लोचनाय । नागेन्द्रहारकृतकुण्डलभूषणाय – ब्रह्मेन्द्रविष्णु-वरदाय नमः शिवाय ॥ १ ॥

श्रीमत्प्रसन्नशशिपन्नगभूषणाय – शैलेन्द्रजा वदन चुम्बित-लोचनाय । कैलासमन्दिरमहेन्द्रनिकेतनाय – लोकत्रयार्ति-हरणाय नमः शिवाय ॥ २ ॥

पद्मावदातमणिकुण्डलगोवृषाय – कृष्णागरुप्रचुरचन्दन-चर्चिताय । भस्मानुषक्तविकचोत्पलमल्लिकाय – नीलाब्ज-कण्ठसदृशाय नमः शिवाय ॥ ३ ॥

लम्बत्सपिङ्गल जटामुकुटोत्कटाय – दंष्ट्राकरालविकटोत्कट भैरवाय । व्याघ्राजिनाम्बरधराय मनोहराय – त्रैलोक्यनाथ नमिताय नमः शिवाय ॥ ४ ॥

दक्षप्रजापतिमहामखनाशनाय – क्षिप्रं महात्रिपुरदानव-घातनाय । ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्तनाय – योगाय योगनमिताय नमः शिवाय ॥ ५ ॥

संसारसृष्टिघटनापरिवर्तनाय – रक्षः पिशाचगणसिद्धसमा-कुलाय । सिद्धोरगग्रह गणेन्द्रनिषेविताय – शार्दूल चर्मवसनाय नमः शिवाय ॥ ६ ॥

भस्माङ्गरागकृतरूपमनोहराय – सौम्यावदातवनमाश्रित-माश्रिताय । गौरीकटाक्षनयनार्ध निरीक्षणाय–गोक्षीरधारधवलाय नमः शिवाय ॥ ७ ॥

आदित्यसोमवरुणानिलसेविताय – यज्ञाग्निहोत्रवरधूम-निकेतनाय । ऋक्सामवेदमुनिभिः स्तुतिसंयुताय – गोपाय गोपनमिताय नमः शिवाय ॥ ८ ॥

शिवाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ । शिवलोक-मवाप्नोति शिवेन सह मोदते ॥ ९ ॥

द्वादशज्योतिर्लिङ्गस्तोत्रम् [10]

(श्री शङ्कराचार्य कृतम्)

सौराष्ट्रदेशे वसुधावकाशे । ज्योतिर्मयं चन्द्रकलावतंसम् ।
भक्तिप्रदानाय कृतावतारं । तं सोमनाथं शरणं प्रपद्ये ॥ १ ॥

श्रीशैलशृङ्गे विविधप्रसङ्गे शेषाद्रिशृङ्गेऽपि सदा वसन्तम् ।
तमर्जुनं मल्लिकपूर्वमेनं नमामि संसारसमुद्रसेतुम् ॥ २ ॥

अवन्तिकायां विहितावतारं । मुक्तिप्रदानाय च सज्जनानाम् ।
अकालमृत्योः परिरक्षणार्थं । वन्दे महाकालमहंसुरेशम् ॥ ३ ॥

कावेरिका नर्मदयोः पवित्रे । समागमे सज्जनतारणाय ।
सदैव मान्धातृपुरे वसन्त - मोङ्कारमीशं शिवमेकमीडे ॥ ४ ॥

पूर्वोत्तरे पारलिकाभिधाने । सदाशिवं तं गिरिजासमेतम् ।
सुरासुराराधितपादपद्मं श्रीवैद्यनाथं सततं नमामि ॥ ५ ॥

आमर्द संज्ञे नगरे च रम्ये । विभूषिताङ्गं विविधैश्च भोगैः ।
सद्भक्तिमुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये ॥ ६ ॥

हिमाद्रिपार्श्वेऽपि तटे रमन्तं । सम्पूज्यमानं सततं मुनीन्द्रैः ।
सुरासुरैर्यक्षमहोरगाद्यैः । केदारमीशं शिवमेकमीडे ॥ ७ ॥

सह्याद्रिशीर्षे विमले वसन्तं । गोदावरीतीरपवित्रदेशे ।
यद्दर्शनात्पातकमाशु नाशं । प्रयाति तं त्र्यम्बकमीशमीडे ॥ ८ ॥

श्रीताम्रपर्णीजलराशियोगे । निबध्य सेतुं निशि बिल्वपत्रैः ।

श्रीरामचन्द्रेण समर्पितं तं रामेश्वराख्यं सततं नमामि ॥ ९ ॥

यं डाकिनीशाकिनिकासमाजे – निषेव्यमाणं पिशिताशनैश्च ।
सदैव भीमादिपदप्रसिद्धं – तं शङ्करं भक्तहितं नमामि ॥ १० ॥

सानन्दमानन्दवने वसन्त-मानन्दकन्दं हतपापवृन्दम् ।
वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ ११ ॥

इलापुरे रम्यविशालकेऽस्मिन्–समुल्लसन्तं च जगद्वरेण्यम् ।
वन्दे महोदारतरस्वभावं–धृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥

ज्योतिर्मयद्वादशलिङ्गकानां–शिवात्मनां प्रोक्तमिदं क्रमेण। स्तोत्रं पठित्वा मनुजोऽतिभक्त्या–फलं तदालोक्य निजं भजेच्च ॥ १३ ॥

द्वादशज्योतिर्लिङ्गस्मरणम् [11]

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥ १ ॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥ २ ॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुश्मेशं च शिवालये ॥ ३ ॥
एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥ ४ ॥

वेदसारशिवस्तोत्रम् [12]

(श्री शङ्कराचार्य कृतम्)

पशूनां पतिं पापनाशं परेशं—गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं—महादेवमेकं स्मरामि स्मरारिम्॥ १॥

महेशं सुरेशं सुरारातिनाशं—विभुं विश्वनाथं विभूत्यङ्गभूषम्।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं—सदानन्दमीडे प्रभुं पञ्चवक्त्रम्॥ २॥

गिरीशं गणेशं गले नीलवर्णं — गवेन्द्राधिरूढं गुणातीतरूपम्।
भवं भास्वरं भस्मना भूषिताङ्गं — भवानीकलत्रं भजे पञ्चवक्त्रम्॥ ३॥

शिवाकान्त शम्भो शशाङ्कार्धमौले — महेशान शूलिन् जटाजूटधारिन्। त्वमेको जगद्व्यापको विश्वरूपः — प्रसीद प्रसीद प्रभो पूर्णरूप॥ ४॥

परात्मानमेकं जगद्बीजमाद्यं — निरीहं निराकारमोङ्कारवेद्यम्। यतो जायते पाल्यते येन विश्वं — तमीशं भजे लीयते यत्र विश्वम्॥ ५॥

न भूमिर्न चापो न वह्निर्न वायु-र्न चाकाशमास्ते न तन्द्रा न निद्रा। न ग्रीष्मो न शीतं न देशो न वेषो — न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे॥ ६॥

अजं शाश्वतं कारणं कारणानां — शिवं केवलं भासकं भासकानाम्। तुरीयं तमःपारमाद्यन्तहीनं — प्रपद्ये परं पावनं द्वैतहीनम्॥ ७॥

नमस्ते नमस्ते विभो विश्वमूर्ते – नमस्ते नमस्ते चिदानन्दमूर्ते। नमस्ते नमस्ते तपोयोगगम्य – नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥

प्रभो शूलपाणे विभो विश्वनाथ – महादेव शम्भो महेश त्रिनेत्र। शिवाकान्त शान्त स्मरारे पुरारे – त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥

शम्भो महेश करुणामय शूलपाणे – गौरीपते पशुपते पशुपाशनाशिन्। काशीपते करुणया जगदेतदेक-स्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥ १० ॥

त्वत्तो जगद्भवति देव भव स्मरारे – त्वय्येव तिष्ठति जगन्मृड विश्वनाथ। त्वय्येव गच्छति लयं जगदेतदीश – लिङ्गात्मकं हर चराचरविश्वरूपिन् ॥ ११ ॥

शिवजयजयकारध्यानस्तोत्रम् [13]

स्फटिकप्रतिभटकान्ते विरचितकलिमलशान्ते ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ १ ॥
गङ्गाधरपिङ्गलजट हृतशरणागत सङ्कट ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ २ ॥
बालसुधाकर शेखर भाललसद्वैश्वानर ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ३ ॥
पद्मदलायतलोचन दृढभवबन्धनमोचन ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ४ ॥

मन्दमधुरहासवदन निर्जितदुर्लसितमदन ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ५ ॥
सनकादिक वन्द्यचरण दुस्तरभवसिन्धुतरण ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ६ ॥
लालितबालगजानन कलितमहापितृकानन ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ७ ॥
सच्चिद्घनसुखसागर लीलापीतमहागर ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ८ ॥
गिरिजाश्लिष्टार्धतनो कल्पितगिरिराजधनो ।
शिव शङ्कर शिव शङ्कर जय कैलासपते ॥ ९ ॥

दारिद्र्यदहनशिवस्तोत्रम् [14]

(श्री वसिष्ठ कृतम्)

विश्वेश्वराय नरकार्णवतारणाय कर्णामृताय शशिशेखर-भूषणाय । कर्पूरकुन्दधवलाय जटाधराय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ १ ॥

गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधिप-कङ्कणाय । गङ्गाधराय गजराजविमर्दनाय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ २ ॥

भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय ।

ज्योतिर्मयाय पुनरुद्भववारणाय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ३ ॥

चर्माम्बराय शवभस्मविलेपनाय भालेक्षणाय फणिकुण्डल-मण्डिताय । मञ्जीरपादयुगलाय जटाधराय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ४ ॥

पञ्चाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डनाय । आनन्दभूमिवरदाय तमोहराय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ५ ॥

भानुप्रियाय दुरितार्णवतारणाय कालान्तकाय कमलासन-पूजिताय । नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ६ ॥

रामप्रियाय रघुनाथवरप्रदाय नागप्रियाय नागराज निकेतनाय । पुण्याय पुण्यचरिताय सुरार्चिताय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ७ ॥

मुक्तीश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय । मातङ्गचर्मवसनाय महेश्वराय दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ८ ॥

गौरीविलास भुवनाय महोदयाय पञ्चाननाय शरणागत रक्षकाय । शर्वाय सर्वजगतामधिपाय तस्मै दारिद्र्यदुःख दहनाय नमः शिवाय ॥ ९ ॥

शिवताण्डवस्तोत्रम् [15]

(श्री रावण कृतम्)

जटाटवीगलज्जलप्रवाहपावितस्थले गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम्। डमड्डमड्डमड्डमन्निनादवड्डमर्वयं चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥ १ ॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-विलोलवीचिवल्लरीविराज-मानमूर्द्धनि । धगद्धगद्धगज्ज्वललल्लाटपट्टपावके किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥ २ ॥

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर-स्फुरद्दिगन्तसन्ततिप्रमोद-मानमानसे । कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥ ३ ॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-कदम्बकुङ्कुमद्रवप्रलिप्त-दिग्वधूमुखे । मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ ४ ॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर-प्रसूनधूलिधोरणीविधूसराङ्घ्रि-पीठभूः। भुजङ्गराजमालया निबद्धजाटजूटकः श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥ ५ ॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा - निपीतपञ्चसायकं नमन्निलिम्पनायकम् । सुधामयूखलेखया विराजमानशेखरं महा-

कपालि सम्पदे शिरो जटालमस्तु नः ॥ ६ ॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल-द्धनञ्जयाहुतीकृतप्रचण्ड-पञ्चसायके । धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-प्रकल्पनैक-शिल्पिनि त्रिलोचने रतिर्मम ॥ ७ ॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुर-त्कुहूनिशीथिनीतमः प्रबन्ध-बद्धकन्धरः । निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः कला-निधानबन्धुरः श्रियं जगद्धुरन्धरः ॥ ८ ॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-वलम्बिकण्ठकन्दलीरुचि-प्रबद्धकन्धरम् । स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥ ९ ॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-रसप्रवाहमाधुरीविजृम्भ-णामधुव्रतम् । स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं-गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥ १० ॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस-द्विनिर्गमत्क्रमस्फुरत्कराल-भालहव्यवाट् । धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गल-ध्वनि-क्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥ ११ ॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो - र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः । तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥ १२ ॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्–विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् । विलोललोललोचनो ललामभाल-लग्नकः शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ १३ ॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं–पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् । हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥ १४ ॥

पूजावसानसमये दशवक्त्रगीतं – यः शम्भुपूजनपरं पठति प्रदोषे । तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां – लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥ १५ ॥

शिवमानसपूजा [16]

(श्री शङ्कराचार्य कृतम्)

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं–नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् । जातीचम्पक-बिल्वपत्ररचितं पुष्पं च धूपं तथा–दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १ ॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं–भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् । शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं–ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २ ॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं—वीणाभेरिमृदङ्ग-काहलकलागीतं च नृत्यं तथा । साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया—सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३ ॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं—पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो—यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४ ॥

करचरणकृतं वाक्कायजं कर्मजं वा—श्रवणनयनजं वा मानसं वाऽपराधम् । विदितमविदितं वा सर्वमेतत्क्षमस्व—जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ ५ ॥

श्री कैलासपति प्रार्थना [17]

कैलासे कमनीयरत्नखचिते कल्पद्रुमूले स्थितम् ।
कर्पूरस्फटिकेन्दु सुन्दरतनुं कात्यायनी सेवितम् ॥
गङ्गातुङ्ग तरङ्ग रञ्जित जटाभारं कृपासागरम् ।
कण्ठालङ्कृत शेषभूषणमजं मृत्युञ्जयं भावये ॥
आगच्छ मृत्युञ्जय चन्द्रमौले व्याघ्राजिनालङ्कृत शूलपाणे ।
स्वभक्त संरक्षण कामधेनो प्रसीद विश्वेश्वर पार्वतीश ॥
श्री उमामहेश्वराभ्यां नमः ॥

उमामहेश्वरस्तोत्रम् [18]

(श्री शङ्कराचार्य कृतम्)

नमः शिवाभ्यां नवयौवनाभ्यां – परस्पराश्लिष्ट वपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां – नमो नमः शङ्करपार्वतीभ्याम् ॥ १ ॥

नमः शिवाभ्यां सरसोत्सवाभ्यां – नमस्कृताभीष्टवरप्रदाभ्याम् ।
नारायणेनार्चितपादुकाभ्यां – नमो नमः शङ्करपार्वतीभ्याम् ॥ २ ॥

नमः शिवाभ्यां वृषवाहनाभ्यां–विरिञ्चिविष्णिवन्द्रसुपूजिताभ्याम् ।
विभूतिपाटीरविलेपनाभ्यां – नमो नमः शङ्करपार्वतीभ्याम् ॥ ३ ॥

नमः शिवाभ्यां जगदीश्वराभ्यां–जगत्पतिभ्यां जयविग्रहाभ्याम् ।
जम्भारिमुख्यैरभिवन्दिताभ्यां–नमो नमः शङ्करपार्वतीभ्याम् ॥ ४ ॥

नमः शिवाभ्यां परमौषधाभ्यां – पञ्चाक्षरी पञ्जररञ्जिताभ्याम् ।
प्रपञ्च सृष्टिस्थिति संहृताभ्यां–नमो नमः शङ्करपार्वतीभ्याम् ॥ ५ ॥

नमः शिवाभ्यामतिसुन्दराभ्याम्–अत्यन्तमासक्तहृदम्बुजाभ्याम् ।
अशेषलोकैकहितङ्कराभ्यां – नमो नमः शङ्करपार्वतीभ्याम् ॥ ६ ॥

नमः शिवाभ्यां कलिनाशनाभ्यां–कङ्कालकल्याणवपुर्धराभ्याम् ।
कैलासशैलस्थितदेवताभ्यां – नमो नमः शङ्करपार्वतीभ्याम् ॥ ७ ॥

नमः शिवाभ्यामशुभापहाभ्याम्–अशेषलोकैकविशेषिताभ्याम् ।
अकुण्ठिताभ्यां स्मृतिसंभृताभ्यां–नमो नमः शङ्करपार्वतीभ्याम् ॥ ८ ॥

नमः शिवाभ्यां रथवाहनाभ्यां – रवीन्दुवैश्वानरलोचनाभ्याम्।
राका शशाङ्काभ मुखाम्बुजाभ्यां–नमो नमः शङ्करपार्वतीभ्याम्॥ ९॥

नमः शिवाभ्यां जटिलन्धराभ्यां–जरामृतिभ्यां च विवर्जिताभ्याम्।
जनार्दनाब्जोद्भवपूजिताभ्यां–नमो नमः शङ्करपार्वतीभ्याम्॥ १०॥

नमः शिवाभ्यां विषमेक्षणाभ्यां–बिल्वच्छदामल्लिकदामभृद्भ्याम्।
शोभावती शान्तवतीश्वराभ्यां–नमो नमः शङ्करपार्वतीभ्याम्॥ ११॥

नमः शिवाभ्यां पशुपालकाभ्यां – जगत्त्रयीरक्षण बद्धहृद्भ्याम्।
समस्त देवासुरपूजिताभ्यां–नमो नमः शङ्करपार्वतीभ्याम्॥ १२॥

स्तोत्रं त्रिसन्ध्यं शिवपार्वतीभ्यां–भक्त्या पठेद्द्वादशकं नरो यः।
स सर्वसौभाग्य फलानि भुङ्क्ते शतायुरन्ते शिवलोकमेति ॥ १३॥

॥ इति उमामहेश्वरस्तोत्रम् सम्पूर्णम् ॥

अर्धनारीश्वरस्तोत्रम् [19]

(श्री शङ्कराचार्य कृतम्)

चाम्पेयगौरार्धशरीरकायै कर्पूरगौरार्धशरीरकाय।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ॥ १॥

कस्तूरिकाकुङ्कुमचर्चितायै चितारजः पुञ्जविचर्चिताय।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ॥ २॥

झणत्क्वणत्कङ्कणनूपुरायै पादाब्जराजत्फणिनूपुराय।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय ॥ ३॥

विशालनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय ॥ ४ ॥

मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥ ५ ॥

अम्भोधरश्यामलकुन्तलायै तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥ ६ ॥

प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय ॥ ७ ॥

प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः शिवायै च नमः शिवाय ॥ ८ ॥

एतत्पठेदष्टकमिष्टदं यो भक्त्या स मान्यो भुवि दीर्घजीवी ।
प्राप्नोति सौभाग्यमनन्तकालं भूयात्सदा तस्य समस्तसिद्धिः ॥ ९ ॥

महामृत्युञ्जयस्तोत्रम् [20]

ॐ अस्य श्रीमहामृत्युञ्जयस्तोत्रमन्त्रस्य श्री मार्कण्डेय ऋषिः अनुष्टुप् छन्दः । श्रीमृत्युञ्जयो देवता । गौरी शक्तिः । मम सर्वारिष्ट समस्त मृत्युशान्त्यर्थं सकलैश्वर्य प्राप्त्यर्थं च जपे विनियोगः ॥

॥ अथ ध्यानम् ॥

चन्द्रार्काग्नि विलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं, मुद्रापाश-मृगाक्ष-सूत्रविलसत्पाणिं हिमांशुप्रभं । कोटीन्दु-प्रगलत्सुधाप्लुत तनुं हारादि भूषोज्ज्वलं, कान्तं विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥

ॐ रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १ ॥
नीलकण्ठं कालमूर्तिं कालज्ञं कालनाशनं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ २ ॥
नीलकण्ठं विरूपाक्षं निर्मलं निलयप्रभं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ३ ॥
वामदेवं महादेवं लोकनाथं जगद्गुरुं।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ४ ॥
देवदेवं जगन्नाथं देवेशं वृषभध्वजं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ५ ॥
गङ्गाधरं महादेवं सर्वाभरण भूषितं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ६ ॥
अनाथः परमानन्दं कैवल्यपदगामिनं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ७ ॥
स्वर्गापवर्गदातारं सृष्टिस्थितिविनाशकं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ८ ॥

उत्पत्तिस्थिति संहारकर्तारमीश्वरं गुरुं।

नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ९ ॥

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ।

तस्य मृत्युभयं नास्ति नाग्निचोरभयं क्वचित् ॥ १० ॥

शतावृत्तं प्रकर्तव्यं संकटे कष्टनाशनं।

शुचिर्भूत्वा पठेत् स्तोत्रं सर्वसिद्धिप्रदायकं ॥ ११ ॥

मृत्युञ्जय महादेव त्राहि मां शरणागतं।

जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥ १२ ॥

तावकस्त्वद्गत प्राणस्त्वच्चित्तोऽहं सदा मृड।

इति विज्ञाप्य देवेशं त्र्यम्बकाख्यमनुं जपेत् ॥ १३ ॥

नमःशिवाय साम्बाय हरये परमात्मने।

प्रणत क्लेशनाशाय योगिनां पतये नमः ॥ १४ ॥

शताङ्गायुर्मन्त्रः

ॐ ह्रीं श्रीं ह्रीं ह्रों ह्रैं ह्रः हन हन दह दह पच पच गृहाण गृहाण मारय मारय मर्दय मर्दय महा महा भैरव भैरवरूपेण धूनय धूनय कम्पय कम्पय विघ्नय विघ्नय विश्वेश्वर क्षोभय क्षोभय कटु कटु मोहय हुं फट् स्वाहा। इति मन्त्रमत्रेण समाभीष्टो भवति ॥

इति श्रीमार्कण्डेयपुराणे मार्कण्डेयकृत महामृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥



मृतसञ्जीवनस्तोत्रम् [21]

॥ वसिष्ठकृतम् ॥

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरं ।
मृतसञ्जीवनं नाम्ना कवचं प्रजपेत् सदा ॥ १ ॥
सारात् सारतरं पुण्यं गुह्याद्गुह्यतरं शुभं ।
महादेवस्य कवचं मृतसञ्जीवनामकं ॥ २ ॥
समाहितमना भूत्वा शृणुष्व कवचं शुभं ।
शृत्वैतद्दिव्य कवचं रहस्यं कुरु सर्वदा ॥ ३ ॥
वराभयकरो यज्वा सर्वदेवनिषेवितः ।
मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ॥ ४ ॥
दधानः शक्तिमभयां त्रिमुखं षड्भुजः प्रभुः ।
सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥ ५ ॥
अष्टादशभुजोपेतो दण्डाभयकरो विभुः ।
यमरूपी महादेवो दक्षिणस्यां सदावतु ॥ ६ ॥
खड्गाभयकरो धीरो रक्षोगणनिषेवितः ।
रक्षोरूपी महेशो मां नैर्ऋत्यां सर्वदावतु ॥ ७ ॥
पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।
वरुणात्मा महादेवः पश्चिमे मां सदावतु ॥ ८ ॥
गदाभयकरः प्राणनायकः सर्वदागतिः ।
वायव्यां मारुतात्मा मां शङ्करः पातु सर्वदा ॥ ९ ॥
शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।

सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ॥ १० ॥
शूलाभयकरः सर्वविद्यानामधिनायकः ।

ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥ ११ ॥
ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माऽधः सदावतु ।

शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ॥ १२ ॥
भ्रूमध्यं सर्वलोकेशस्त्रिणेत्रो लोचनेऽवतु ।

भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥ १३ ॥
नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।

जिह्वां मे दक्षिणामूर्तिर्दन्तान्मे गिरिशोऽवतु ॥ १४ ॥
मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः ।

पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥ १५ ॥
पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।

नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतीपतिः ॥ १६ ॥
कटद्वयं गिरीशो मे पृष्ठं मे प्रमथाधिपः ।

गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥ १७ ॥
जानुनी मे जगद्धर्ता जङ्घे मे जगदम्बिका ।

पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥ १८ ॥
गिरिशः पातु मे भार्यां भवः पातु सुतान्मम ।

मृत्युञ्जयो ममायुष्यं चित्तं मे गणनायकः ॥ १९ ॥
सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।

एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥ २० ॥
मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ॥ २१ ॥
यः पठेच्छृणुयान्नित्यं श्रावयेत्सु समाहितः ।
सकालमृत्युं निर्जित्य सदायुष्यं समश्नुते ॥ २२ ॥
हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।
आधयोव्याधयस्तस्य न भवन्ति कदाचन ॥ २३ ॥
कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ॥ २४ ॥
युद्धारम्भे पठित्वेदमष्टाविंशतिवारकं ।
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ॥ २५ ॥
न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।
विजयं लभते देवयुद्धमध्येऽपि सर्वदा ॥ २६ ॥
प्रातरुत्थाय सततं यः पठेत्कवचं शुभं ।
अक्षय्यं लभते सौख्यमिह लोके परत्र च ॥ २७ ॥
सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः ।
अजरामरणो भूत्वा सदा षोडशवार्षिकः ॥ २८ ॥
विचरव्यखिलान् लोकान् प्राप्य भोगांश्च दुर्लभान् ।
तस्मादिदं महागोप्यं कवचं समुदाहृतम् ॥ २९ ॥
मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम् ॥ ३० ॥

शिवस्तोत्रम् [22]

(स्वामी विवेकानन्दः)

निखिलभुवनजन्मस्थेमभङ्गप्ररोहाः – अकलितमहिमानः कल्पिता यत्र तस्मिन् । सुविमलगगनाभे ईशसंस्थेऽप्यनीशे – मम भवतु भवेऽस्मिन् भासुरो भावबन्धः ॥ १ ॥

निहतनिखिलमोहेऽधीशता यत्र रूढा – प्रकटितपरप्रेम्ना यो महादेवसंज्ञः । अशिथिलपरिरंभः प्रेमरूपस्य यस्य–हृदि प्रणयति विश्वं व्याजमात्रं विभुत्वम् ॥ २ ॥

वहति विपुलवातः पूर्वसंस्काररूपः – विदलति बलवृन्दं घूर्णितेवोर्मिमाला । प्रचलति खलु युग्मं – युष्मदस्मत्प्रतीतं अतिविकलितरूपं नौमि चित्तं शिवस्थम् ॥ ३ ॥

जनकजनितभावो वृत्तयः संस्कृताश्च – अगणनबहुरूपो यत्र चैको यथार्थः । शमितविकृतिवाते यत्र नान्तर्बहिश्च – तमहह हरमीडे चित्तवृत्तेर्निरोधम् ॥ ४ ॥

गलिततिमिरमालः शुभ्रतेजः प्रकाशः – धवलकमलशोभः ज्ञानपुञ्जाट्टहासः । यमिजनहृदिगम्यो निष्कलो ध्यायमानः – प्रणतमवतु मां सः मानसो राजहंसः ॥ ५ ॥

दुरितदलनदक्षं दक्षजादत्तदोषं–कलितकलिकलङ्कं कम्रकह्ला-रकान्तम् । परहितकरणाय प्राणप्रच्छेदप्रीतं – नतनयननियुक्तं नीलकण्ठं नमामः ॥ ६ ॥

निर्वाणषट्कम् [23]

(श्री शङ्कराचार्य कृतम्)

मनोबुद्ध्यहङ्कारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमी न तेजो न वायु-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥

न च प्राणसंज्ञो न वै पञ्चवायु-
र्न वा सप्तधातुर्न वा पञ्चकोषाः ।
न वाक्पाणिपादं न चोपस्थपायू
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ २ ॥

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्ष-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ३ ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मन्त्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ४ ॥

न मृत्युर्न शङ्का न मे जातिभेदः
पिता नैव मे नैव माता न जन्म ।

न बन्धुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ५ ॥
अहं निर्विकल्पो निराकाररूपो
विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासङ्गतं नैव मुक्तिर्न मेय-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

कालभैरवाष्टकम् [24]

देवराज-सेव्यमान-पावनाङ्घ्रि-पङ्कजं
व्यालयज्ञसूत्र-मिन्दुशेखरं कृपाकरम् ।
नारदादि-योगिवृन्द-वन्दितं दिगम्बरं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ १ ॥
भानु-कोटि-भास्वरं भवाब्धि-तारकं परं
नीलकण्ठ-मीप्सितार्थ-दायकं त्रिलोचनम् ।
कालकालमम्बुजाक्ष-मक्षशूल-मक्षरं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ २ ॥
शूलटङ्क-पाशदण्डपाणि-मादिकारणं
श्यामकाय-मादिदेव-मक्षरं निरामयम् ।

भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ ३ ॥
भुक्ति-मुक्ति-दायकं प्रशस्त-चारुविग्रहं
भक्तवत्सलं स्थितं समस्त-लोक-विग्रहम् ।
विनिक्वणन्मनोज्ञ-हेमकिङ्किणी-लसत्कटिं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ ४ ॥
धर्मसेतु-पालकं त्वधर्म-मार्ग-नाशकं
कर्मपाश-मोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्ण-शेषपाश-शोभिताङ्गमण्डलं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ ५ ॥
रत्नपादुका-प्रभाभिराम-पादयुग्मकं
नित्यमद्वितीय-मिष्टदैवतं निरञ्जनम् ।
मृत्यु-दर्प-नाशनं करालदंष्ट्र-मोक्षणं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ ६ ॥
अट्टहास-भिन्नपद्म-जाण्डकोश-सन्ततिं
दृष्टिपात-नष्टपाप-जालमुग्र-शासनम् ।
अष्टसिद्धि-दायकं कपाल-मालिकन्धरं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ ७ ॥
भूतसंघ-नायकं विशालकीर्ति-दायकं
काशिवासलोक-पुण्यपाप-शोधकं विभुम् ।

नीतिमार्ग-कोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथ-कालभैरवं भजे ॥ ८ ॥
कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञान-मुक्ति-साधनं विचित्र-पुण्य-वर्धनम् ।
शोक-मोह-दैन्य-लोभ-कोप-ताप-नाशनम्
ते प्रयान्ति कालभैरवाङ्घ्रि-सन्निधिं ध्रुवम् ॥ ९ ॥

इति श्रीमच्छंकराचार्यविरचितं कालभैरवाष्टकं सम्पूर्णम् ॥

आदित्यहृदयम् [25]

(वाल्मीकि रामायणे युद्धकाण्डे ११३ सर्गः)

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्राम-मगस्त्यो भगवान् ऋषिः ॥ २ ॥
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥ ३ ॥
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्य-मक्षय्यं परमं शिवम् ॥ ४ ॥
सर्वमङ्गल-माङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोक-प्रशमन-मायुर्वर्धन-मुत्तमम् ॥ ५ ॥

रश्मिमन्तं समुद्यन्तं देवासुर-नमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मि-भावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥
एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥ ८ ॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायु-र्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानु-र्हिरण्यरेता दिवाकरः ॥ १० ॥
हरिदश्वः सहस्रार्चिः सप्तसप्ति-र्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्ड अंशुमान् ॥ ११ ॥
हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः ॥ १२ ॥
व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ॥ १४ ॥
नक्षत्रग्रहताराणा-मधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥ १५ ॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योति-र्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥
जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ १७ ॥
नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ॥ १८ ॥
ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥
तप्तचामीकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥
नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥
वेदाश्च ऋतवश्चैव ऋतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥

फलश्रुतिः

एन-मापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥

पूजयस्वैन-मेकाग्रो देवदेवं जगत्पतिम् ।

एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।

एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ॥ २७ ॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।

धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।

त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।

सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥

अथ रवि-रवद-न्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।

निशिचरपति-संक्षयं विदित्वा सुरगण-मध्यगतो वचस्त्वरेति ॥ ३१ ॥

नवग्रहदेवता प्रार्थना [26]

सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः ।

सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।

राहुर्बाहुबलं करोतु विपुलं केतुः कुलस्योन्नतिम् ।

नित्यं प्रीतिकरा भवन्तु भवतां सर्वे प्रसन्ना ग्रहाः ॥

आदित्यादि नवग्रह देवताभ्यो नमः ॥

श्रीरामचन्द्रस्तवः [27]

(गोस्वामिश्रीतुलसीदास कृतम्)

उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम् । सर्वश्रेयस्करीं सीतां नतोऽहं रामवल्लभाम् ॥ १ ॥

यन्मायावशवर्ति विश्वमखिलं ब्रह्मादिदेवासुराः – यत्सत्त्वादमृषैव भाति सकलं रज्जौ यथाऽहेर्भ्रमः । यत्पादः प्लवमेव भाति हि भवाम्भोधेस्तितीर्षावताम् – वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥ २ ॥

प्रसन्नतां या न गताभिषेकत-स्तथा न मम्लौ वनवास दुःखतः । मुखाम्बुजश्री रघुनन्दनस्य मे–सदाऽस्तु सा मञ्जुलमङ्गलप्रदा ॥ ३ ॥

नीलाम्बुजश्यामलकोमलाङ्गं–सीतासमारोपितवामभागम् । पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥ ४ ॥

मूलं धर्मतरोर्विवेकजलधेः पूर्णेन्दुमानन्ददं–वैराग्याम्बुजभास्करं त्वघहरं ध्वान्तापहं तापहम् । मोहाम्भोधरपुञ्जपाटनविधौ खे सम्भवं शङ्करम् । वन्दे ब्रह्मकुलकलङ्कशमनं श्रीरामभूपं प्रियम् ॥ ५ ॥

सान्द्रानन्दपयोदसौभगतनुं पीताम्बरं सुन्दरं–पाणौ बाणशरासनं कटिलसत्तूणीरभारं वरम् । राजीवायतलोचनं धृतजटाजूटेन संशोभितं – सीतालक्ष्मणसंयुतं पथिगतं रामाभिरामं भजे ॥ ६ ॥

कुन्देन्दीवर-सुन्दरावतिबलौ विज्ञान-धामावुभौ – शोभाढ्यौ

वरधन्विनौ श्रुतिनुतौ गोविप्रवृन्दप्रियौ । मायामानुषरूपिणौ रघुवरौ सद्धर्मवर्मौ हि तौ – सीतान्वेषणतत्परौ पथिगतौ भक्तिप्रदौ तौ हि नः ॥ ७ ॥

ब्रह्माम्भोधिसमुद्भवं कलिमलप्रध्वंसनं चाव्ययं श्रीमच्छम्भु-मुखेन्दुसुन्दरवरे संशोभितं सर्वदा । संसारामय-भेषजं सुमधुरं श्रीजानकीजीवनं – धन्यास्ते कृतिनः पिबन्ति सततं श्रीरामनामामृतम् ॥ ८ ॥

शान्तं शाश्वतमप्रमेयमनघं निर्वाणशान्तिप्रदं ब्रह्माशम्भु-फणीन्द्रसेव्यमनिशं वेदान्तवेद्यं विभुम् । रामाख्यं जगदीश्वरं सुरगुरुं मायामनुष्यं हरिं – वन्देऽहं करुणाकरं रघुवरं भूपाल-चूडामणिम् ॥ ९ ॥

केकीकण्ठाभनीलम् सुरवरविलसद्विप्रपादाब्जचिह्नम् । शोभाढ्यं पीतवस्त्रं सरसिजनयनं सर्वदा सुप्रसन्नम् । पाणौ नाराचचापं कपिनिकरयुतं बन्धुना सेव्यमानम् – नौमीड्यं जानकीशं रघुवरमनिशं पुष्पकारूढरामम् ॥ १० ॥

आर्तानामार्तिहन्तारं भीतानां भयनाशनम् । द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥ ११ ॥

श्रीराघवं दशरथात्मजमप्रमेयं – सीतापतिं रघुकुलान्वय-रत्नदीपम् । आजानुबाहुमरविन्ददलायताक्षं – रामं निशाचर-विनाशकरं नमामि ॥ १२ ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे – मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् । अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं – व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ १३ ॥

नान्या स्पृहा रघुपते हृदयेऽस्मदीये – सत्यं वदामि च भवानखिलान्तरात्मा । भक्तिं प्रयच्छ रघुपुङ्गव निर्भरां मे कामादिदोषरहितं कुरु मानसं च ॥ १४ ॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ १५ ॥

रामाय रामचन्द्राय रामभद्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १६ ॥

कृष्णाष्टकम् [28]

(श्री शङ्कराचार्य कृतम्)

श्रियाश्लिष्टो विष्णुः स्थिरचरगुरुर्वेदविषयो
धियां साक्षी शुद्धो हरिरसुरहन्ताब्जनयनः ।
गदी शङ्खी चक्री विमलवनमाली स्थिररुचिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ १ ॥

यतः सर्वं जातं वियदनिलमुख्यं जगदिदं
स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा ।
लये सर्वं स्वस्मिन् हरति कलया यस्तु स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ २ ॥

असूनायम्यादौ यमनियममुख्यैः सुकरणै-
र्निरुद्धयेदं चित्तं हृदि विलयमानीय सकलम् ।
यमीड्यं पश्यन्ति प्रवरमतयो मायिनमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ३ ॥
पृथिव्यां तिष्ठन् यो यमयति महीं वेद न धरा
यमित्यादौ वेदो वदति जगतामीशममलम् ।
नियन्तारं ध्येयं मुनिसुरनृणां मोक्षदमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ४ ॥
महेन्द्रादिर्देवो जयति दितिजान् यस्य बलतो
न कस्य स्वातन्त्र्यं क्वचिदपि कृतौ यत्कृतिमृते ।
बलारातेर्गर्वं परिहरति योऽसौ विजयिनः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ५ ॥
विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां
विना यस्य ज्ञानं जनिमृतिभयं याति जनता ।
विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ६ ॥
नरातङ्कोट्टङ्कः शरणशरणो भ्रान्तिहरणो
घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः ।
स्वयम्भूर्भूतानां जनक उचिताचारसुखदः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ७ ॥

यदा धर्मग्लानिर्भवति जगतां क्षोभकरणी
तदा लोकस्वामी प्रकटितवपुः सेतुधृगजः ।
सतां धाता स्वच्छो निगमगणगीतो व्रजपतिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ८ ॥

जगन्नाथाष्टकम् [29]

कदाचित्कालिन्दीतटविपिनसङ्गीतकवरो
मुदा गोपीनारीवदनकमलास्वादमधुपः ।
रमाशंभुब्रह्मामरपतिगणेशार्चितपदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ १ ॥
भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे
दुकूलं नेत्रान्ते सहचरकटाक्षं विदधत् ।
सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ २ ॥
महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादान्तः सहजबलभद्रेण बलिना ।
सुभद्रामध्यस्थः सकलसुरसेवावसरदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ३ ॥
कृपापारावारः सजलजलदश्रेणिरुचिरो
रमावाणीसोम स्फुरदमलपद्मोद्भवमुखैः ।

सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ४ ॥
रथारूढो गच्छन् पथि मिलितभूदेवपटलैः
स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः ।
दयासिन्धुर्बन्धुः सकलजगतां सिन्धुसुतया
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ५ ॥
परब्रह्मापीडः कुवलयदलोत्फुल्लनयनो
निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दो राधासरसवपुरालिङ्गनसुखो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ६ ॥
न वै प्रार्थ्यं राज्यं न च कनकता भोगविभवे
न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ७ ॥
हर त्वं संसारं द्रुततरमसारं सुरपते
हर त्वं पापानां वितातिमपरां यादवपते ।
अहो दीनानाथं निहितमचलं पातुमनिशं
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ८ ॥
जगन्नाथाष्टकं पुण्यं यः पठेत् प्रयतः शुचिः ।
सर्वपापविशुद्धात्मा विष्णुलोकं स गच्छति ॥ ९ ॥

श्रीमदनमोहनाष्टकम् [30]

जय शंखगदाधर नीलकलेवर पीतपटाम्बर देहि पदम् ।
जय चन्दनचर्चित कुण्डलमण्डित कौस्तुभशोभित देहि पदम् ॥ १ ॥

जय पङ्कजलोचन मारविमोहन पापविखण्डन देहि पदम् ।
जय वेणुनिनादक रासविहारक वङ्किम सुन्दर देहि पदम् ॥ २ ॥

जय धीरधुरन्धर अद्भुतसुन्दर दैवतसेवित देहि पदम् ।
जय विश्वविमोहन मानसमोहन संस्थितिकारण देहि पदम् ॥ ३ ॥

जय भक्तजनाश्रय नित्यसुखालय अन्तिमबान्धव देहि पदम् ।
जय दुर्जनशासन केलिपरायण कालियमर्दन देहि पदम् ॥ ४ ॥

जय नित्यनिरामय दीनदयामय चिन्मय माधव देहि पदम् ।
जय पामरपावन धर्मपरायण दानवसूदन देहि पदम् ॥ ५ ॥

जय वेदविदांवर गोपवधूप्रिय वृन्दावनधन देहि पदम् ।
जय सत्यसनातन दुर्गतिभञ्जन सज्जनरञ्जन देहि पदम् ॥ ६ ॥

जय सेवकवत्सल करुणासागर वाञ्छितपूरक देहि पदम् ।
जय पूतधरातल देवपरात्पर सत्त्वगुणाकर देहि पदम् ॥ ७ ॥

जय गोकुलभूषण कंसनिषूदन सात्वतजीवन देहि पदम् ।
जय योगपरायण संसृतिवारण ब्रह्मनिरञ्जन देहि पदम् ॥ ८ ॥

श्रीः

श्रीवेङ्कटेशप्रपत्तिः [31]

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं। तद्वक्षस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धिनीम्। पद्मालङ्कृत-पाणिपल्लवयुगां पद्मासनस्थां श्रियं वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥ १ ॥

श्रीमन् कृपाजलनिधे कृतसर्वलोक। सर्वज्ञ शक्त नतवत्सल सर्वशेषिन्। स्वामिन् सुशील सुलभाश्रितपारिजात। श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ २ ॥

आनूपुरार्पितसुजातसुगन्धिपुष्प—सौरभ्यसौरभकरौ समसन्नि-वेशौ। सौम्यौसदाऽनुभवनेऽपि नवानुभाव्यौ। श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ३ ॥

सद्योविकासिसमुदित्वरसान्द्ररागौ सौरभ्यनिर्भरसरोरुहसाम्य-वार्ताम्। सम्यक्षु साहसपदेषु विलेखयन्तौ। श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ४ ॥

रेखामयध्वजसुधाकलशातपत्र। वज्राङ्कुशाम्बुरुहकल्पकशङ्ख-चक्रैः। भव्यैरलङ्कृततलौ परतत्त्वचिह्नैः। श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ५ ॥

ताम्रोदरद्युतिपराजितपद्मरागौ। बाह्यैर्महोभिरभि भूत महेन्द्र-

नीलौ । उद्यन्नखांशुभिरुदस्त शशाङ्कभासौ । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ६ ॥

सप्रेमभीति कमलाकरपल्लवाभ्यां । संवाहनेऽपि सपदि क्लममादधानौ । कान्तावबाङ्मन सगोचर सौकुमार्यौ । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ७ ॥

लक्ष्मीमहीतदनुरूपनिजानुभाव । नीलादिदिव्यमहिषीकरपल्लवानाम् । आरुण्यसंक्रमणतः किल सान्द्ररागौ । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ८ ॥

नित्यानमद्विधिशिवादिकिरीटकोटि । प्रत्युप्तदीप्तनवरत्नमहः प्ररोहैः । नीराजनाविधिमुदारमुपाददानौ । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ९ ॥

विष्णोः पदे परम इत्युदितप्रशंसौ यौमध्व उत्स इति भोग्यतयाऽप्युपात्तौ । भूयस्तथेति तव पाणितलप्रदिष्टौ । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १० ॥

पार्थाय तत्सदृशसारथिना त्वयैव । यौ दर्शितौ स्वचरणौ शरणं व्रजेति । भूयोऽपि मह्यमिह तौ करदर्शितौ ते । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ११ ॥

मन्मूर्ध्नि कालियफणे विकटाटवीषु । श्रीवेङ्कटाद्रिशिखरे शिरसि श्रुतीनाम् । चित्तेऽप्यनन्यमनसां सममाहितौ ते ।

श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १२ ॥

अम्लानहृष्यदवनीतलकीर्णपुष्पौ। श्रीवेङ्कटाद्रिशिखराभरणाय-मानौ । आनन्दिताखिलमनोनयनौ तवैतौ। श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १३ ॥

प्रायः प्रपन्नजनताप्रथमावगाह्यौ । मातुस्स्तनाविव शिशोर-मृतायमानौ । प्राप्तौ परस्परतुलामतुलान्तरौ ते । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १४ ॥

सत्त्वोत्तरैस्सततसेव्यपदाम्बुजेन। संसारतारकदयार्द्रदृगञ्चलेन। सौम्योपयन्तृमुनिना मम दर्शितौ ते । श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १५ ॥

श्रीश श्रिया घटिकया त्वदुपायभावे । प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या । नित्याश्रिताय निरवद्यगुणाय तुभ्यं स्यां किङ्करो वृषगिरीश न जातु मह्यम् ॥ १६ ॥

॥ इति श्रीवेङ्कटेशप्रपत्तिः ॥

श्रीवेङ्कटेशमङ्गलाशासनम् [32]

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १ ॥

लक्ष्मीसविभ्रमालोक सुभ्रूविभ्रमचक्षुषे ।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥ २ ॥

श्रीवेङ्कटाद्रिशृङ्गाग्र मङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय श्रीनिवासाय मङ्गलम् ॥ ३ ॥

सर्वावयवसौन्दर्यसम्पदा सर्वचेतसाम् ।
सदा संमोहनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ४ ॥

नित्याय निरवद्याय सत्यानन्दचिदात्मने ।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गलम् ॥ ५ ॥

स्वतस्सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम् ॥ ६ ॥

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।
प्रयुञ्जे परतत्त्वाय वेङ्कटेशाय मङ्गलम् ॥ ७ ॥

आकालतत्त्वमश्रान्तमात्मनामनुपश्यताम् ।
अतृप्त्यमृतरूपाय वेङ्कटेशाय मङ्गलम् ॥ ८ ॥

प्रायस्स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।
कृपयाऽऽदिशते श्रीमद्वेङ्कटेशाय मङ्गलम् ॥ ९ ॥

दयामृततरङ्गिण्यास्तरङ्गैरिव शीतलैः ।
अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम् ॥ १० ॥

स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये ।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ११ ॥

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे ।
रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥ १२ ॥
श्रीमत्सुन्दरजामातृमुनिमानसवासिने ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥ १३ ॥
मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैस्सत्कृतायास्तु मङ्गलम् ॥ १४ ॥

॥ इति श्रीवेङ्कटेशमङ्गलाशासनम् ॥

श्रीजगद्धात्रीस्तोत्रम् [33]

(श्रीजगद्धात्री कल्पः)

आधारभूते चाधेये धृतिरूपे धुरन्धरे ।
ध्रुवे ध्रुवपदे धीरे जगद्धात्रि नमोऽस्तु ते ॥ १ ॥
शवाकारे शक्तिरूपे शक्तिस्थे शक्तिविग्रहे ।
शाक्ताचारप्रिये देवि जगद्धात्रि नमोऽस्तु ते ॥ २ ॥
जयदे जगदानन्दे जगदेकप्रपूजिते ।
जय सर्वगते दुर्गे जगद्धात्रि नमोऽस्तु ते ॥ ३ ॥
सूक्ष्मातिसूक्ष्मरूपे च प्राणापानादिरूपिणि ।
भावाभावस्वरूपे च जगद्धात्रि नमोऽस्तु ते ॥ ४ ॥
कालादिरूपे कालेशे कालाकाल विभेदिनि ।
सर्वस्वरूपे सर्वज्ञे जगद्धात्रि नमोऽस्तु ते ॥ ५ ॥

महाविघ्ने महोत्साहे महामाये वरप्रदे ।
प्रपञ्चसारे साध्वीशे जगद्धात्रि नमोऽस्तु ते ॥ ६ ॥

अगम्ये जगतामाद्ये माहेश्वरि वराङ्गने ।
अशेषरूपे रूपस्थे जगद्धात्रि नमोऽस्तु ते ॥ ७ ॥

द्विसप्तकोटिमन्त्राणां शक्तिरूपे सनातनि ।
सर्वशक्तिस्वरूपे च जगद्धात्रि नमोऽस्तु ते ॥ ८ ॥

तीर्थयज्ञतपोदानयोगसारे जगन्मयि ।
त्वमेव सर्वं सर्वस्थे जगद्धात्रि नमोऽस्तु ते ॥ ९ ॥

दयारूपे दयादृष्टे दयार्द्रे दुःखमोचनि ।
सर्वापत्तारिके दुर्गे जगद्धात्रि नमोऽस्तु ते ॥ १० ॥

अगम्यधामधामस्थे महायोगीशहृत्पुरे ।
अमेयभावकूटस्थे जगद्धात्रि नमोऽस्तु ते ॥ ११ ॥

मीनाक्षीपञ्चरत्नम् [34]

(श्री शङ्कराचार्य कृतम्)

उद्यद्भानुसहस्रकोटिसदृशां केयूरहारोज्ज्वलां ।
बिम्बोष्ठीं स्मितदन्तपङ्क्तिरुचिरां पीताम्बरालङ्कृताम् ।
विष्णुब्रह्मसुरेन्द्रसेवितपदां तत्त्वस्वरूपां शिवां ।
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ॥ १ ॥

मुक्ताहारलसत्किरीटरुचिरां पूर्णेन्दुवक्त्रप्रभां ।
शिञ्जन्नूपुरकिङ्किणीमणिधरां पद्मप्रभाभासुराम् ।
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेविताम् ।
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ॥ २ ॥

श्रीविद्यां शिववामभागनिलयां ह्रींकारमन्त्रोज्ज्वलां ।
श्रीचक्राङ्कितबिन्दुमध्यवसतिं श्रीमत्सभानायिकाम् ।
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीम् ।
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ॥ ३ ॥

श्रीमत्सुन्दरनायिकां भयहरां ज्ञानप्रदां निर्मलां ।
श्यामाभां कमलासनार्चितपदां नारायणस्यानुजाम् ।
वीणावेणुमृदङ्ग वाद्यरसिकां नानाविधामम्बिकाम् ।
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ॥ ४ ॥

नानायोगिमुनीन्द्रहृत्सुवसतिं नानार्थसिद्धिप्रदां ।
नानापुष्पविराजिताङ्घ्रियुगलां नारायणेनार्चिताम् ।
नादब्रह्ममयीं परात्परतरां नानार्थतत्त्वात्मिकाम् ।
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ॥ ५ ॥

मीनाक्षीस्तोत्रम् [35]

(श्री शङ्कराचार्य कृतम्)

श्रीविद्ये शिववामभागनिलये श्रीराजराजार्चिते
श्रीनाथादिगुरुस्वरूपविभवे चिन्तामणीपीठिके ।
श्रीवाणीगिरिजानुताङ्घ्रिकमले श्रीशाम्भवि श्रीशिवे
मध्याह्ने मलयध्वजाधिपसुते मां पाहि मीनाम्बिके ॥ १ ॥

चक्रस्थेऽचपले चराचरजगन्नाथे जगत्पूजिते
आर्तालीवरदे नताभयकरे वक्षोजभारान्विते ।
विद्ये वेदकलापमौलिविदिते विद्युल्लताविग्रहे
मातः पूर्णसुधारसार्द्रहृदये मां पाहि मीनाम्बिके ॥ २ ॥

कोटीराङ्गदरत्नकुण्डलधरे कोदण्डबाणाञ्चिते
कोकाकारकुचद्वयोपरिलसत्प्रालम्बिहाराञ्चिते ।
शिञ्जन्नूपुरपादसारसमणिश्रीपादुकालङ्कृते
मद्दारिद्र्यभुजङ्गगारुडखगे मां पाहि मीनाम्बिके ॥ ३ ॥

ब्रह्मेशाच्युतगीयमानचरिते प्रेतासनान्तःस्थिते
पाशोदङ्कुशचापबाणकलिते बालेन्दुचूडाञ्चिते ।
बाले बालकुरङ्गलोलनयने बालार्ककोट्युज्ज्वले
मुद्राराधितदेवते मुनिनुते मां पाहि मीनाम्बिके ॥ ४ ॥

गन्धर्वामरयक्षपन्नगनुते गङ्गाधरालिङ्गिते
गायत्रीगरुडासने कमलजे सुश्यामले सुस्थिते ।

खातीते खलदारुपावकशिखे खद्योतकोट्युज्ज्वले
मन्त्राराधितदेवते मुनिनुते मां पाहि मीनाम्बिके ॥ ५ ॥
नादे नारदतुम्बुराद्यविनुते नादान्तनादात्मिके
नित्ये नीललतात्मिके निरुपमे नीवारशूकोपमे ।
कान्ते कामकले कदम्बनिलये कामेश्वराङ्कस्थिते
मद्विद्ये मदभीष्टकल्पलतिके मां पाहि मीनाम्बिके ॥ ६ ॥
वीणानादनिमीलितार्धनयने विस्रस्तचूलीभरे
ताम्बूलारुणपल्लवाधरयुते ताटङ्कहारान्विते ।
श्यामे चन्द्रकलावतंसकलिते कस्तूरिकाफालके
पूर्णे पूर्णकलाभिरामवदने मां पाहि मीनाम्बिके ॥ ७ ॥
शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी वाङ्मयी
नित्यानन्दमयी निरञ्जनमयी तत्त्वंमयी चिन्मयी ।
तत्त्वातीतमयी परात्परमयी मायामयी श्रीमयी
सर्वैश्वर्यमयी सदाशिवमयी मां पाहि मीनाम्बिके ॥ ८ ॥

अम्बास्तोत्रम् [36]

(स्वामी विवेकानन्दः)

का त्वं शुभे शिवकरे सुखदुःखहस्ते
आघूर्णितं भवजलं प्रबलोर्मिभङ्गैः ।
शान्तिं विधातुमिह किं बहुधा विभग्नाम्
मातः प्रयत्नपरमासि सदैव विश्वे ॥ १ ॥

सम्पादयन्त्यविरतं त्वविरामवृत्ता
या वै स्थिता कृतफलं त्वकृतस्य नेत्री ।
सा मे भवत्वनुदिनं वरदा भवानी
जानाम्यहं ध्रुवमियं धृतकर्मपाशा ॥ २ ॥

किं वा कृतं किमकृतं क्व कपाललेखः
किं कर्म वा फलमिहास्ति हि यां विना भोः ।
इच्छागुणैर्नियमिता नियमाः स्वतन्त्रै-
र्यस्याः सदा भवतु सा शरणं ममाद्या ॥ ३ ॥

सन्तानयन्ति जलधिं जनिमृत्युजालम्
सम्भावयन्त्यविकृतं विकृतं विभग्नम् ।
यस्या विभूतय इहामितशक्तिपालाः
नाश्रित्य तां वद कुतः शरणं व्रजामः ॥ ४ ॥

मित्रे रिपौ त्वविषमं तव पद्मनेत्रम्
स्वस्थेऽसुखे त्ववितथस्तव हस्तपातः ।
छाया मृतेस्तव दया त्वमृतं च मात-
र्मुञ्चन्तु मां न परमे शुभदृष्टयस्ते ॥ ५ ॥

क्वाम्बा शिवा क्व गृणनं मम हीनबुद्धे-
र्दोर्भ्यां विधर्तुमिव यामि जगद्विधात्रीम् ।

चिन्त्यं श्रिया सुचरणं त्वभयप्रतिष्ठम्
सेवापरैरभिनुतं शरणं प्रपद्ये ॥ ६ ॥
या मा चिराय विनयत्यतिदुःखमार्गै-
रासिद्धितः स्वकलितैर्ललितैर्विलासैः ।
या मे मतिं सुविदधे सततं धरण्यां
साम्बा शिवा मम गतिः सफलेऽफले वा ॥ ७ ॥

अन्नपूर्णास्तोत्रम् [37]

(श्री शङ्कराचार्य कृतम्)

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १ ॥
नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागुरुवासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ २ ॥
योगानन्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।

सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ३ ॥

कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ओङ्कारबीजाक्षरी
मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ४ ॥

दृश्यादृश्यप्रभूतपावनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ५ ॥

उर्वीसर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी
वेणीनीलसमानकुन्तलहरी नित्यान्नदानेश्वरी ।
सर्वानन्दकरी दशाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ६ ॥

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरा त्रिजनेश्वरी त्रिलहरी नित्याङ्कुरा शर्वरी ।
कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ७ ॥

दर्वी स्वर्णविचित्ररत्नखचिता दक्षे करे संस्थिता
वामे स्वादुपयोधरी सहचरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी दृशा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ८ ॥

चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशकाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ९ ॥

क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १० ॥

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥ ११ ॥

माता मे पार्वती देवी पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ १२ ॥

इन्द्राक्षी स्तोत्रम् [38]

ॐ अस्य इन्द्राक्षी स्तोत्रमहामन्त्रस्य शचीपुरंदर ऋषिः अनुष्टुप् छन्दः। इन्द्राक्षी देवता। महालक्ष्मिर्बीजम्। भुवनेश्वरी शक्तिः। महेश्वरी कीलकम्। इन्द्राक्षी देवी प्रसाद सिद्ध्यर्थे जपे विनियोगः।

अथ करन्यासः

ॐ इन्द्राक्षीं अंगुष्टाभ्यां नमः।
ॐ महालक्ष्मी तर्जनीभ्यां नमः।
ॐ महेश्वरीं मध्यमाभ्यां नमः।
ॐ अम्बुजाक्षीं अनामिकाभ्यां नमः।
ॐ कात्यायनीं कनिष्ठिकाभ्यां नमः।
ॐ कौमारीं करतलकरपृष्ठाभ्यां नमः।

अथ अंगन्यासः

ॐ इन्द्राक्षीं हृदयाय नमः।
ॐ महालक्ष्मीं शिरसे स्वाहा।
ॐ महेश्वरीं शिखायै वषट्।
ॐ अम्बुजाक्षीं कवचाय हुं।
ॐ कात्यायनीं नेत्रत्रयाय वौषट्।
ॐ कौमारीं अस्त्राय फट्।
॥ भू-र्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ अथ ध्यानम् ॥

नेत्राणां दशभिश्शतैः परिवृतामत्युग्र चर्माम्बरां ।
हेमाभां महतीं विलम्बित शिखा मा मुक्तकेशान्वितां
घन्टामण्डित पादपद्मयुगलां नागेन्द्रकुम्भस्तनीं ।
इन्द्राक्षीं परिचिन्तयामि सततं प्रत्यक्ष सिद्धिप्रदाम् ॥
इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्वितां ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ।
इन्द्राक्षीं नौमि युवतीं नानालंकार भूषितां ।
प्रसन्न वदनाम्भोजामप्सरो-गणसेविताम् ॥

॥ अथ इन्द्राक्षी स्तोत्र प्रारम्भः ॥

॥ इन्द्र उवाच ॥

इन्द्राक्षी पूर्वतः पातु पात्वाग्नेय्यां तथेश्वरी ।
कौमारी दक्षिणे पातु नैर्ऋत्यां पातु पार्वती ॥
वाराही पश्चिमे पातु वायव्ये नारसिंह्यपि ।
उदीच्यां कालरात्रिर्मामीशान्यां सर्वशक्तयः ॥
भैरव्यूर्ध्वं सदा पातु पात्वधो वैष्णवी तथा ।
एवं दशदिशो रक्षेत्सर्वाङ्गं भुवनेश्वरी ॥
इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गानाम्नीति विश्रुता ॥
कात्यायनी महादेवी चण्डघंटा महातपा ।

सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥
नारायणी भद्रकाली रुद्राणी कृष्ण पिङ्गला ।
अग्निज्वाला रौद्रमुखी कालरात्री तपस्विनी ॥
मेघस्वना सहस्राक्षी विकटाङ्गी जडोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥
अजिता भद्रदाऽनन्ता रोगहर्त्री शिवप्रिया ।
शिवदूती कराली च शक्तिश्च परमेश्वरी ॥
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
महिषासुर संहारी चामुण्डा सप्तमातृका ॥
सर्वरोग प्रशमनी नारायणी नमोऽस्तुते ।
इन्द्राणी चेन्द्ररूपा च इन्द्रशक्तिः परायणी ॥
वाराही नारसिंही च भीमा भैरव नादिनी ।
सदा संमोहिनी देवी सुन्दरी भुवनेश्वरी ।
एकाक्षरी महामायी एकाङ्गी एकनायकी ॥
कोमल श्यामलारूपी कोटिसूर्यप्रकाशिनी ।
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ॥
अनन्ता विजयाऽपर्णा मानस्तोकाऽपराजिता ।
भवानी पार्वती दुर्गा हैमवत्यम्बिका जया ॥
शिवा भवानी रुद्राणी शङ्करार्धशरीरिणी ।
ऐरावत गजारूढा वज्रहस्ता धनुर्धरा ॥

ऐन्द्री देवी सदाकालं शान्तिमाशु करोतु मे ।
एतैर्नाम पदैर्दिव्यैः स्तुता शक्रेण धीमता ।
आयुरारोग्यमैश्वर्यमपमृत्युभयापहं ।
क्षयाऽपस्मारकुष्ठादि तापज्वर निवारणं ।
शीतज्वर निवारणं उष्णज्वर निवारणं ।
सन्निज्वर निवारणं सर्वज्वर निवारणं ।
सर्वरोग निवारणं सर्वशत्रु निवारणं ।
महाभय निवारणं मनःक्लेश निवारणं ।
शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्तयन् सहस्रं तु लभते वाञ्छितं फलं ।
एतत् स्तोत्रं जपेन्नित्यं सर्वव्याधिविनाशनं ।
रणे राजभये चोरे सर्वत्र विजयी भवेत् ॥
सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बिके गौरि नारायणि नमोऽस्तुते ॥
त्रिपाद्भस्म प्रहरणस्त्रिशिरा रक्तलोचनः ।
स मे प्रीतः सुखं दद्यात् सर्वामय पतिर्ज्वरः ।
ज्वरं च ज्वरसारं च ज्वरातीसारमेव च ।
सन्निपात ज्वरं चैव शीतोष्ण ज्वरमेव च ।
कौबेरन्ते मुखं रौद्रं नन्दिमन्नन्दिमावह ।
ज्वरं मृत्युभयं घोरं ज्वरं नाशये मे ज्वर ।

भस्मायुधाय विद्महे रक्तनेत्राय धीमहि।
तन्नो ज्वरः प्रचोदयात्॥
ज्वरराजाय विद्महे त्रिशिरस्काय धीमहि।
तन्नस्त्रिपात् प्रचोदयात्॥
मृत्योस्तुल्यं त्रिलोकीं ग्रसितु-
मतिरसान्निस्सृताः किंनु जिह्वाः
किं वा कृष्णांघ्रिपद्मद्युतिभि-
ररुणिता विष्णुपद्याः पदव्यः।
प्राप्ताः संध्याः स्मरारेः स्वयमुत
नुतिभिस्तिस्र इत्यूह्यमानाः
दिव्यैर्देव्या स्त्रिशूलक्षत-
महिषजुषो रक्तधारा जयन्ति॥
मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेला-निर्मित-धूम्रलोचन-वधे हे चण्डमुण्डार्दिनि।
निःशेषीकृत-रक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके॥
अष्टौ भुजाङ्गीं महिषस्य मर्दिनीं
सशंखचक्रां शरशूलधारिणीं।
तां दिव्ययोगीं सहजातवेदसीं
दुर्गां सदाऽहं शरणं प्रपद्ये॥

महिषमस्तकनृत्तविनोदन-
स्फुटरणन्मणिनूपुरमेखला ।
जननरक्षणमोक्षविधायिनी
जयतु शुम्भनिशुम्भनिषूदिनी ॥

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी दंष्ट्री च चक्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु मां मातरः ॥

उद्धतौ मधुकैटभौ महिषासुरं तु निहत्य तं
धूम्रलोचन- चण्डमुण्डक- रक्तबीजमुखांश्च तान् ।
दुष्ट-शुम्भनिशुम्भमर्दिनि नन्दितामरवन्दिते
विष्टपत्रय-पुष्टिकारिणि भद्रकालि नमोऽस्तुते ॥

लक्ष्मी-प्रदान-समये नवविद्रुमाभां
विद्या-प्रदान-समये शरदिन्दु शुभ्रां ।
विद्वेषि वर्गविजयेऽपि तमाल-नीलां
देवीं त्रिलोक-जननीं शरणं प्रपद्ये ॥

श्री महादेव्यै नमः ॥

इन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥

(श्रीमार्कण्डेयपुराणम्)

कनकधारास्तोत्रम् [39]

(कनकलक्ष्मी स्तवः)

(श्री शङ्कराचार्य कृतम्)

अङ्गं हरेः पुलक-भूषणमाश्रयन्ती । भृङ्गाङ्गनेव मुकुलाभरणं तमालम् । अङ्गीकृताखिल-विभूतिरपाङ्गलीला । माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥ १ ॥

मुग्धा मुहुर्विदधती वदने मुरारेः । प्रेमत्रपाप्रणिहितानि गतागतानि । मालादृशोर्मधुकरीव महोत्पले या । सा मे श्रियं दिशतु सागरसम्भवायाः ॥ २ ॥

विश्वामरेन्द्र-पदविभ्रमदानदक्षमानन्द -हेतुरधिकं मधुविद्विषो ऽपि । ईषन्निषीदतु मयि क्षणमीक्षणार्धमिन्दीवरोदर-सहोदर-मिन्दिरायाः ॥ ३ ॥

आमीलिताक्षमधिगम्य मुदा मुकुन्दमानन्दकन्दमनिमेष-मनङ्गतन्त्रम् । आकेकरस्थितकनीनिकपक्ष्मनेत्रम् भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥ ४ ॥

बाह्वन्तरे मुरजितःश्रितकौस्तुभे या । हारावलीव हरिनीलमयी विभाति । कामप्रदा भगवतोऽपि कटाक्षमाला । कल्याणमावहतु मे कमलालयायाः ॥ ५ ॥

कालाम्बुदालि ललितोरसि कैटभारेः । धाराधरे स्फुरति या

तडिदङ्गनेव । मातुस्समस्तजगतां महनीय मूर्तिः । भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ ६ ॥

प्राप्तं पदं प्रथमतः खलु यत्प्रभावान्माङ्गल्यभाजि मधुमाथिनि मन्मथेन । मय्यापतेत्तदिह मन्थरमीक्षणार्धम् । मन्दालसं च मकराकर- कन्यकायाः ॥ ७ ॥

दद्याद्दयानुपवनो द्रविणाम्बुधारामस्मिन्नकिञ्चन विहङ्गशिशौ विषण्णे । दुष्कर्मघर्ममपनीय चिराय दूरम् । नारायणप्रणयिनी नयनाम्बुवाहः ॥ ८ ॥

इष्टा विशिष्टमतयोऽपि नरा यया द्राक् । दृष्टास्त्रिविष्टपपदं सुलभं भजन्ते । दृष्टिः प्रहृष्टकमलोदर-दीप्तिरिष्टाम् । पुष्टिं कृषीष्ट मम पुष्कर- विष्टरायाः ॥ ९ ॥

गीर्देवतेति गरुडध्वजसुन्दरीति । शाकम्भरीति शशिशेखर-वल्लभेति । सृष्टिस्थितिप्रलय-केलिषु संस्थितायै । तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै ॥ १० ॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै । रत्यै नमोऽस्तु रमणीय गुणार्णवायै । शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै । पुष्ट्यै नमोऽस्तु पुरुषोत्तम - वल्लभायै ॥ ११ ॥

नमोऽस्तु नालीकनिभाननायै । नमोऽस्तु दुग्धोदधि जन्मभूम्यै । नमोऽस्तु सोमामृतसोदरायै । नमोऽस्तु नारायण-वल्लभायै ॥ १२ ॥

नमोऽस्तु हेमाम्बुजपीठिकायै । नमोऽस्तु भूमण्डलनायिकायै । नमोऽस्तु देवादि- दयापरायै । नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ १३ ॥

नमोऽस्तु देव्यै भृगुनन्दनायै । नमोऽस्तु विष्णोरुरसि स्थितायै । नमोऽस्तु लक्ष्म्यै कमलालयायै । नमोऽस्तु दामोदर -वल्लभायै ॥ १४ ॥

नमोऽस्तु कान्त्यै कमलेक्षणायै । नमोऽस्तु भूत्यै भुवन- प्रसूत्यै । नमोऽस्तु देवादिभिरर्चितायै । नमोऽस्तु नन्दात्मज वल्लभायै ॥ १५ ॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि । साम्राज्यदान- निरतानि सरोरुहाक्षि । त्वद्वन्दनानि दुरिताहरणोद्यतानि । मामेव मातरनिशं कलयन्तु मान्ये ॥ १६ ॥

यत्कटाक्ष-समुपासनाविधिः । सेवकस्य सकलार्थसम्पदः । सन्तनोति वचनाङ्गमानसैः । त्वां मुरारिहृदयेश्वरीं भजे ॥ १७ ॥

सरसिजनिलये सरोजहस्ते । धवलतमांशुकगन्धमाल्य-शोभे । भगवति हरिवल्लभे मनोज्ञे । त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १८ ॥

दिग्घस्तिभिः कनककुम्भमुखावसृष्टस्वर्वाहिनी - विमलचारुजल प्लुताङ्गीम् । प्रातर्नमामि जगतां जननीमशेषलोकादिनाथ- गृहिणी - ममृताब्धिपुत्रीम् ॥ १९ ॥

कमले कमलाक्षवल्लभे त्वं । करुणापूर तरङ्गितै-रपाङ्गैः । अवलोकय मामकिंचनानाम् । प्रथमं पात्रमकृत्रिमन्दयायाः ॥ २० ॥

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहम् । त्रयीमयीं त्रिभुवनमातरं रमाम् । गुणाधिका गुरुतरभाग्यभाजिनो । भवन्ति ते भुवि बुधभाविताशयाः ॥ २१ ॥

महालक्ष्म्यष्टकम् [40]

(पद्मपुराणम्)

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ १ ॥
नमस्ते गरुडारूढे कोलासुरभयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ २ ॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ ३ ॥
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥ ४ ॥
आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥ ५ ॥
स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ ६ ॥
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥ ७ ॥

श्वेताम्बरधरे देवि नानालङ्कारभूषिते ।

जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥ ८ ॥

महालक्ष्म्यष्टकस्तोत्रं यः पठेद् भक्तिमान्नरः ।

सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥ ९ ॥

एककाले पठेन्नित्यं महापापविनाशनम् ।

द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥ १० ॥

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।

महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥ ११ ॥

श्रीसरस्वतीस्तोत्रम् [41]

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रान्विता या वीणावर दण्डमण्डितकरा या श्वेतपद्मासना । या ब्रह्माच्युतशङ्कर प्रभृतिभिर्देवैः सदा पूजिता । सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ १ ॥

आशासु राशीभवदङ्गवल्ली भासैव दासीकृतदुग्धसिन्धुम् । मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दासनसुन्दरि त्वाम् ॥ २ ॥

शारदा शारदाम्भोजवदना वदनाम्बुजे । सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥ ३ ॥

सरस्वतीं च तां नौमि वागधिष्ठातृदेवताम् । देवत्वं प्रतिपद्यन्ते यदनुग्रहतो जनाः ॥ ४ ॥

पातु नो निकषग्रावा मतिहेम्नः सरस्वती । प्राज्ञेतरपरिच्छेदं वचसैव करोति या ॥ ५ ॥

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं । वीणापुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम् । हस्ते स्फाटिकमालिकां च दधतीं पद्मासने संस्थितां – वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ ६ ॥

वीणाधरे विपुलमङ्गलदानशीले भक्तार्तिनाशिनि विरिञ्चिहरीश-वन्द्ये । कीर्तिप्रदेऽखिलमनोरथदे महार्हे – विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥ ७ ॥

श्वेताब्जपूर्णविमलासनसंस्थिते हे – श्वेताम्बरावृतमनोहर-मञ्जुगात्रे । उद्यन्मनोज्ञसितपङ्कजमञ्जुलास्ये विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥ ८ ॥

मातस्त्वदीयपदपङ्कजभक्तियुक्ता – ये त्वां भजन्ति निखिला-नपरान्विहाय । ते निर्जरत्वमिह यान्ति कलेवरेण-भूवह्निवायुगगनाम्बुविनिर्मितेन ॥ ९ ॥

मोहान्धकारभरिते हृदये मदीये – मातः सदैव कुरु वासमुदार-भावे । स्वीयाखिलावयवनिर्मलसुप्रभाभिः – शीघ्रं विनाशय मनोगतमन्धकारम् ॥ १० ॥

ब्रह्मा जगत् सृजति पालयतीन्दिरेशः – शम्भुर्विनाशयति देवि

तव प्रभावैः । न स्यात्कृपा यदि तव प्रकटप्रभावे – न स्युः कथञ्चिदपि ते निजकार्यदक्षाः ॥ ११ ॥

लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः । एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ॥ १२ ॥

सरस्वत्यै नमो नित्यं भद्रकाल्यै नमो नमः । वेदवेदान्त-वेदाङ्गविद्यास्थानेभ्य एव च ॥ १३ ॥

सरस्वति महाभागे विद्ये कमललोचने । विद्यारूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ॥ १४ ॥

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ १५ ॥

श्रीगङ्गास्तोत्रम् [42]

(श्री शङ्कराचार्य कृतम्)

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ॥ १ ॥

भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥ २ ॥

हरिपदपाद्यतरङ्गिणि गङ्गे हिमविधुमुक्ताधवलतरङ्गे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ॥ ३ ॥

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।

मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ॥ ४ ॥

पतितोद्धारिणि जाह्नवि गङ्गे खण्डितगिरिवरमण्डितभङ्गे ।
भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥ ५ ॥

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गङ्गे विमुखयुवतिकृततरलापाङ्गे ॥ ६ ॥

तव चेन्मातः स्रोतः स्नातः पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुङ्गे ॥ ७ ॥

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ॥ ८ ॥

रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे कुरु करुणामयि कातरवन्द्ये ।
तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।
अथवा श्वपचो मलिनो दीनस्तव न हि दूरे नृपतिकुलीनः ॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गङ्गास्तवमिममलं नित्यं पठति नरो यः स जयति सत्यम् ॥ १२ ॥

येषां हृदये गङ्गाभक्तिस्तेषां भवति सदा सुखमुक्तिः ।
मधुराकान्तापञ्झटिकाभिः परमानन्दकलित-ललिताभिः ॥ १३ ॥

गङ्गास्तोत्रमिदं भवसारं वाञ्छितफलदं विमलं सारम् ।
शङ्करसेवक शङ्कररचितं पठति सुखी स्तव इति च समाप्तम् ॥ १४ ॥

यमुनाष्टकम् [43]

(श्री शङ्कराचार्य कृतम्)

मुरारिकायकालिमाललामवारिधारिणी
तृणीकृतत्रिविष्टपा त्रिलोकशोकहारिणी ।
मनोऽनुकूलकूलकुञ्जपुञ्जधूतदुर्मदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ १ ॥

मलापहारिवारिपूरभूरिमण्डितामृता
भृशं प्रपातकप्रभञ्जनातिपण्डितानिशम् ।
सुनन्दनन्दनाङ्गसङ्गरागरञ्जिता हिता
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ २ ॥

लसत्तरङ्गसङ्गधूतभूतजातपातका
नवीनमाधुरीधुरीणभक्तजातचातका ।
तटान्तवासदासहंससंवृताह्नि कामदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ ३ ॥

विहाररासखेदभेदधीरतीरमारुता
गता गिरामगोचरे यदीयनीरचारुता ।

प्रवाहसाहचर्यपूतमेदिनीनदीनदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ ४ ॥

तरङ्गसङ्गसैकतान्तराञ्चिता सदाऽसिता
शरन्निशाकरांशुमञ्जुमञ्जरीसभाजिता ।
भवार्चनाप्रचारणाम्बुनाधुना विशारदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ ५ ॥

जलान्तकेलिकारिचारुराधिकाङ्गरागिणी
स्वभर्तुरन्यदुर्लभाङ्गताङ्गतांशभागिनी ।
स्वदत्तसुप्तसप्तसिन्धुभेदनातिकोविदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ ६ ॥

जलच्युताच्युताङ्गरागलम्पटालिशालिनी
विलोलराधिकाकचान्तचम्पकालिमालिनी ।
सदावगाहनावतीर्णभर्तृभृत्यनारदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ ७ ॥

सदैव नन्दनन्दकेलिशालिकुञ्जमञ्जुला
तटोत्थफुल्लमल्लिकाकदम्बरेणुसूज्ज्वला ।
जलावगाहिनां नृणां भवाब्धिसिन्धुपारदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥ ८ ॥

नर्मदाष्टकम् [44]

(श्री शङ्कराचार्य कृतम्)

सबिन्दुसिन्धुसुस्खलत्तरङ्गभृङ्गरञ्जितं
द्विषत्सु पापजातजातकारिवारिसंयुतम् ।
कृतान्तदूतकालभूतभीतिहारिवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ १ ॥

त्वदम्बुलीनदीनमीनदिव्यसम्प्रदायकं
कलौ मलौघभारहारि सर्वतीर्थनायकम् ।
सुमच्छकच्छनक्रचक्रवाकचक्रशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ २ ॥

महागभीरनीरपूरपातधूतभूतलं
नमत्समस्तपातकारि दारितापदाचलम् ।
जगल्लये महाभये मृकण्डुसूनुहर्म्यदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ३ ॥

गतं तदैव मे भयं त्वदम्बु वीक्षितं यदा
मृकण्डुसूनुशौनकासुरारिसेवितं सदा ।
पुनर्भवाब्धिजन्मसंभवाब्धिदुःखवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ४ ॥

अलक्ष्यलक्षकिन्नरामरासुरादिपूजितं

सुलक्ष्यनीरतीरधीरपक्षिलक्षकूजितम् ।
वसिष्ठशिष्टपिप्पलादिकर्दमादिशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ५ ॥

सनत्कुमारनाचिकेतकश्यपात्रिषट्पदै-
र्धृतं स्वकीयमानसेषु नारदादिषट्पदैः ।
रवीन्दुरन्तिदेवदेवराजकर्मशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ६ ॥

अलक्ष-लक्ष-लक्ष-पापलक्षसारसायुधं
ततस्तु जीवजन्तुतन्तुभुक्तिमुक्तिदायकम् ।
विरिञ्चिविष्णुशङ्करस्वकीयधामवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ७ ॥

अहो धृतं स्वनं श्रुतं महेशकेशजातटे
किरातसूतवाडवेषु पण्डिते शठे नटे ।
दुरन्तपापतापहारि सर्वजन्तुशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ८ ॥

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा
पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा ।
सुलभ्य देहदुर्लभं महेशधामगौरवं
पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥ ९ ॥

श्रीरामकृष्णस्तोत्रम् [45]

(स्वामी विवेकानन्दः)

ॐ ह्रीं ऋतं त्वमचलो गुणजिद् गुणेड्यः
नक्तन्दिवं सकरुणं तव पादपद्मम् ।
मोहङ्कषं बहुकृतं न भजे यतोऽहं
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥ १ ॥

भक्तिर्भगश्च भजनं भवभेदकारि
गच्छन्त्यलं सुविपुलं गमनाय तत्त्वम् ।
वक्त्रोद्धृतोऽपि हृदये न मे भाति किञ्चित् *
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥ २ ॥

तेजस्तरन्ति तरसा त्वयि तृप्ततृष्णाः
रागे कृते ऋतपथे त्वयि रामकृष्णे ।
मर्त्यामृतं तव पदं मरणोर्मिनाशं
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥ ३ ॥

कृत्यं करोति कलुषं कुहकान्तकारि
ष्णान्तं शिवं सुविमलं तव नाम नाथ ।
यस्मादहं त्वशरणो जगदेकगम्य
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥ ४ ॥

श्रीरामकृष्णप्रणामः

(स्वामी विवेकानन्दः)

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे ।
अवतारवरिष्ठाय रामकृष्णाय ते नमः ॥

(* वक्त्रोद्धृतं तु हृदि मे न च भाति किञ्चित्)

श्रीरामकृष्णध्यानस्तोत्रम् [46]

(स्वामी अभेदानन्दः)

हृदयकमलमध्ये राजितं निर्विकल्पं
सदसदखिलभेदातीतमेकस्वरूपम् ।
प्रकृतिविकृतिशून्यं नित्यमानन्दमूर्तिं
विमलपरमहंसं रामकृष्णं भजामः ॥ १ ॥
निरुपममतिसूक्ष्मं निष्प्रपञ्चं निरीहं
गगनसदृशमीशं सर्वभूताधिवासम् ।
त्रिगुणरहितसच्चिद्ब्रह्मरूपं वरेण्यं
विमलपरमहंसं रामकृष्णं भजामः ॥ २ ॥
वितरितुमवतीर्णं ज्ञानभक्तिप्रशान्तीः
प्रणयगलितचित्तं जीवदुःखासहिष्णुम् ।
धृतसहजसमाधिं चिन्मयं कोमलाङ्गं
विमलपरमहंसं रामकृष्णं भजामः ॥ ३ ॥

श्रीरामकृष्णप्रणाममन्त्रः [47]

(स्वामी शारदानन्दः)

सर्वधर्मस्थापकस्त्वं सर्वधर्मस्वरूपकः । आचार्याणां महाचार्यो रामकृष्णाय ते नमः ॥ यथाग्नेर्दाहिकाशक्ती रामकृष्णे स्थिता हि या । सर्वविद्यास्वरूपां तां शारदां प्रणमाम्यहम् ॥ परतत्त्वे सदा लीनो रामकृष्णसमाज्ञया । यो धर्मस्थापनरतो वीरेशं तं नमाम्यहम् ॥ कालिन्दी-फुल्ल-कमले माधवेन क्रीडारत । ब्रह्मानन्द नमस्तुभ्यं सद्गुरो लोकनायक ॥ योगानन्दः प्रेमानन्दश्चान्ये वै ये च पार्षदाः । रामकृष्णगतप्राणाः सर्वांस्तान् प्रणमाम्यहम् ॥

श्रीशारदादेवीध्यानस्तोत्रम् [48]

(स्वामी अभेदानन्दः)

ध्यायेच्चित्तसरोजस्थां सुखासीनां कृपामयीम् ।
प्रसन्नवदनां देवीं द्विभुजां स्थिरलोचनाम् ॥ १ ॥
आलुलायितकेशार्धवक्षःस्थलविमण्डिताम् ।
श्वेतवस्त्रावृतार्धाङ्गां हेमालङ्कारभूषिताम् ॥ २ ॥
स्वक्रोडन्यस्तहस्तां च ज्ञानभक्तिप्रदायिनीम् ।
शुभ्रां ज्योतिर्मयीं जीवपापसन्तापहारिणीम् ॥ ३ ॥
रामकृष्णगतप्राणां तन्नामश्रवणप्रियाम् ।
तद्भावरञ्जिताकारां जगन्मातृस्वरूपिणीम् ॥ ४ ॥
जानकीराधिकारूपधारिणीं सर्वमङ्गलाम् ।
चिन्मयीं वरदां नित्यां शारदां मोक्षदायिनीम् ॥ ५ ॥

यथाग्नेर्दाहिकाशक्ती रामकृष्णे स्थिता हि या ।
सर्वविद्यास्वरूपां तां शारदां प्रणमाम्यहम् ॥

श्रीशारदादेवीस्तोत्रम् [49]

(स्वामी अभेदानन्दः)

प्रकृतिं परमामभयां वरदां नररूपधरां जनतापहराम् ।
शरणागतसेवकतोषकरीं प्रणमामि परां जननीं जगताम् ॥ १ ॥
गुणहीनसुतानपराधयुतान् कृपयाद्य समुद्धर मोहगतान् ।

तरणीं भवसागरपारकरीं प्रणमामि परां जननीं जगताम् ॥ २ ॥
विषयं कुसुमं परिहृत्य सदा चरणाम्बुरुहामृतशान्तिसुधाम् ।
पिब भृङ्गमनो भवरोगहरां प्रणमामि परां जननीं जगताम् ॥ ३ ॥

कृपां कुरु महादेवि सुतेषु प्रणतेषु च ।
चरणाश्रयदानेन कृपामयि नमोऽस्तु ते ॥ ४ ॥
लज्जापटावृते नित्यं शारदे ज्ञानदायिके ।
पापेभ्यो नः सदा रक्ष कृपामयि नमोऽस्तु ते ॥ ५ ॥
रामकृष्णगतप्राणां तन्नामश्रवणप्रियाम् ।
तद्भावरञ्जिताकारां प्रणमामि मुहुर्मुहुः ॥ ६ ॥
पवित्रं चरितं यस्याः पवित्रं जीवनं तथा ।
पवित्रतास्वरूपिण्यै तस्यै कुर्मो नमो नमः ॥ ७ ॥

देवीं प्रसन्नां प्रणतार्तिहन्त्रीं योगीन्द्रपूज्यां युगधर्मपात्रीम् ।
तां शारदां भक्तिविज्ञानदात्रीं दयास्वरूपां प्रणमामि नित्यम् ॥ ८ ॥
स्नेहेन बध्नासि मनोऽस्मदीयं दोषानशेषान् सगुणी करोषि ।
अहेतुना नो दयसे सदोषान् स्वाङ्के गृहीत्वा यदिदं विचित्रम् ॥ ९ ॥
प्रसीद मातर्विनयेन याचे नित्यं भव स्नेहवती सुतेषु ।
प्रेमैकबिन्दुं चिरदग्धचित्ते विषिञ्च चित्तं कुरु नः सुशान्तम् ॥ १० ॥

जननीं शारदां देवीं रामकृष्णं जगद्गुरुम् ।
पादपद्मे तयोः श्रित्वा प्रणमामि मुहुर्मुहुः ॥ ११ ॥

श्रीविवेकानन्दध्यानम् [50]

विश्वाचार्यं जगद्वन्द्यं विवेकानन्दरूपिणम् ।
वीरेश्वरात्समुत्पन्नं सप्तर्षिमण्डलागतम् ॥
ज्ञानभक्तिप्रदातारं पद्माक्षगौरविग्रहम् ।
ध्यायेद्देवं ज्योतिःपुञ्जं लोककल्याणकारिणम् ॥
परतत्त्वे सदा लीनो रामकृष्णसमाज्ञया ।
यो धर्मस्थापनरतो वीरेशं तं नमाम्यहम् ॥

श्रीविवेकानन्दपञ्चकम् [51]

(स्वामी रामकृष्णानन्दः)

अनित्यदृश्येषु विविच्य नित्यं तस्मिन् समाधत्त इह स्म लीलया ।
विवेकवैराग्यविशुद्धचित्तं योऽसौ विवेकी तमहं नमामि ॥ १ ॥

विवेकजानन्दनिमग्नचित्तं विवेकदानैकविनोदशीलम् ।
विवेकभासा कमनीयकान्तिं विवेकिनं तं सततं नमामि ॥ २ ॥

ऋतं च विज्ञानमधिश्रयद्यन्निरन्तरं चादिमध्यान्तहीनम् ।
सुखं सुरूपं प्रकरोति यस्य आनन्दमूर्तिं तमहं नमामि ॥ ३ ॥

सूर्यो यथान्धं हि तमो निहन्ति विष्णुर्यथा दुष्टजनांश्छिनत्ति ।
तथैव यस्याखिलनेत्रलोभं रूपं त्रितापं विमुखीकरोति ॥ ४ ॥

तं देशिकेन्द्रं परमं पवित्रं विश्वस्य पालं मधुरं यतीन्द्रम् ।
हिताय नृणां नरमूर्तिमन्तं विवेक आनन्दमहं नमामि ॥ ५ ॥

नमः श्रीयतिराजाय विवेकानन्दसूरये ।
सच्चित्सुखस्वरूपाय स्वामिने तापहारिणे ॥ ६ ॥

॥ श्रीः ॥

॥ ॐ ह्रीं श्रीदुर्गायै देवतायै नमः ॥

॥ श्री दुर्गादेवीध्यानम् ॥ [52]

(दुर्गापूजा)

ॐ जटाजूटसमायुक्तामर्धेन्दुकृत-शेखराम् ।
लोचनत्रय-संयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत् पीनोन्नत-पयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥
मृणालायतसंस्पर्श-दशबाहु-समन्विताम् ।
त्रिशूलं दक्षिणे ध्येयं खड्गं चक्रं क्रमादधः ॥
तीक्ष्णबाणं तता शक्तिं दक्षिणेन विचिन्तयेत् ।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ॥
घण्टां वा परशुं वाऽपि वामतः सन्निवेशयेत् ।
अधस्तान्महिषं तद्वद्-विशिरस्कं प्रदर्शयेत् ॥
शिरच्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ।
हृदिशूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ॥
रक्तारक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम् ।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननाम् ॥
सपाशवाम हस्तेन-धृतकेशञ्च दुर्गया ।

वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ।
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ॥
(प्रसन्नवदनां देवीं सर्वकामफलप्रदाम् ।
शत्रुक्षयकरीं देवीं दैत्यदानवदर्पहाम् ॥)
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत् ।
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपाति चण्डिका ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेज्जगतां धात्रीं धर्मकामार्थ-मोक्षदाम् ॥

बृहन्नन्दिकेश्वर पुराणम्

॥ देवीप्रणामः ॥ [53]

ॐ सर्व-मङ्गल-माङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
सृष्टि-स्थिति-विनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥
शरणागत-दीनार्त-परित्राण-परायणे ।
सर्वस्यार्ति-हरे देवि नारायणि नमोऽस्तु ते ॥
जय नारायणि नमोऽस्तु ते ।
जय नारायणि नमोऽस्तु ते ।
जय नारायणि नमोऽस्तु ते ॥

देवीमाहात्म्यम्

॥ श्रीः ॥

॥ श्री दुर्गायै नमः ॥

॥ श्री दुर्गासहस्रनामस्तोत्रम् ॥ [54]

नारद उवाच –

कुमार गुणगम्भीर देवसेनापते प्रभो ।
सर्वाभीष्टप्रदं पुंसां सर्वपापप्रणाशनम् ॥ १ ॥
गुह्याद्गुह्यतरं स्तोत्रं भक्तिवर्धकमञ्जसा ।
मङ्गलं ग्रहपीडादिशान्तिदं वक्तुमर्हसि ॥ २ ॥

स्कन्द उवाच –

शृणु नारद देवर्षे लोकानुग्रहकाम्यया ।
यत्पृच्छसि परं पुण्यं तत्ते वक्ष्यामि कौतुकात् ॥ ३ ॥
माता मे लोकजननी हिमवन्नगसत्तमात् ।
मेनायां ब्रह्मवादिन्यां प्रादुर्भूता हरप्रिया ॥ ४ ॥
महता तपसाऽऽराध्य शङ्करं लोकशङ्करम् ।
स्वमेव वल्लभं भेजे कलेव हि कलानिधिम् ॥ ५ ॥
नगानामधिराजस्तु हिमवान् विरहातुरः ।
स्वसुतायाः परिक्षीणे वसिष्ठेन प्रबोधितः ॥ ६ ॥
त्रिलोकजननी सेयं प्रसन्ना त्वयि पुण्यतः ।
प्रादुर्भूता सुतात्वेन तद्वियोगं शुभं त्यज ॥ ७ ॥
बहुरूपा च दुर्गेयं बहुनाम्नी सनातनी ।
सनातनस्य जाया सा पुत्रीमोहं त्यजाधुना ॥ ८ ॥

इति प्रबोधितः शैलः तां तुष्टाव परां शिवाम् ।
तदा प्रसन्ना सा दुर्गा पितरं प्राह नन्दिनी ॥ ९ ॥
मत्प्रसादात्परं स्तोत्रं हृदये प्रतिभासताम् ।
तेन नाम्नां सहस्रेण पूजयन् काममाप्नुहि ॥ १० ॥
इत्युक्त्वान्तर्हितायां तु हृदये स्फुरितं तदा ।
नाम्नां सहस्रं दुर्गायाः पृच्छते मे यदुक्तवान् ॥ ११ ॥
मङ्गलानां मङ्गलं तद् दुर्गानाम सहस्रकम् ।
सर्वाभीष्टप्रदं पुंसां ब्रवीम्यखिलकामदम् ॥ १२ ॥
दुर्गादेवी समाख्याता हिमवानृषिरुच्यते ।
छन्दोनुष्टुप् जपो देव्याः प्रीतये क्रियते सदा ॥ १३ ॥

ऋषिच्छन्दांसि –

अस्य श्रीदुर्गास्तोत्रमहामन्त्रस्य । हिमवान् ऋषिः । अनुष्टुप् छन्दः । दुर्गाभगवती देवता । श्रीदुर्गाप्रसादसिद्ध्यर्थे जपे विनियोगः । श्रीभगवत्यै दुर्गायै नमः ।

❋ ❋ ❋

देवीध्यानम्

ॐ ह्रीं कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

श्री जयदुर्गायै नमः ।

❀ ❀ ❀

ॐ शिवाऽथोमा रमा शक्तिरनन्ता निष्कलाऽमला ।
शान्ता माहेश्वरी नित्या शाश्वता परमा क्षमा ॥ १ ॥
अचिन्त्या केवलानन्ता शिवात्मा परमात्मिका ।
अनादिरव्यया शुद्धा सर्वज्ञा सर्वगाऽचला ॥ २ ॥
एकानेकविभागस्था मायातीता सुनिर्मला ।
महामाहेश्वरी सत्या महादेवी निरञ्जना ॥ ३ ॥
काष्ठा सर्वान्तरस्थाऽपि चिच्छक्तिश्चात्रिलालिता ।
सर्वा सर्वात्मिका विश्वा ज्योतीरूपाऽक्षराऽमृता ॥ ४ ॥
शान्ता प्रतिष्ठा सर्वेशा निवृत्तिरमृतप्रदा ।
व्योममूर्तिर्व्योमसंस्था व्योमधाराऽच्युताऽतुला ॥ ५ ॥
अनादिनिधनाऽमोघा कारणात्मकलाकुला ।
ऋतुप्रथमजाऽनाभिरमृतात्मसमाश्रया ॥ ६ ॥
प्राणेश्वरप्रिया नम्या महामहिषघातिनी ।
प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्वरी ॥ ७ ॥
सर्वशक्तिकलाऽकामा महिषेष्टविनाशिनी ।
सर्वकार्यनियन्त्री च सर्वभूतेश्वरेश्वरी ॥ ८ ॥
अङ्गदादिधरा चैव तथा मुकुटधारिणी ।
सनातनी महानन्दाऽऽकाशयोनिस्तथोच्यते ॥ ९ ॥
चित्प्रकाशस्वरूपा च महायोगेश्वरेश्वरी ।
महामाया सदुष्पारा मूलप्रकृतिरीशिका ॥ १० ॥

संसारयोनिः सकला सर्वशक्तिसमुद्भवा ।
संसारपारा दुर्वारा दुर्निरीक्षा दुरासदा ॥ ११ ॥
प्राणशक्तिश्च सेव्या च योगिनी परमाकला ।
महाविभूतिर्दुर्दर्शा मूलप्रकृतिसम्भवा ॥ १२ ॥
अनाद्यनन्तविभवा परार्था पुरुषारणिः ।
सर्गस्थित्यन्तकृच्चैव सुदुर्वाच्या दुरत्यया ॥ १३ ॥
शब्दगम्या शब्दमाया शब्दाख्यानन्दविग्रहा ।
प्रधानपुरुषातीता प्रधानपुरुषात्मिका ॥ १४ ॥
पुराणी चिन्मया पुंसामिष्टदा पुष्टिरूपिणी ।
पूतान्तरस्था कूटस्था महापुरुषसंज्ञिता ॥ १५ ॥
जन्ममृत्युजरातीता सर्वशक्तिस्वरूपिणी ।
वाञ्छाप्रदाऽनवच्छिन्नप्रधानानुप्रवेशिनी ॥ १६ ॥
क्षेत्रज्ञाऽचिन्त्यशक्तिस्तु प्रोच्यतेऽव्यक्तलक्षणा ।
मलापवर्जिताऽऽनादिमाया त्रितयतत्त्विका ॥ १७ ॥
प्रीतिश्च प्रकृतिश्चैव गुहावासा तथोच्यते ।
महामाया नगोत्पन्ना तामसी च ध्रुवा तथा ॥ १८ ॥
व्यक्ताऽव्यक्तात्मिका कृष्णा रक्ता शुक्ला ह्यकारणा ।
प्रोच्यते कार्यजननी नित्यप्रसवधर्मिणी ॥ १९ ॥
सर्गप्रलयमुक्ता च सृष्टिस्थित्यन्तधर्मिणी ।
ब्रह्मगर्भा चतुर्विंशस्वरूपा पद्मवासिनी ॥ २० ॥

अच्युताह्लादिका विद्युद्ब्रह्मयोनिर्महालया ।
महालक्ष्मी समुद्भावभावितात्मामहेश्वरी ॥ २१ ॥
महाविमानमध्यस्था महानिद्रा सकौतुका ।
सर्वार्थधारिणी सूक्ष्मा ह्यविद्धा परमार्थदा ॥ २२ ॥
अनन्तरूपाऽनन्तार्था तथा पुरुषमोहिनी ।
अनेकानेकहस्ता च कालत्रयविवर्जिता ॥ २३ ॥
ब्रह्मजन्मा हरप्रीता मतिर्ब्रह्मशिवात्मिका ।
ब्रह्मेशविष्णुसम्पूज्या ब्रह्माख्या ब्रह्मसंज्ञिता ॥ २४ ॥
व्यक्ता प्रथमजा ब्राह्मी महारात्रीः प्रकीर्तिता ।
ज्ञानस्वरूपा वैराग्यरूपा ह्यैश्वर्यरूपिणी ॥ २५ ॥
धर्मात्मिका ब्रह्ममूर्तिः प्रतिश्रुतपुमर्थिका ।
अपांयोनिः स्वयम्भूता मानसी तत्त्वसम्भवा ॥ २६ ॥
ईश्वरस्य प्रिया प्रोक्ता शङ्कराधशरीरिणी ।
भवानी चैव रुद्राणी महालक्ष्मीस्तथाऽम्बिका ॥ २७ ॥
महेश्वरसमुत्पन्ना भुक्तिमुक्तिप्रदायिनी ।
सर्वेश्वरी सर्ववन्द्या नित्यमुक्ता सुमानसा ॥ २८ ॥
महेन्द्रोपेन्द्रनमिता शाङ्करीशानुवर्तिनी ।
ईश्वराधसिनगता माहेश्वरपतिव्रता ॥ २९ ॥
संसारशोषिणी चैव पार्वती हिमवत्सुता ।
परमानन्ददात्री च गुणाग्र्या योगदा तथा ॥ ३० ॥

ज्ञानमूर्तिश्च सावित्री लक्ष्मीः श्रीः कमला तथा ।
अनन्तगुणगम्भीरा ह्युरोनीलमणिप्रभा ॥ ३१ ॥
सरोजनिलया गङ्गा योगिध्येयाऽसुरार्दिनी ।
सरस्वती सर्वविद्या जगज्ज्येष्ठा सुमङ्गला ॥ ३२ ॥
वाग्देवी वरदा वर्या कीर्तिः सर्वार्थसाधिका ।
वागीश्वरी ब्रह्मविद्या महाविद्या सुशोभना ॥ ३३ ॥
ग्राह्यविद्या वेदविद्या धर्मविद्याऽऽत्मभाविता ।
स्वाहा विश्वम्भरा सिद्धिः साध्या मेधा धृतिः कृतिः ॥ ३४ ॥
सुनीतिः संकृतिश्चैव कीर्तिता नरवाहिनी ।
पूजाविभाविनी सौम्या भोग्यभाग् भोगदायिनी ॥ ३५ ॥
शोभावती शाङ्करी च लोला मालाविभूषिता ।
परमेष्ठिप्रिया चैव त्रिलोकीसुन्दरी माता ॥ ३६ ॥
नन्दा सन्ध्या कामधात्री महादेवी सुसात्त्विका ।
महामहिषदर्पघ्नी पद्ममालाऽघहारिणी ॥ ३७ ॥
विचित्रमुकुटा रामा कामदाता प्रकीर्तिता ।
पीताम्बरधरा दिव्यविभूषणविभूषिता ॥ ३८ ॥
दिव्याख्या सोमवदना जगत्संसृष्टिवर्जिता ।
निर्यन्त्रा यन्त्रवाहस्था नन्दिनी रुद्रकालिका ॥ ३९ ॥
आदित्यवर्णा कौमारी मयूरवरवाहिनी ।
पद्मासनगता गौरी महाकाली सुरार्चिता ॥ ४० ॥

अदितिर्निर्यता रौद्री पद्मगर्भा विवाहना ।
विरूपाक्षा केशिवाहा गुहापुरनिवासिनी ॥ ४१ ॥
महाफलाऽनवद्याङ्गी कामरूपा सरिद्वरा ।
भास्वद्रूपा मुक्तिदात्री प्रणतक्लेशभञ्जना ॥ ४२ ॥
कौशिकी गोमिनी रात्रिस्त्रिदशारिविनाशिनी ।
बहुरूपा सुरूपा च विरूपा रूपवर्जिता ॥ ४३ ॥
भक्तार्तिशमना भव्या भवभावविनाशिनी ।
सर्वज्ञानपरीताङ्गी सर्वासुरविमर्दिका ॥ ४४ ॥
पिकस्वनी सामगीता भवाङ्कनिलया प्रिया ।
दीक्षा विद्याधरी दीप्ता महेन्द्राहितपातिनी ॥ ४५ ॥
सर्वदेवमया दक्षा समुद्रान्तरवासिनी ।
अकलङ्का निराधारा नित्यसिद्धा निरामया ॥ ४६ ॥
कामधेनुबृहद्गर्भा धीमती मौननाशिनी ।
निःसङ्कल्पा निरातङ्का विनया विनयप्रदा ॥ ४७ ॥
ज्वालामाला सहस्राढ्या देवदेवी मनोमया ।
सुभगा सुविशुद्धा च वसुदेवसमुद्भवा ॥ ४८ ॥
महेन्द्रोपेन्द्रभगिनी भक्तिगम्या परावरा ।
ज्ञानज्ञेया परातीता वेदान्तविषया मतिः ॥ ४९ ॥
दक्षिणा दाहिका दह्या सर्वभूतहृदिस्थिता ।
योगमाया विभागज्ञा महामोहा गरीयसी ॥ ५० ॥

सन्ध्या सर्वसमुद्भूता ब्रह्मवृक्षाश्रियाऽदितिः ।
बीजाङ्कुरसमुद्भूता महाशक्तिर्महामतिः ॥ ५१ ॥
ख्यातिः प्रज्ञावती संज्ञा महाभोगीन्द्रशायिनी ।
हींकृतिः शङ्करी शान्तिर्गन्धर्वगणसेविता ॥ ५२ ॥
वैश्वानरी महाशूला देवसेना भवप्रिया ।
महारात्री परानन्दा शची दुःस्वप्ननाशिनी ॥ ५३ ॥
ईड्या जया जगद्धात्री दुर्विज्ञेया सुरूपिणी ।
गुहाम्बिका गणोत्पन्ना महापीठा मरुत्सुता ॥ ५४ ॥
हव्यवाहा भवानन्दा जगद्योनिः प्रकीर्तिता ।
जगन्माता जगन्मृत्युजरातीता च बुद्धिदा ॥ ५५ ॥
सिद्धिदात्री रत्नगर्भा रत्नगर्भाश्रया परा ।
दैत्यहन्त्री स्वेष्टदात्री मङ्गलैकसुविग्रहा ॥ ५६ ॥
पुरुषान्तर्गता चैव समाधिस्था तपस्विनी ।
दिविस्थिता त्रिणेत्रा च सर्वेन्द्रियमनोधृतिः ॥ ५७ ॥
सर्वभूतहृदिस्था च तथा संसारतारिणी ।
वेद्या ब्रह्मविवेद्या च महालीला प्रकीर्तिता ॥ ५८ ॥
ब्राह्मणिबृहती ब्राह्मी ब्रह्मभूताऽघहारिणी ।
हिरण्मयी महादात्री संसारपरिवर्तिका ॥ ५९ ॥
सुमालिनी सुरूपा च भास्विनी धारिणी तथा ।
उन्मूलिनी सर्वसभा सर्वप्रत्ययसाक्षिणी ॥ ६० ॥

सुसौम्या चन्द्रवदना ताण्डवासक्तमानसा ।
सत्त्वशुद्धिकरी शुद्धा मलत्रयविनाशिनी ॥ ६१ ॥
जगत्त्रयी जगन्मूर्तिस्त्रिमूर्तिरमृताश्रया ।
विमानस्था विशोका च शोकनाशिन्यनाहता ॥ ६२ ॥
हेमकुण्डलिनी काली पद्मवासा सनातनी ।
सदाकीर्तिः सर्वभूतशया देवी सतांप्रिया ॥ ६३ ॥
ब्रह्ममूर्तिकला चैव कृत्तिका कञ्जमालिनी ।
व्योमकेशा क्रियाशक्तिरिच्छाशक्तिः परागतिः ॥ ६४ ॥
क्षोभिका खण्डिकाभेद्या भेदाभेदविवर्जिता ।
अभिन्ना भिन्नसंस्थाना वशिनी वंशधारिणी ॥ ६५ ॥
गुह्यशक्तिर्गुह्यतत्त्वा सर्वदा सर्वतोमुखी ।
भगिनी च निराधारा निराहारा प्रकीर्तिता ॥ ६६ ॥
निरङ्कुशपदोद्भूता चक्रहस्ता विशोधिका ।
स्रग्विणी पद्मसम्भेदकारिणी परिकीर्तिता ॥ ६७ ॥
परावरविधानज्ञा महापुरुषपूर्वजा ।
परावरज्ञा विद्या च विद्युज्जिह्वा जिताश्रया ॥ ६८ ॥
विद्यामयी सहस्राक्षी सहस्रवदनात्मजा ।
सहस्ररश्मिःसत्त्वस्था महेश्वरपदाश्रया ॥ ६९ ॥
ज्वालिनी सन्मया व्याप्ता चिन्मया पद्मभेदिका ।
महाश्रया महामन्त्रा महादेवमनोरमा ॥ ७० ॥

व्योमलक्ष्मीः सिंहरथा चेकितानाऽमितप्रभा ।
विश्वेश्वरी भगवती सकला कालहारिणी ॥ ७१ ॥
सर्ववेद्या सर्वभद्रा गुह्या गूढा गुहारणी ।
प्रलया योगधात्री च गङ्गा विश्वेश्वरी तथा ॥ ७२ ॥
कामदा कनका कान्ता कञ्जगर्भप्रभा तथा ।
पुण्यदा कालकेशा च भोक्त्त्री पुष्करिणी तथा ॥ ७३ ॥
सुरेश्वरी भूतिदात्री भूतिभूषा प्रकीर्तिता ।
पञ्चब्रह्मसमुत्पन्ना परमार्थाऽर्थविग्रहा ॥ ७४ ॥
वर्णोदया भानुमूर्तिर्वाग्विज्ञेया मनोजवा ।
मनोहरा महोरस्का तामसी वेदरूपिणी ॥ ७५ ॥
वेदशक्तिर्वेदमाता वेदविद्याप्रकाशिनी ।
योगेश्वरेश्वरी माया महाशक्तिर्महामयी ॥ ७६ ॥
विश्वान्तःस्था वियन्मूर्तिर्भार्गवी सुरसुन्दरी ।
सुरभिर्नन्दिनी विद्या नन्दगोपतनूद्भवा ॥ ७७ ॥
भारती परमानन्दा परावरविभेदिका ।
सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी ॥ ७८ ॥
अनन्तानन्दविभवा हृल्लेखा कनकप्रभा ।
कूष्माण्डा धनरत्नाढ्या सुगन्धा गन्धदायिनी ॥ ७९ ॥
त्रिविक्रमपदोद्भूता चतुरास्या शिवोदया ।
सुदुर्लभा धनाध्यक्षा धन्या पिङ्गललोचना ॥ ८० ॥

शान्ता प्रभास्वरूपा च पङ्कजायतलोचना ।
इन्द्राक्षी हृदयान्तःस्था शिवा माता च सत्क्रिया ॥ ८१ ॥
गिरिजा च सुगूढा च नित्यपुष्टा निरन्तरा ।
दुर्गा कात्यायनी चण्डी चन्द्रिका कान्तविग्रहा ॥ ८२ ॥
हिरण्यवर्णा जगती जगद्यन्त्रप्रवर्तिका ।
मन्दराद्रिनिवासा च शारदा स्वर्णमालिनी ॥ ८३ ॥
रत्नमाला रत्नगर्भा व्युष्टिर्विश्वप्रमाथिनी ।
पद्मानन्दा पद्मनिभा नित्यपुष्टा कृतोद्भवा ॥ ८४ ॥
नारायणी दुष्टशिक्षा सूर्यमाता वृषप्रिया ।
महेन्द्रभगिनी सत्या सत्यभाषा सुकोमला ॥ ८५ ॥
वामा च पञ्चतपसां वरदात्री प्रकीर्तिता ।
वाच्यवर्णेश्वरी विद्या दुर्जया दुरतिक्रमा ॥ ८६ ॥
कालरात्रिर्महावेगा वीरभद्रप्रिया हिता ।
भद्रकाली जगन्माता भक्तानां भद्रदायिनी ॥ ८७ ॥
कराला पिङ्गलाकारा कामभेत्री महामनाः ।
यशस्विनी यशोदा च षडध्वपरिवर्तिका ॥ ८८ ॥
शङ्खिनी पद्मिनी संख्या सांख्ययोगप्रवर्तिका ।
चैत्रादिवत्सरारूढा जगत्सम्पूरणीन्द्रजा ॥ ८९ ॥
शुम्भघ्नी खेचराराध्या कम्बुग्रीवा बलीडिता ।
खगारूढा महैश्वर्या सुपद्मनिलया तथा ॥ ९० ॥

विरक्ता गरुडस्था च जगतीहृद्गुहाश्रया ।
शुम्भादिमथना भक्तहृद्गह्वरनिवासिनी ॥ ९१ ॥
जगत्त्रयारणी सिद्धसङ्कल्पा कामदा तथा ।
सर्वविज्ञानदात्री चानल्पकल्मषहारिणी ॥ ९२ ॥
सकलोपनिषद्गम्या दुष्टदुष्प्रेक्ष्यसत्तमा ।
सद्धृता लोकसंव्याप्ता तुष्टिः पुष्टिः क्रियावती ॥ ९३ ॥
विश्वामरेश्वरी चैव भुक्तिमुक्तिप्रदायिनी ।
शिवाधृता लोहिताक्षी सर्पमालाविभूषणा ॥ ९४ ॥
निरानन्दा त्रिशूलासिधनुर्बाणादिधारिणी ।
अशेषध्येयमूर्तिश्च देवतानां च देवता ॥ ९५ ॥
वराम्बिका गिरेः पुत्री निशुम्भविनिपातिनी ।
सुवर्णा स्वर्णलसिताऽनन्तवर्णा सदाधृता ॥ ९६ ॥
शाङ्करी शान्तहृदया अहोरात्रविधायिका ।
विश्वगोप्त्री गूढरूपा गुणपूर्णा च गार्ग्यजा ॥ ९७ ॥
गौरी शाकम्भरी सत्यसन्धा सन्ध्यात्रयीधृता ।
सर्वपापविनिर्मुक्ता सर्वबन्धविवर्जिता ॥ ९८ ॥
सांख्ययोगसमाख्याता अप्रमेया मुनीडिता ।
विशुद्धसुकुलोद्भूता बिन्दुनादसमादृता ॥ ९९ ॥
शम्भुवामाङ्गगा चैव शशितुल्यनिभानना ।
वनमालाविराजन्ती अनन्तशयनादृता ॥ १०० ॥

नरनारायणोद्भूता नारसिंही प्रकीर्तिता ।
दैत्यप्रमाथिनी शङ्खचक्रपद्मगदाधरा ॥ १०१ ॥
सङ्कर्षणसमुत्पन्ना अम्बिका सज्जनाश्रया ।
सुवृता सुन्दरी चैव धर्मकामार्थदायिनी ॥ १०२ ॥
मोक्षदा भक्तिनिलया पुराणपुरुषादृता ।
महाविभूतिदाऽऽराध्या सरोजनिलयाऽसमा ॥ १०३ ॥
अष्टादशभुजाऽनादिर्नीलोत्पलदलाक्षिणी ।
सर्वशक्तिसमारूढा धर्माधर्मविवर्जिता ॥ १०४ ॥
वैराग्यज्ञाननिरता निरालोका निरिन्द्रिया ।
विचित्रगहनाधारा शाश्वतस्थानवासिनी ॥ १०५ ॥
ज्ञानेश्वरी पीतचेला वेदवेदाङ्गपारगा ।
मनस्विनी मन्युमाता महामन्युसमुद्भवा ॥ १०६ ॥
अमन्युरमृतास्वादा पुरन्दरपरिष्टुता ।
अशोच्या भिन्नविषया हिरण्यरजतप्रिया ॥ १०७ ॥
हिरण्यजननी भीमा हेमाभरणभूषिता ।
विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा ॥ १०८ ॥
महानिद्रासमुत्पत्तिरनिद्रा सत्यदेवता ।
दीर्घा ककुद्मिनी पिङ्गजटाधारा मनोज्ञधीः ॥ १०९ ॥
महाश्रया रमोत्पन्ना तमःपारे प्रतिष्ठिता ।
त्रितत्त्वमाता त्रिविधा सुसूक्ष्मा पद्मसंश्रया ॥ ११० ॥

शान्त्यतीतकलाऽतीतविकारा श्वेतचेलिका ।
चित्रमाया शिवज्ञानस्वरूपा दैत्यमाथिनी ॥ १११ ॥
काश्यपी कालसर्पाभवेणिका शास्त्रयोनिका ।
त्रयीमूर्तिः क्रियामूर्तिश्चतुर्वर्गा च दर्शिनी ॥ ११२ ॥
नारायणी नरोत्पन्ना कौमुदी कान्तिधारिणी ।
कौशिकी ललिता लीला परावरविभाविनी ॥ ११३ ॥
वरेण्याऽद्भुतमाहात्म्या वडवा वामलोचना ।
सुभद्रा चेतनाराध्या शान्तिदा शान्तिवर्धिनी ॥ ११४ ॥
जयादिशक्तिजननी शक्तिचक्रप्रवर्तिका ।
त्रिशक्तिजननी जन्या षट्सूत्रपरिवर्णिता ॥ ११५ ॥
सुधौतकर्मणाऽऽराध्या युगान्तदहनात्मिका ।
सङ्कर्षिणी जगद्धात्री कामयोनिः किरीटिनी ॥ ११६ ॥
ऐन्द्री त्रैलोक्यनमिता वैष्णवी परमेश्वरी ।
प्रद्युम्नजननी बिम्बसमोष्ठी पद्मलोचना ॥ ११७ ॥
मदोत्कटा हंसगतिः प्रचण्डा चण्डविक्रमा ।
वृषाधीशा परात्मा च विन्ध्या पर्वतवासिनी ॥ ११८ ॥
हिमवन्मेरुनिलया कैलासपुरवासिनी ।
चाणूरहन्त्री नीतिज्ञा कामरूपा त्रयीतनुः ॥ ११९ ॥
व्रतस्नाता धर्मशीला सिंहासननिवासिनी ।
वीरभद्रादृता वीरा महाकालसमुद्भवा ॥ १२० ॥

विद्याधरार्चिता सिद्धसाध्याराधितपादुका ।
श्रद्धात्मिका पावनी च मोहिनी अचलात्मिका ॥ १२१ ॥
महाद्भुता वारिजाक्षी सिंहवाहनगामिनी ।
मनीषिणी सुधावाणी वीणावादनतत्परा ॥ १२२ ॥
श्वेतवाहनिषेव्या च लसन्मतिररुन्धती ।
हिरण्याक्षी तथा चैव महानन्दप्रदायिनी ॥ १२३ ॥
वसुप्रभा सुमाल्याप्तकन्धरा पङ्कजानना ।
परावरा वरारोहा सहस्रनयनार्चिता ॥ १२४ ॥
श्रीरूपा श्रीमती श्रेष्ठा शिवनाम्नी शिवप्रिया ।
श्रीप्रदा श्रितकल्याणा श्रीधरार्धशरीरिणी ॥ १२५ ॥
श्रीकलाऽनन्तदृष्टिश्च ह्यक्षुद्राऽऽरातिसूदनी ।
रक्तबीजनिहन्त्री च दैत्यसङ्घविमर्दिनी ॥ १२६ ॥
सिंहारूढा सिंहिकास्या दैत्यशोणितपायिनी ।
सुकीर्तिसहिताच्छिन्नसंशया रसवेदिनी ॥ १२७ ॥
गुणाभिरामा नागारिवाहना निर्जरार्चिता ।
नित्योदिता स्वयंज्योतिः स्वर्णकाया प्रकीर्तिता ॥ १२८ ॥
वज्रदण्डाङ्किता चैव तथाऽमृतसञ्जीविनी ।
वज्रच्छन्ना देवदेवी वरवज्रस्वविग्रहा ॥ १२९ ॥
माङ्गल्या मङ्गलात्मा च मालिनी माल्यधारिणी ।
गन्धर्वी तरुणी चान्द्री खड्गायुधधरा तथा ॥ १३० ॥

सौदामिनी प्रजानन्दा तथा प्रोक्ता भृगूद्भवा ।
एकानङ्गा च शास्त्रार्थकुशला धर्मचारिणी ॥ १३१ ॥
धर्मसर्वस्ववाहा च धर्माधर्मविनिश्चया ।
धर्मशक्तिर्धर्ममया धार्मिकानां शिवप्रदा ॥ १३२ ॥
विधर्मा विश्वधर्मज्ञा धर्मार्थान्तरविग्रहा ।
धर्मवर्ष्मा धर्मपूर्वा धर्मपारङ्गतान्तरा ॥ १३३ ॥
धर्मोपदेष्ट्री धर्मात्मा धर्मगम्या धराधरा ।
कपालिनी शाकलिनी कलाकलितविग्रहा ॥ १३४ ॥
सर्वशक्तिविमुक्ता च कर्णिकारधराऽक्षरा ।
कंसप्राणहरा चैव युगधर्मधरा तथा ॥ १३५ ॥
युगप्रवर्तिका प्रोक्ता त्रिसन्ध्या ध्येयविग्रहा ।
स्वर्गापवर्गदात्री च तथा प्रत्यक्षदेवता ॥ १३६ ॥
आदित्या दिव्यगन्धा च दिवाकरनिभप्रभा ।
पद्मासनगता प्रोक्ता खड्गबाणशरासना ॥ १३७ ॥
शिष्टा विशिष्टा शिष्टेष्टा शिष्टश्रेष्ठप्रपूजिता ।
शतरूपा शतावर्ता वितता रासमोदिनी ॥ १३८ ॥
सूर्येन्दुनेत्रा प्रद्युम्नजननी सुष्ठुमायिनी ।
सूर्यान्तरस्थिता चैव सत्प्रतिष्ठितविग्रहा ॥ १३९ ॥
निवृत्ता प्रोच्यते ज्ञानपारगा पर्वतात्मजा ।
कात्यायनी चण्डिका च चण्डी हैमवती तथा ॥ १४० ॥

दाक्षायणी सती चैव भवानी सर्वमङ्गला ।
धूम्रलोचनहन्त्री च चण्डमुण्डविनाशिनी ॥ १४१ ॥
योगनिद्रा योगभद्रा समुद्रतनया तथा ।
देवप्रियङ्करी शुद्धा भक्तभक्तिप्रवर्धिनी ॥ १४२ ॥
त्रिणेत्रा चन्द्रमुकुटा प्रमथार्चितपादुका ।
अर्जुनाभीष्टदात्री च पाण्डवप्रियकारिणी ॥ १४३ ॥
कुमारलालनासक्ता हरबाहूपधानिका ।
विघ्नेशजननी भक्तविघ्नस्तोमप्रहारिणी ॥ १४४ ॥
सुस्मितेन्दुमुखी नम्या जयाप्रियसखी तथा ।
अनादिनिधना प्रेष्ठा चित्रमाल्यानुलेपना ॥ १४५ ॥
कोटिचन्द्रप्रतीकाशा कूटजालप्रमाथिनी ।
कृत्याप्रहारिणी चैव मारणोच्चाटनी तथा ॥ १४६ ॥
सुरासुरप्रवन्द्याङ्घ्रिर्मोहघ्नी ज्ञानदायिनी ।
षड्वैरिनिग्रहकरी वैरिविद्राविणी तथा ॥ १४७ ॥
भूतसेव्या भूतदात्री भूतपीडाविमर्दिका ।
नारदस्तुतचारित्रा वरदेशा वरप्रदा ॥ १४८ ॥
वामदेवस्तुता चैव कामदा सोमशेखरा ।
दिक्पालसेविता भव्या भामिनी भावदायिनी ॥ १४९ ॥
स्त्रीसौभाग्यप्रदात्री च भोगदा रोगनाशिनी ।
व्योमगा भूमिगा चैव मुनिपूज्यपदाम्बुजा ।
वनदुर्गा च दुर्बोधा महादुर्गा प्रकीर्तिता ॥ १५० ॥

फलश्रुतिः

इतीदं कीर्तिदं भद्र दुर्गानामसहस्रकम् ।
त्रिसन्ध्यं यः पठेन्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥ १ ॥
ग्रहभूतपिशाचादिपीडा नश्यत्यसंशयम् ।
बालग्रहादिपीडायाः शान्तिर्भवति कीर्तनात् ॥ २ ॥
मारिकादिमहारोगे पठतां सौख्यदं नृणाम् ।
व्यवहारे च जयदं शत्रुबाधानिवारकम् ॥ ३ ॥
दम्पत्योः कलहे प्राप्ते मिथः प्रेमाभिवर्धकम् ।
आयुरारोग्यदं पुंसां सर्वसम्पत्प्रदायकम् ॥ ४ ॥
विद्याभिवर्धकं नित्यं पठतामर्थसाधकम् ।
शुभदं शुभकार्येषु पठतां शृणुतामपि ॥ ५ ॥
यः पूजयति दुर्गां तां दुर्गानामसहस्रकैः ।
पुष्पैः कुङ्कुमसम्मिश्रैः स तु यत्काङ्क्षते हृदि ॥ ६ ॥
तत्सर्वं समवाप्नोति नास्ति नास्त्यत्र संशयः ।
यन्मुखे ध्रियते नित्यं दुर्गानामसहस्रकम् ॥ ७ ॥
किं तस्येतरमन्त्रौघैः कार्यं धन्यतमस्य हि ।
दुर्गानामसहस्रस्य पुस्तकं यद्गृहे भवेत् ॥ ८ ॥
न तत्र ग्रहभूतादिबाधा स्यान्मङ्गलास्पदे ।
तद्गृहं पुण्यदं क्षेत्रं देवीसान्निध्यकारकम् ॥ ९ ॥

एतस्य स्तोत्रमुख्यस्य पाठकः श्रेष्ठमन्त्रवित् ।
देवतायाः प्रसादेन सर्वपूज्यः सुखी भवेत् ॥ १० ॥
इत्येतन्नगराजेन कीर्तितं मुनिसत्तम ।
गुह्याद्गुह्यतरं स्तोत्रं त्वयि स्नेहात् प्रकीर्तितम् ॥ ११ ॥
भक्ताय श्रद्धधानाय केवलं कीर्त्यतामिदम् ।
हृदि धारय नित्यं त्वं देव्यनुग्रहसाधकम् ॥ १२ ॥

इति श्रीस्कान्दपुराणे स्कन्दनारदसंवादे दुर्गासहस्रनामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीः ॥

श्री ललितासहस्रनामस्तोत्रप्रारम्भः [55]

॥ पूर्वभागः ॥

॥ श्री ललितामहात्रिपुरसुन्दर्यै नमः ॥

श्री विद्यां जगतां धात्रीं सर्गस्स्थि लयेश्वरीम् ।
नमामि ललितां नित्यां महात्रिपुरसुन्दरीम् ॥

अगस्त्य उवाच –

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥ १ ॥
पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम् ।
भण्डासुरवधश्चैव विस्तरेण त्वयोदितः ॥ २ ॥
वर्णितं श्रीपुरं चापि महाविभवविस्तरम् ।
श्रीमत्पञ्चदशाक्षर्याः महिमा वर्णितस्तथा ॥ ३ ॥

षोढान्यासादयो न्यासा न्यासखण्डे समीरिताः ।
अन्तर्यागक्रमश्चैव बहिर्यागक्रमस्तथा ॥ ४ ॥
महायागक्रमश्चैव पूजाखण्डे प्रकीर्तितः ।
पुरश्चरणखण्डे तु जपलक्षणमीरितम् ॥ ५ ॥
होमखण्डे त्वया प्रोक्तो होमद्रव्यविधिक्रमः ।
चक्रराजस्य विद्यायाः श्रीदेव्या देशिकात्मनोः ॥ ६ ॥
रहस्यखण्डे तादात्म्यं परस्परमुदीरितम् ।
स्तोत्रखण्डे बहुविधाः स्तुतयः परिकीर्तिताः ॥ ७ ॥
मन्त्रिणीदण्डिनीदेव्योः प्रोक्ते नामसहस्रके ।
न तु श्री ललितादेव्याः प्रोक्तं नामसहस्रकम् ॥ ८ ॥
तत्र मे संशयो जातो हयग्रीव दयानिधे ।
किं वा त्वया विस्मृतं तज्ज्ञात्त्वा वा समुपेक्षितम् ॥ ९ ॥
मम वा योग्यता नास्ति श्रोतुं नामसहस्रकम् ।
किमर्थं भवता नोक्तं तत्र मे कारणं वद ॥ १० ॥

सूत उवाच –

इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना ।
प्रहृष्टो वचनं प्राह तापसं कुम्भसंभवम् ॥ ११ ॥

श्री हयग्रीव उवाच –

लोपामुद्रापतेऽगस्त्य सावधानमनाः शृणु ।
नाम्नां सहस्रं यन्नोक्तं कारणं तद्वदामि ते ॥ १२ ॥

रहस्यमिति मत्वाऽहं नोक्तवांस्ते न चान्यथा ।
पुनश्च पृच्छते भक्त्या तस्मात्तत्ते वदाम्यहम् ॥ १३ ॥
ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः ।
भवता न प्रदेयं स्यादभक्ताय कदाचन ॥ १४ ॥
न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।
श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने ॥ १५ ॥
उपासकाय शुद्धाय देयं नामसहस्रकम् ।
यानि नामसहस्राणि सद्यः सिद्धिप्रदानि वै ॥ १६ ॥
तन्त्रेषु ललितादेव्यास्तेषु मुख्यमिदं मुने ।
श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा ॥ १७ ॥
पुराणां श्रीपुरमिव शक्तीनां ललिता यथा ।
श्रीविद्योपासकानां च यथा देवो परः शिवः ॥ १८ ॥
तथा नामसहस्रेषु वरमेतत् प्रकीर्तितम् ।
यथाऽस्य पठनाद्देवी प्रीयते ललिताम्बिका ॥ १९ ॥
अन्यनामसहस्रस्य पाठान्न प्रीयते तथा ।
श्रीमातुः प्रीतये तस्मादनिशं कीर्तयेदिदम् ॥ २० ॥
बिल्वपत्रैश्चक्रराजे योऽर्चयेल्ललिताम्बिकाम् ।
पद्मैर्वा तुलसीपुष्पैरेभिर्नामसहस्रकैः ॥ २१ ॥
सद्यः प्रसादं कुरुते तस्य सिंहासनेश्वरी ।
चक्राधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ॥ २२ ॥

जपान्ते कीर्तयेन्नित्यमिदं नामसहस्रकम् ।
जपपूजाद्यशक्तश्चेत् पठेन्नामसहस्रकम् ॥ २३ ॥
साङ्गार्चने साङ्गजपे यत्फलं तदवाप्नुयात् ।
उपासने स्तुतीरन्याः पठेदभ्युदयो हि सः ॥ २४ ॥
इदं नामसहस्रं तु कीर्तयेन्नित्यकर्मवत् ।
चक्रराजार्चनं देव्या जपो नाम्नां च कीर्तनम् ॥ २५ ॥
भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ।
भक्तस्यावश्यकमिदं नामसाहस्रकीर्तनम् ॥ २६ ॥
तत्र हेतुं प्रवक्ष्यामि शृणु त्वं कुम्भसम्भव ।
पुरा श्रीललितादेवी भक्तानां हितकाम्यया ॥ २७ ॥
वाग्देवीर्वशिनीमुख्याः समाहूयेदमब्रवीत् ।
वाग्देवता वशिन्याद्याः शृणुध्वं वचनं मम ॥ २८ ॥
भवत्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः ।
भद्भक्तानां वाग्विभूतिप्रदाने विनियोजिताः ॥ २९ ॥
मच्चक्रस्य रहस्यज्ञा मम नामपरायणाः ।
मम स्तोत्रविधानाय तस्मादाज्ञापयामि वः ॥ ३० ॥
कुरुध्वमङ्कितं स्तोत्रं मम नामसहस्रकैः ।
येन भक्तैः स्तुताया मे सद्यः प्रीतिः पराभवेत् ॥ ३१ ॥

हयग्रीव उवाच –

इत्याज्ञप्ता वचोदेव्यो देव्या श्रीललिताम्बया ।
रहस्यैर्नामभिर्दिव्यैश्चक्रुः स्तोत्रमनुत्तमम् ॥ ३२ ॥

रहस्यनामसाहस्रमिति तद्विश्रुतं परम् ।
ततः कदाचित् सदसि स्थित्वा सिंहासनेऽम्बिका ॥ ३३ ॥
स्वसेवावसरं प्रादात् सर्वेषां कुम्भसम्भव ।
सेवार्थमागतास्तत्र ब्रह्माणी ब्रह्मकोटयः ॥ ३४ ॥
लक्ष्मीनारायणानां च कोटयः समुपागताः ।
गौरीकोटिसमेतानां रुद्राणामपि कोटयः ॥ ३५ ॥
मन्त्रिणीदण्डिनीमुख्याः सेवार्थं याः समागताः ।
शक्तयो विविधाकारास्तासां संख्या न विद्यते ॥ ३६ ॥
दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः ।
तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ ॥ ३७ ॥
तेषु दृष्टोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम् ।
ततः श्रीललितादेवीकटाक्षाक्षेपचोदिताः ॥ ३८ ॥
उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा ।
अस्तुवन्नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम् ॥ ३९ ॥
श्रुत्वा स्तवं प्रसन्नाभूल्ललिता परमेश्वरी ।
ते सर्वे विस्मयं जग्मुर्ये तत्र सदसि स्थिताः ॥ ४० ॥
ततः प्रोवाच ललिता सदस्यान् देवतागणान् ।
ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रमनुत्तमम् ॥ ४१ ॥
अङ्कितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः ।
तत्पठध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये ॥ ४२ ॥

प्रवर्तयध्वं भक्तेषु मम नामसहस्रकम् ।

इदं नामसहस्रं मे यो भक्तः पठते सकृत् ॥ ४३ ॥

स मे प्रियतमो ज्ञेयस्तस्मै कामान् ददाम्यहम् ।

श्रीचक्रे मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ॥ ४४ ॥

पश्चान्नामसहस्रं मे कीर्तयेन्मम तुष्टये ।

मामर्चयतु वा मा वा विद्यां जपतु वा न वा ॥ ४५ ॥

कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा ।

मत्प्रीत्या सकलान् कामांल्लभते नात्र संशयः ॥ ४६ ॥

तस्मान्नामसहस्रं मे कीर्तयध्वं सदाऽऽदरात् ।

हयग्रीव उवाच –

इति श्रीललितेशानी शास्ति देवान् सहानुगान् ॥ ४७ ॥

तदाज्ञया तदारभ्य ब्रह्मविष्णुमहेश्वराः ।

शक्तयो मन्त्रिणीमुख्या इदं नामसहस्रकम् ॥ ४८ ॥

पठन्ति भक्त्या सततं ललितापरितुष्टये ।

तस्मादवश्यं भक्तेन कीर्तनीयमिदं मुने ॥ ४९ ॥

आवश्यकत्वे हेतुस्ते मया प्रोक्तो मुनीश्वर ।

इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शृणु ॥ ५० ॥

॥ न्यासः ॥

अस्य श्रीललितासहस्रनामस्तोत्रमाला मन्त्रस्य वशिन्यादि वाग्देवता ऋषयः । अनुष्टुप् छन्दः । श्रीललितापरमेश्वरी देवता ।

श्रीमद्वाग्भवकूटेति बीजम् । मध्यकूटेति शक्तिः । शक्तिकूटेति कीलकम् । श्रीललितामहात्रिपुरसुन्दरी-प्रसादसिद्धिद्वारा चिन्तित-फलावाप्त्यर्थे जपे विनियोगः । लमित्यादिपञ्चपूजां कुर्यात् ।

ध्यानम्

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकाम् ॥

॥ श्री ललिता-सहस्रनाम-स्तोत्रम् ॥

ॐ श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्नि-कुण्ड-सम्भूता देवकार्य-समुद्यता ॥ १ ॥
उद्यद्भानु-सहस्राभा चतुर्बाहु-समन्विता ।
रागस्वरूप-पाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥ २ ॥
मनोरूपेक्षु-कोदण्डा पञ्चतन्मात्र-सायका ।
निजारुण-प्रभापूर-मज्जद्ब्रह्माण्ड-मण्डला ॥ ३ ॥
चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्कचा ।
कुरुविन्दमणि-श्रेणी-कनत्कोटीर-मण्डिता ॥ ४ ॥
अष्टमीचन्द्र-विभ्राज-दलिकस्थल-शोभिता ।
मुखचन्द्र-कलङ्काभ-मृगनाभि-विशेषका ॥ ५ ॥

वदनस्मर-माङ्गल्य-गृहतोरण-चिल्लिका ।
वक्त्रलक्ष्मी-परीवाह-चलन्मीनाभ-लोचना ॥ ६ ॥

नवचम्पक-पुष्पाभ-नासादण्ड-विराजिता ।
ताराकान्ति-तिरस्कारि-नासाभरण-भासुरा ॥ ७ ॥

कदम्बमञ्जरी-क्लृप्त-कर्णपूर-मनोहरा ।
ताटङ्क-युगली-भूत-तपनोडुप-मण्डला ॥ ८ ॥

पद्मरागशिलादर्श-परिभावि-कपोलभूः ।
नवविद्रुम-बिम्बश्री-न्यक्कारि-रदनच्छदा ॥ ९ ॥

शुद्धविद्यांकुराकार-द्विजपंक्ति-द्वयोज्ज्वला ।
कर्पूरवीटिकामोद-समाकर्ष-द्दिगन्तरा ॥ १० ॥

निज-सल्लाप-माधुर्य-विनिर्भर्त्सित-कच्छपी ।
मन्दस्मित-प्रभापूर-मज्जत्कामेश-मानसा ॥ ११ ॥

अनाकलित-सादृश्य-चुबुकश्री-विराजिता ।
कामेश-बद्ध-माङ्गल्य-सूत्र-शोभित-कन्धरा ॥ १२ ॥

कनकाङ्गद-केयूर-कमनीय-भुजान्विता ।
रत्नग्रैवेय-चिन्ताक-लोल-मुक्ता-फलान्विता ॥ १३ ॥

कामेश्वर-प्रेमरत्न-मणि-प्रतिपण-स्तनी ।
नाभ्यालवाल-रोमालि-लता-फल-कुचद्वयी ॥ १४ ॥

लक्ष्यरोम-लताधारता-समुन्नेय-मध्यमा ।
स्तनभार-दलन्मध्य-पट्टबन्ध-वलित्रया ॥ १५ ॥

अरुणारुणकौसुम्भ-वस्त्र-भास्वत्-कटीतटी ।
रत्न-किङ्किणिका-रम्य-रशना-दाम-भूषिता ॥ १६ ॥
कामेश-ज्ञात-सौभाग्य-मार्दवोरु-द्वयान्विता ।
माणिक्य-मुकुटाकार-जानुद्वय-विराजिता ॥ १७ ॥
इन्द्रगोप-परिक्षिप्तस्मरतूणाभ-जंघिका ।
गूढगुल्फा कूर्मपृष्ठ-जयिष्णु-प्रपदान्विता ॥ १८ ॥
नख-दीधिति-संछन्न-नमज्जन-तमोगुणा ।
पदद्वय-प्रभाजाल-पराकृत-सरोरुहा ॥ १९ ॥
सिञ्जान-मणिमञ्जीर मण्डित-श्री-पदाम्बुजा ।
मराली-मन्दगमना महालावण्य-शेवधिः ॥ २० ॥
सर्वारुणाऽनवद्याङ्गी सर्वाभरण-भूषिता ।
शिव-कामेश्वराङ्कस्था शिवा स्वाधीन-वल्लभा ॥ २१ ॥
सुमेरु-मध्य-शृङ्गस्था श्रीमन्नगर-नायिका ।
चिन्तामणि गृहान्तस्था पञ्च-ब्रह्मासन-स्थिता ॥ २२ ॥
महापद्माटवी-संस्था कदम्बवन-वासिनी ।
सुधासागर-मध्यस्था कामाक्षी कामदायिनी ॥ २३ ॥
देवर्षि-गण-संघात-स्तूयमानात्म-वैभवा ।
भण्डासुर-वधोद्युक्त-शक्तिसेना-समन्विता ॥ २४ ॥
सम्पत्करी-समारूढ-सिन्धुर-व्रज-सेविता ।
अश्वारूढाधिष्ठिताश्व-कोटि-कोटिभि-रावृता ॥ २५ ॥

चक्रराज-रथारूढ-सर्वायुध-परिष्कृता ।
गेयचक्र-रथारूढ-मन्त्रिणी-परिसेविता ॥ २६ ॥
किरिचक्र-रथारूढ-दण्डनाथा-पुरस्कृता ।
ज्वालामालिनिकाक्षिप्त-वह्निप्राकार-मध्यगा ॥ २७ ॥
भण्डसैन्य-वधोद्युक्त-शक्ति-विक्रम-हर्षिता ।
नित्या-पराक्रमाटोप-निरीक्षण-समुत्सुका ॥ २८ ॥
भण्डपुत्र-वधोद्युक्त-बाला-विक्रम-नन्दिता ।
मन्त्रिण्यम्बा-विरचित-विषङ्ग-वध-तोषिता ॥ २९ ॥
विशुक्र-प्राणहरण-वाराही-वीर्य-नन्दिता ।
कामेश्वर-मुखालोक-कल्पित-श्रीगणेश्वरा ॥ ३० ॥
महागणेश-निर्भिन्न-विघ्नयन्त्र-प्रहर्षिता ।
भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्षिणी ॥ ३१ ॥
कराङ्गुलि-नखोत्पन्न-नारायण-दशाकृतिः ।
महा-पाशुपतास्त्राग्नि-निर्दग्धासुर-सैनिका ॥ ३२ ॥
कामेश्वरास्त्र-निर्दग्ध-सभण्डासुर-शून्यका ।
ब्रह्मोपेन्द्र-महेन्द्रादि-देव-संस्तुत-वैभवा ॥ ३३ ॥
हर-नेत्राग्नि-संदग्ध-काम-सञ्जीवनौषधिः ।
श्रीमद्वाग्भव-कूटैक-स्वरूप-मुख-पङ्कजा ॥ ३४ ॥
कण्ठाधः-कटि-पर्यन्त-मध्यकूट-स्वरूपिणी ।
शक्तिकूटैकतापन्न-कट्यधोभाग-धारिणी ॥ ३५ ॥

मूलमन्त्रात्मिका मूलकूटत्रय-कलेवरा ।
कुलामृतैक-रसिका-कुलसंकेत-पालिनी ॥ ३६ ॥
कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचार-तत्परा ॥ ३७ ॥
मूलाधारैक-निलया ब्रह्मग्रन्थि-विभेदिनी ।
मणिपूरान्तरुदिता विष्णुग्रन्थि-विभेदिनी ॥ ३८ ॥
आज्ञाचक्रान्तरालस्था रुद्रग्रन्थि-विभेदिनी ।
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥ ३९ ॥
तडिल्लता समरुचिः षट्चक्रोपरि-संस्थिता ।
महासक्तिः कुण्डलिनी बिसतन्तु-तनीयसी ॥ ४० ॥
भवानी भावनागम्या भवारण्य-कुठारिका ।
भद्रप्रिया भद्रमूर्ति-र्भक्त-सौभाग्यदायिनी ॥ ४१ ॥
भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ४२ ॥
शाङ्करी श्रीकरी साध्वी शरच्चन्द्र-निभानना ।
शातोदरी शान्तिमती निराधारा निरञ्जना ॥ ४३ ॥
निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥ ४४ ॥
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥ ४५ ॥

निष्कारणा निष्कलङ्का निरुपाधि-र्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥ ४६ ॥
निश्चिन्ता निरहङ्कारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥ ४७ ॥
निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
निःसंशया संशयघ्नी निर्भवा भवनाशिनी ॥ ४८ ॥
निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥ ४९ ॥
निस्तुला नीलचिकुरा निरपाया निरत्यया ।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥ ५० ॥
दुष्टदूरा दुराचारशमनी दोष-वर्जिता ।
सर्वज्ञा सान्द्रकरुणा समानाधिक-वर्जिता ॥ ५१ ॥
सर्वशक्तिमयी सर्वमङ्गला सद्गति-प्रदा ।
सर्वेश्वरी सर्वमयी सर्वमन्त्र-स्वरूपिणी ॥ ५२ ॥
सर्व-यन्त्रात्मिका सर्व-तन्त्ररूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मी-र्मृडप्रिया ॥ ५३ ॥
महारूपा महापूज्या महा-पातक-नाशिनी ।
महामाया महासत्त्वा महाशक्ति-र्महारतिः ॥ ५४ ॥
महाभोगा महैश्वर्या महावीर्या महाबला ।
महाबुद्धि-र्महासिद्धि-र्महायोगेश्वरेश्वरी ॥ ५५ ॥

महातन्त्रा महामन्त्रा महायन्त्रा महासना ।
महायाग-क्रमाराध्या महाभैरव-पूजिता ॥ ५६ ॥
महेश्वर-महाकल्प-महाताण्डव-साक्षिणी ।
महाकामेश-महिषी महात्रिपुरसुन्दरी ॥ ५७ ॥
चतुष्षष्ट्युपचाराढ्या चतुष्षष्टिकलामयी ।
महाचतुः-षष्टिकोटि-योगिनी-गणसेविता ॥ ५८ ॥
मनुविद्या चन्द्रविद्या चन्द्रमण्डल-मध्यगा ।
चारुरूपा चारुहासा चारुचन्द्र-कलाधरा ॥ ५९ ॥
चराचर-जगन्नाथा चक्रराज-निकेतना ।
पार्वती पद्मनयना पद्मराग-समप्रभा ॥ ६० ॥
पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञानघनरूपिणी ॥ ६१ ॥
ध्यान-ध्यातृ-ध्येयरूपा धर्माधर्म-विवर्जिता ।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥ ६२ ॥
सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्था-विवर्जिता ।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥ ६३ ॥
संहारिणी रुद्ररूपा तिरोधानकरीश्वरी ।
सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा ॥ ६४ ॥
भानुमण्डल-मध्यस्था भैरवी भगमालिनी ।
पद्मासना भगवती पद्मनाभ-सहोदरी ॥ ६५ ॥

उन्मेष-निमिषोत्पन्न-विपन्न-भुवनावलिः ।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥ ६६ ॥
आब्रह्म-कीट-जननी वर्णाश्रम-विधायिनी ।
निजाज्ञारूप-निगमा पुण्यापुण्य-फलप्रदा ॥ ६७ ॥
श्रुति-सीमन्त-सिन्दूरी-कृत-पादाब्जधूलिका ।
सकलागम-सन्दोह-शुक्ति-सम्पुट-मौक्तिका ॥ ६८ ॥
पुरुषार्थ-प्रदा पूर्णा भोगिनी भुवनेश्वरी ।
अम्बिकाऽनादि-निधना हरिब्रह्मेन्द्र-सेविता ॥ ६९ ॥
नारायणी नादरूपा नामरूप-विवर्जिता ।
ह्रीं कारी ह्रीमती हृद्या हेयोपादेय-वर्जिता ॥ ७० ॥
राजराजार्चिता राज्ञी रम्या राजीव-लोचना ।
रञ्जनी रमणी रस्या रणत्किङ्किणि-मेखला ॥ ७१ ॥
रमा राकेन्दु-वदना रतिरूपा रतिप्रिया ।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ॥ ७२ ॥
काम्या कामकलारूपा कदम्ब-कुसुम-प्रिया ।
कल्याणी जगती-कन्दा करुणा-रस-सागरा ॥ ७३ ॥
कलावती कलालापा कान्ता कादम्बरी-प्रिया ।
वरदा वामनयना वारुणी-मद-विह्वला ॥ ७४ ॥
विश्वाधिका वेदवेद्या विन्ध्याचल-निवासिनी ।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥ ७५ ॥

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्र-क्षेत्रज्ञ-पालिनी ।
क्षयवृद्धि-विनिर्मुक्ता क्षेत्रपाल-समर्चिता ॥ ७६ ॥
विजया विमला वन्द्या वन्दारु-जन-वत्सला ।
वाग्वादिनी वामकेशी वह्निमण्डल-वासिनी ॥ ७७ ॥
भक्तिमत्-कल्पलतिका पशुपाश-विमोचिनी ।
संहृताशेष-पाषण्डा सदाचार-प्रवर्तिका ॥ ७८ ॥
तापत्रयाग्नि-सन्तप्त-समाह्लादन-चन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा ॥ ७९ ॥
चिति-स्तत्पद-लक्ष्यार्था चिदेकरस-रूपिणी ।
स्वात्मानन्द-लवीभूत-ब्रह्माद्यानन्द-सन्ततिः ॥ ८० ॥
परा प्रत्यक्-चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरी-रूपा भक्त-मानस-हंसिका ॥ ८१ ॥
कामेश्वर-प्राणनाडी कृतज्ञा कामपूजिता ।
शृङ्गार-रस-सम्पूर्णा जया जालन्धर-स्थिता ॥ ८२ ॥
ओड्याण-पीठ-निलया बिन्दु-मण्डलवासिनी ।
रहोयाग-क्रमाराध्या रहस्तर्पण-तर्पिता ॥ ८३ ॥
सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।
षडङ्गदेवता-युक्ता षाड्गुण्य-परिपूरिता ॥ ८४ ॥
नित्य-क्लिन्ना निरुपमा निर्वाण-सुख-दायिनी ।
नित्याषोडशिका-रूपा श्रीकण्ठार्ध-शरीरिणी ॥ ८५ ॥

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृति-रव्यक्ता व्यक्ताव्यक्त-स्वरूपिणी ॥ ८६ ॥
व्यापिनी विविधाकारा विद्याऽविद्या-स्वरूपिणी ।
महाकामेश-नयन-कुमुदाह्लाद-कौमुदी ॥ ८७ ॥
भक्त-हार्द-तमो-भेद-भानुमद्भानु-सन्ततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवङ्करी ॥ ८८ ॥
शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशा मनो-वाचामगोचरा ॥ ८९ ॥
चिच्छक्ति-श्चेतना-रूपा जडशक्ति-र्जडात्मिका ।
गायत्री व्याहृतिः सन्ध्या द्विजबृन्द-निषेविता ॥ ९० ॥
तत्त्वासना तत्त्वमयी पञ्चकोशान्तर-स्थिता ।
निःसीम-महिमा नित्य-यौवना मदशालिनी ॥ ९१ ॥
मदघूर्णित-रक्ताक्षी मदपाटल-गण्डभूः ।
चन्दन-द्रव-दिग्धाङ्गी चाम्पेय-कुसुम-प्रिया ॥ ९२ ॥
कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौलमार्ग-तत्पर-सेविता ॥ ९३ ॥
कुमार-गणनाथाम्बा तुष्टिः पुष्टि-र्मति-र्धृतिः ।
शान्तिः स्वस्तिमती कान्ति-र्नन्दिनी विघ्ननाशिनी ॥ ९४ ॥
तेजोवती त्रिनयना लोलाक्षी-कामरूपिणी ।
मालिनी हंसिनी माता मलयाचल-वासिनी ॥ ९५ ॥

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥ ९६ ॥
वज्रेश्वरी वामदेवी वयोऽवस्थाविवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥ ९७ ॥
विशुद्धिचक्र-निलया-ऽऽरक्तवर्णा त्रिलोचना ।
खट्वाङ्गादि-प्रहरणा वदनैक-समन्विता ॥ ९८ ॥
पायसान्न-प्रिया त्वक्स्था पशुलोक-भयङ्करी ।
अमृतादि-महाशक्ति-संवृता डाकिनीश्वरी ॥ ९९ ॥
अनाहताब्ज-निलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्ज्वलाऽक्षमालादिधरा रुधिरसंस्थिता ॥ १०० ॥
कालरात्र्यादि-शक्त्यौघ-वृता स्निग्धौदन-प्रिया ।
महावीरेन्द्र-वरदा राकिण्यम्बा-स्वरूपिणी ॥ १०१ ॥
मणिपूराब्ज-निलया वदनत्रय-संयुता ।
वज्रादिकायुधोपेता डामर्यादिभि-रावृता ॥ १०२ ॥
रक्तवर्णा मांसनिष्ठा गुडान्न-प्रीत-मानसा ।
समस्तभक्त-सुखदा लाकिन्यम्बा-स्वरूपिणी ॥ १०३ ॥
स्वाधिष्ठानाम्बुजगता चतुर्वक्त्र-मनोहरा ।
शूलाद्यायुध-सम्पन्ना पीतवर्णाऽतिगर्विता ॥ १०४ ॥
मेदो-निष्ठा मधुप्रीता बन्धिन्यादि-समन्विता ।
दध्यन्नासक्त-हृदया काकिनी-रूप-धारिणी ॥ १०५ ॥

मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता ।
अङ्कुशादि-प्रहरणा वरदादि-निषेविता ॥ १०६ ॥
मुद्गौदनासक्त-चित्ता साकिन्यम्बा-स्वरूपिणी ।
आज्ञा-चक्राब्ज-निलया शुक्लवर्णा षडानना ॥ १०७ ॥
मज्जा-संस्था हंसवती-मुख्य-शक्ति-समन्विता ।
हरिद्रान्नैक-रसिका हाकिनी-रूप-धारिणी ॥ १०८ ॥
सहस्रदल-पद्मस्था सर्व-वर्णोप-शोभिता ।
सर्वायुध-धरा शुक्ल-संस्थिता सर्वतोमुखी ॥ १०९ ॥
सर्वौदन-प्रीतचित्ता याकिन्यम्बा-स्वरूपिणी ।
स्वाहा स्वधामतिर्मेधा श्रुति-स्मृति-रनुत्तमा ॥ ११० ॥
पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवण-कीर्तना ।
पुलोमजार्चिता बन्धमोचनी बन्धुरालका ॥ १११ ॥
विमर्शरूपिणी विद्या वियदादि-जगत्प्रसूः ।
सर्वव्याधि-प्रशमनी सर्वमृत्यु-निवारिणी ॥ ११२ ॥
अग्रगण्या-ऽचिन्त्यरूपा कलिकल्मष-नाशिनी ।
कात्यायनी कालहन्त्री कमलाक्ष-निषेविता ॥ ११३ ॥
ताम्बूल-पूरित-मुखी दाडिमी-कुसुम-प्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥ ११४ ॥
नित्य-तृप्ता भक्तिनिधि-र्नियन्त्री निखिलेश्वरी ।
मैत्र्यादि-वासनालभ्या महा-प्रलय-साक्षिणी ॥ ११५ ॥

पराशक्तिः परानिष्ठा प्रज्ञानघन-रूपिणी ।
माध्वीपानालसा मत्ता मातृका-वर्ण-रूपिणी ॥ ११६ ॥
महाकैलास-निलया मृणाल-मृदु-दोर्लता ।
महनीया दयामूर्ति-र्महासाम्राज्य-शालिनी ॥ ११७ ॥
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥ ११८ ॥
कटाक्ष-किङ्करी-भूत-कमला-कोटि-सेविता ।
शिरःस्थिता चन्द्रनिभा भालस्थेन्द्र-धनुः-प्रभा ॥ ११९ ॥
हृदयस्था रविप्रख्या त्रिकोणान्तर-दीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी ॥ १२० ॥
दरान्दोलित-दीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरु-मूर्ति-र्गुणनिधि-र्गोमाता गुहजन्म-भूः ॥ १२१ ॥
देवेशी दण्डनीतिस्था दहराकाश-रूपिणी ।
प्रतिपन्मुख्य-राकान्त-तिथि-मण्डल-पूजिता ॥ १२२ ॥
कलात्मिका कलानाथा काव्यालाप-विनोदिनी ।
सचामर-रमा-वाणी-सव्य-दक्षिण-सेविता ॥ १२३ ॥
आदिशक्ति-रमेयाऽऽत्मा परमा पावनाकृतिः ।
अनेक-कोटि-ब्रह्माण्ड-जननी दिव्य-विग्रहा ॥ १२४ ॥
क्लीं कारी केवला गुह्या कैवल्य-पद-दायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्ति-स्त्रिदशेश्वरी ॥ १२५ ॥

त्र्यक्षरी दिव्य-गन्धाढ्या सिन्दूर-तिलकाञ्चिता ।
उमा शैलेन्द्रतनया गौरी गन्धर्व-सेविता ॥ १२६ ॥
विश्वगर्भा स्वर्णगर्भा-ऽवरदा वागधीश्वरी ।
ध्यानगम्या-ऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥ १२७ ॥
सर्व-वेदान्त-सम्वेद्या सत्यानन्द-स्वरूपिणी ।
लोपामुद्रार्चिता लीलाक्लृप्त-ब्रह्माण्ड-मण्डला ॥ १२८ ॥
अदृश्या दृश्यरहिता विज्ञात्री वेद्य-वर्जिता ।
योगिनी योगदा योग्या योगानन्दा युगन्धरा ॥ १२९ ॥
इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूप-धारिणी ॥ १३० ॥
अष्टमूर्ति-रजाजैत्री लोकयात्रा-विधायिनी ।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥ १३१ ॥
अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्य-स्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥ १३२ ॥
भाषारूपा बृहत्सेना भावाभाव-विवर्जिता ।
सुखाराध्या शुभकरी शोभनासुलभागतिः ॥ १३३ ॥
राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।
राजत्कृपा राजपीठ-निवेशित-निजाश्रिता ॥ १३४ ॥
राज्यलक्ष्मीः कोशनाथा चतुरङ्ग-बलेश्वरी ।
साम्राज्य-दायिनी सत्यसन्धा सागरमेखला ॥ १३५ ॥

दीक्षिता दैत्यशमनी सर्वलोकवशङ्करी ।
सर्वार्थदात्री सावित्री सच्चिदानन्द-रूपिणी ॥ १३६ ॥
देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ॥ १३७ ॥
सर्वोपाधि-विनिर्मुक्ता सदाशिव-पतिव्रता ।
सम्प्रदायेश्वरी साध्वी गुरुमण्डल-रूपिणी ॥ १३८ ॥
कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥ १३९ ॥
स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्ति-रूपिणी ।
सनकादि-समाराध्या शिवज्ञान-प्रदायिनी ॥ १४० ॥
चित्कलाऽऽनन्द-कलिका प्रेमरूपा प्रियङ्करी ।
नामपारायण-प्रीता नन्दिविद्या नटेश्वरी ॥ १४१ ॥
मिथ्या-जगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ॥ १४२ ॥
भवदाव-सुधावृष्टिः पापारण्य-दवानला ।
दौर्भाग्य-तूलवातूला जराध्वान्तरविप्रभा ॥ १४३ ॥
भाग्याब्धि-चन्द्रिका भक्त-चित्त-केकि-घनाघना ।
रोगपर्वत-दम्भोलि-मृत्युदारु-कुठारिका ॥ १४४ ॥
महेश्वरी महाकाली महाग्रासा महाशना ।
अपर्णा चण्डिका चण्डमुण्डासुर-निषूदिनी ॥ १४५ ॥

क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥ १४६ ॥
स्वर्गापवर्गदा शुद्धा जपापुष्प-निभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥ १४७ ॥
दुराराध्या दुराधर्षा पाटली-कुसुम-प्रिया ।
महती मेरुनिलया मन्दार-कुसुम-प्रिया ॥ १४८ ॥
वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
प्रत्यग्-रूपा पराकाशा प्राणदा प्राणरूपिणी ॥ १४९ ॥
मार्ताण्ड-भैरवाराध्या मन्त्रिणी-न्यस्त-राज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥ १५० ॥
सत्यज्ञानानन्द-रूपा सामरस्य-परायणा ।
कपर्दिनी कलामाला कामधु-क्काम-रूपिणी ॥ १५१ ॥
कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥ १५२ ॥
परञ्ज्योतिः परन्धाम परमाणुः परात्परा ।
पाशहस्ता पाशहन्त्री परमन्त्र-विभेदिनी ॥ १५३ ॥
मूर्ताऽमूर्ताऽनित्यतृप्ता मुनिमानस-हंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ॥ १५४ ॥
ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ १५५ ॥

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठ-रूपिणी ।
विशृंखला विविक्तस्था वीरमाता वियत्प्रसूः ॥ १५६ ॥
मुकुन्दा मुक्तिनिलया मूलविग्रह-रूपिणी ।
भावज्ञा भवरोगघ्नी भवचक्र-प्रवर्तिनी ॥ १५७ ॥
छन्दः सारा शास्त्रसारा मन्त्रसारा तलोदरी ।
उदारकीर्ति-रुद्दामवैभवा वर्णरूपिणी ॥ १५८ ॥
जन्ममृत्यु-जरातप्त-जन-विश्रान्ति-दायिनी ।
सर्वोपनिष-दुद्घुष्टा शान्त्यतीत-कलात्मिका ॥ १५९ ॥
गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
कल्पना-रहिता काष्ठाऽकान्ता कान्तार्ध-विग्रहा ॥ १६० ॥
कार्यकारण-निर्मुक्ता कामकेलि-तरङ्गिता ।
कनत्कनक-ताटङ्का लीला-विग्रह-धारिणी ॥ १६१ ॥
अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्र-प्रसादिनी ।
अन्तर्मुख-समाराध्या बहिर्मुख-सुदुर्लभा ॥ १६२ ॥
त्रयी त्रिवर्ग-निलया त्रिस्था त्रिपुर-मालिनी ।
निरामया निरालम्बा स्वात्मारामा सुधासृतिः ॥ १६३ ॥
संसारपङ्क-निर्मग्न-समुद्धरण-पण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमान-स्वरूपिणी ॥ १६४ ॥
धर्माधारा धनाध्यक्षा धनधान्य-विवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमण-कारिणी ॥ १६५ ॥

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनि-र्योनि-निलया कूटस्था कुलरूपिणी ॥ १६६ ॥
वीरगोष्ठी-प्रिया वीरा नैष्कर्म्या नादरूपिणी ।
विज्ञानकलना कल्या विदग्धा बैन्दवासना ॥ १६७ ॥
तत्त्वाधिका तत्त्वमयी तत्त्वमर्थ-स्वरूपिणी ।
सामगान-प्रिया सोम्या सदाशिव-कुटुम्बिनी ॥ १६८ ॥
सव्यापसव्य-मार्गस्था सर्वापद्विनिवारिणी ।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥ १६९ ॥
चैतन्यार्घ्य-समाराध्या चैतन्य-कुसुम-प्रिया ।
सदोदिता सदातुष्टा तरुणादित्य-पाटला ॥ १७० ॥
दक्षिणा-दक्षिणाराध्या दरस्मेर-मुखाम्बुजा ।
कौलिनी-केवलाऽनर्घ्य-कैवल्य-पद-दायिनी ॥ १७१ ॥
स्तोत्र-प्रिया स्तुतिमती श्रुति-संस्तुत-वैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥ १७२ ॥
विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परामोदा मनोमयी ॥ १७३ ॥
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पञ्चयज्ञ-प्रिया पञ्चप्रेत-मञ्चाधिशायिनी ॥ १७४ ॥
पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी ॥ १७५ ॥

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥ १७६ ॥
बन्धूक-कुसुम-प्रख्या बाला लीला-विनोदिनी ।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥ १७७ ॥
सुवासिन्यर्चन-प्रीताऽऽशोभना शुद्ध-मानसा ।
बिन्दु-तर्पण-सन्तुष्टा पूर्वजा त्रिपुराम्बिका ॥ १७८ ॥
दशमुद्रा-समाराध्या त्रिपुराश्रीवशङ्करी
ज्ञानमुद्रा ज्ञानगम्या ज्ञान-ज्ञेय-स्वरूपिणी ॥ १७९ ॥
योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।
अनघाऽद्भुत-चारित्रा वाञ्छितार्थ-प्रदायिनी ॥ १८० ॥
अभ्यासातिशय-ज्ञाता षडध्वातीत-रूपिणी ।
अव्याज-करुणा-मूर्ति-रज्ञान-ध्वान्त-दीपिका ॥ १८१ ॥
आबाल-गोप-विदिता सर्वानुल्लंघ्य-शासना ।
श्रीचक्रराज-निलया श्रीमत्-त्रिपुरसुन्दरी ॥ १८२ ॥

श्रीशिवा शिव-शक्त्यैक्य-रूपिणी ललिताम्बिका ।
एवं श्रीललितादेव्या नाम्नां साहस्रकं जगुः ॥

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्य-संवादे
श्रीललितासहस्रनाम-स्तोत्रं सम्पूर्णम् ॥

॥ उत्तरभागः ॥

फलश्रुतिः

इत्येतन्नामसाहस्रं कथितं ते घटोद्भव ।
रहस्यानां रहस्यं च ललिताप्रीतिदायकम् ॥ १ ॥
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ।
सर्वरोगप्रशमनं सर्वसम्पत्प्रवर्धनम् ॥ २ ॥
सर्वापमृत्युशमनं कालमृत्युनिवारणम् ।
सर्वज्वरार्तिशमनं दीर्घायुष्यप्रदायकम् ॥ ३ ॥
पुत्रप्रदमपुत्राणां पुरुषार्थप्रदायकम् ।
इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीतिविधायकम् ॥ ४ ॥
जपेन्नित्यं प्रयत्नेन ललितोपास्ति तत्परः ।
प्रातः स्नात्वा विधानेन सन्ध्याकर्म समाप्य च ॥ ५ ॥
पूजागृहं ततो गत्वा चक्रराजं समर्चयेत् ।
विद्यां जपेत्सहस्रं वा त्रिशतं शतमेव वा ॥ ६ ॥
रहस्यनामसाहस्रमिदं पश्चात्पठेन्नरः ।
जन्ममध्ये सकृच्चापि य एतत्पठते सुधीः ॥ ७ ॥
तस्य पुण्यफलं वक्ष्ये शृणु त्वं कुम्भसम्भव ।
गङ्गादिसर्वतीर्थेषु यः स्नायात् कोटिजन्मसु ॥ ८ ॥
कोटिलिङ्गप्रतिष्ठां च यः कुर्यादविमुक्तके ।
कुरुक्षेत्रे तु यो दद्यात् कोटिवारं रविग्रहे ॥ ९ ॥
कोटिं सुवर्णभाराणां श्रोत्रियेषु द्विजन्मसु ।
यः कोटिं हयमेधानामाहरेद्राङ्गरोधसि ॥ १० ॥

आचरेत् कूपकोटीर्यो निर्जले मरुभूतले ।
दुर्भिक्षे यः प्रतिदिनं कोटिब्राह्मणभोजनम् ॥ ११ ॥
श्रद्धया परया कुर्यात् सहस्रपरिवत्सरान् ।
तत्पुण्यकोटिगुणितं भवेत् पुण्यमनुत्तमम् ॥ १२ ॥
रहस्यनामसाहस्रे नाम्नोऽप्येकस्य कीर्तनात् ।
रहस्यनामसाहस्रे नामैकमपि यः पठेत् ॥ १३ ॥
तस्य पापानि नश्यन्ति महान्त्यपि न संशयः ।
नित्यकर्माननुष्ठानान्निषिद्धकरणादपि ॥ १४ ॥
यत्पापं जायते पुंसां तत्सर्वं नश्यति ध्रुवम् ।
बहुनाऽत्र किमुक्तेन शृणु त्वं कलशीसुत ॥ १५ ॥
अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने ।
तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥ १६ ॥
यस्त्यक्त्वा नामसाहस्रं पापहानिमभीप्सति ।
स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते ॥ १७ ॥
भक्तो यः कीर्तयेन्नित्यमिदं नामसहस्रकम् ।
तस्मै श्रीललितादेवी प्रीताऽभीष्टं प्रयच्छति ॥ १८ ॥
अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति ।
नित्यं सङ्कीर्तनाशक्तः कीर्तयेत् पुण्यवासरे ॥ १९ ॥
संक्रान्तौ विषुवे चैव स्वजन्मत्रितयेऽयने ।
नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे ॥ २० ॥

कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ।
पौर्णमास्यां चन्द्रबिम्बे ध्यात्वा श्रीललिताम्बिकाम् ॥ २१ ॥
पञ्चोपचारैः सम्पूज्य पठेन्नामसहस्रकम् ।
सर्वे-रोगाः प्रणश्यन्ति दीर्घायुष्यं च विन्दति ॥ २२ ॥
अयमायुष्करो नाम प्रयोगः कल्पचोदितः ।
ज्वरार्तं शिरसि स्पृष्ट्वा पठेन्नामसहस्रकम् ॥ २३ ॥
तत्क्षणात्प्रशमं याति शिरस्तोदो ज्वरोऽपि च ।
सर्वव्याधिनिवृत्त्यर्थं स्पृष्ट्वा भस्म जपेदिदम् ॥ २४ ॥
तद्भस्मधारणादेव नश्यन्ति व्याधयः क्षणात् ।
जलं संमन्त्र्य कुम्भस्थं नामसाहस्रतो मुने ॥ २५ ॥
अभिषिञ्चेद्ग्रहग्रस्तान् ग्रहा नश्यन्ति तत्क्षणात् ।
सुधासागरमध्यस्थां ध्यात्वा श्रीललिताम्बिकाम् ॥ २६ ॥
यः पठेन्नामसाहस्रं विषं तस्य विनश्यति ।
वन्ध्यानां पुत्रलाभाय नामसाहस्रमन्त्रितम् ॥ २७ ॥
नवनीतं प्रदद्यात्तु पुत्रलाभो भवेद्ध्रुवम् ।
देव्याः पाशेन सम्बद्धामाकृष्टामङ्कुशेन च ॥ २८ ॥
ध्यात्वाऽभीष्टां स्त्रियं रात्रौ जपेन्नामसहस्रकम् ।
आयाति स्वसमीपं सा यद्यप्यन्तः पुरं गता ॥ २९ ॥
राजाकर्षणकामश्चेद्राजावसथदिङ्मुखः ।
त्रिरात्रं यः पठेदेतच्छ्रीदेवीध्यानतत्परः ॥ ३० ॥

स राजा पारवश्येन तुरङ्गं वा मतङ्गजम् ।
आरुह्यायाति निकटं दासवत्प्रणिपत्य च ॥ ३१ ॥
तस्मै राज्यं च कोशं च ददात्येव वशं गतः ।
रहस्यनामसाहस्रं यः कीर्तयति नित्यशः ॥ ३२ ॥
तन्मुखालोकमात्रेण मुह्येल्लोकत्रयं मुने ।
यस्त्विदं नामसाहस्रं सकृत्पठति भक्तिमान् ॥ ३३ ॥
तस्य ये शत्रवस्तेषां निहन्ता शरभेश्वरः ।
यो वाऽभिचारं कुरुते नामसाहस्रपाठके ॥ ३४ ॥
निवर्त्य तत्क्रियां हन्यात्तं वै प्रत्यङ्गिरा स्वयम् ।
ये क्रूरदृष्ट्या वीक्षन्ते नामसाहस्रपाठकम् ॥ ३५ ॥
तानन्धान् कुरुते क्षिप्रं स्वयं मार्ताण्डभैरवः ।
धनं यो हरते चोरैर्नामसाहस्रजापिनः ॥ ३६ ॥
यत्र कुत्र स्थितं वाऽपि क्षेत्रपालो निहन्ति तम् ।
विद्यासु कुरुते वादं यो विद्वान्नामजापिना ॥ ३७ ॥
तस्य वाक्स्तम्भनं सद्यः करोति नकुलेश्वरी ।
यो राजा कुरुते वैरं नामसाहस्रजापिना ॥ ३८ ॥
चतुरङ्गबलं तस्य दण्डिनी संहरेत् स्वयम् ।
यः पठेन्नामसाहस्रं षण्मासं भक्तिसंयुतः ॥ ३९ ॥
लक्ष्मीश्चान्चल्यरहिता सदा तिष्ठति तद्गृहे ।
मासमेकं प्रतिदिनं त्रिवारं यः पठेन्नरः ॥ ४० ॥

भारती तस्य जिह्वाग्रे रङ्गे नृत्यति नित्यशः ।
यस्त्वेकवारं पठति पक्षमात्रमतन्द्रितः ॥ ४१ ॥
मुह्यन्ति कामवशगा मृगाक्ष्यस्तस्य वीक्षणात् ।
यः पठेन्नामसाहस्रं जन्ममध्ये सकृन्नरः ॥ ४२ ॥
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः ।
यो वेत्ति नामसाहस्रं तस्मै देयं द्विजन्मने ॥ ४३ ॥
अन्नं वस्त्रं धनं धान्यं नान्येभ्यस्तु कदाचन ।
श्रीमन्त्रराजं यो वेत्ति श्रीचक्रं यः समर्चति ॥ ४४ ॥
यः कीर्तयति नामानि तं सत्पात्रं विदुर्बुधाः ।
तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता ॥ ४५ ॥
न कीर्तयति नामानि मन्त्रराजं न वेत्ति यः ।
पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम् ॥ ४६ ॥
परीक्ष्य विद्याविदुषस्तेभ्यो दद्याद्विचक्षणः ।
श्रीमन्त्रराजसदृशो यथा मन्त्रो न विद्यते ॥ ४७ ॥
देवता ललितातुल्या यथा नास्ति घटोद्भव ।
रहस्यनामसाहस्रतुल्या नास्ति तथा स्तुतिः ॥ ४८ ॥
लिखित्वा पुस्तके यस्तु नामसाहस्रमुत्तमम् ।
समर्चयेत् सदा भक्त्या तस्य तुष्यति सुन्दरी ॥ ४९ ॥
बहुनाऽत्र किमुक्तेन शृणु त्वं कुम्भसम्भव ।
नानेन सदृशं स्तोत्रं सर्वतन्त्रेषु विद्यते ॥ ५० ॥

तस्मादुपासको नित्यं कीर्तयेदिदमादरात् ।
एभिर्नामसहस्रैस्तु श्रीचक्रं योऽर्चयेत्सकृत् ॥ ५१ ॥
पद्मैर्वा तुलसीपुष्पैः कल्हारैर्वा कदम्बकैः ।
चम्पकैर्जातिकुसुमैर्मल्लिकाकरवीरकैः ॥ ५२ ॥
उत्पलैर्बिल्वपत्रैर्वा कुन्दकेसरपाटलैः ।
अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुखैः ॥ ५३ ॥
तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ।
सा वेत्ति ललितादेवी स्वचक्रार्चनजं फलम् ॥ ५४ ॥
अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधसः ।
प्रतिमासं पौर्णमास्यामेभिर्नामसहस्रकैः ॥ ५५ ॥
रात्रौ यश्चक्रराजस्थामर्चयेत् परदेवताम् ।
स एव ललितारूपस्तद्रूपा ललिता स्वयम् ॥ ५६ ॥
न तयोर्विद्यते भेदो भेदकृत् पापकृद्भवेत् ।
महानवम्यां यो भक्तः श्रीदेवीं चक्रमध्यगाम् ॥ ५७ ॥
अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थिता ।
यस्तु नामसहस्रेण शुक्रवारे समर्चयेत् ॥ ५८ ॥
चक्रराजे महादेवीं तस्य पुण्यफलं शृणु ।
सर्वान् कामानवाप्येह सर्वसौभाग्यसंयुतः ॥ ५९ ॥
पुत्रपौत्रादिसंयुक्तो भुक्त्वा भोगान् यथेप्सितान् ।
अन्ते श्रीललितादेव्याः सायुज्यमतिदुर्लभम् ॥ ६० ॥

प्रार्थनीयं शिवाद्यैश्च प्राप्नोत्येव न संशयः ।
यः सहस्रं ब्राह्मणानामेभिर्नामसहस्रकैः ॥ ६१ ॥
समर्च्य भोजयेद्भक्त्या पायसापूपषड्ररसैः ।
तस्मै प्रीणाति ललिता स्वसाम्राज्यं प्रयच्छति ॥ ६२ ॥
न तस्य दुर्लभं वस्तु त्रिषु लोकेषु विद्यते ।
निष्कामः कीर्तयेद्यस्तु नामसाहस्रमुत्तमम् ॥ ६३ ॥
ब्रह्मज्ञानमवाप्नोति येन मुच्येत बन्धनात् ।
धनार्थी धनमाप्नोति यशोऽर्थी चाप्नुयाद्यशः ॥ ६४ ॥
विद्यार्थी चाप्नुयाद्विद्यां नामसाहस्रकीर्तनात् ।
नानेन सदृशं स्तोत्रं भोगमोक्षप्रदं मुने ॥ ६५ ॥
कीर्तनीयमिदं तस्माद्भोगमोक्षार्थिभिर्नरैः ।
चतुराश्रमनिष्ठैश्च कीर्तनीयमिदं सदा ॥ ६६ ॥
स्वधर्मसमनुष्ठानवैकल्यपरिपूर्तये ।
कलौ पापैकबहुले धर्मानुष्ठानवर्जिते ॥ ६७ ॥
नामसङ्कीर्तनं मुक्त्वा नृणां नान्यत् परायणम् ।
लौकिकाद्वचनान्मुख्यं विष्णुनामानुकीर्तनम् ॥ ६८ ॥
विष्णुनामसहस्राच्च शिवनामैकमुत्तमम् ।
शिवनामसहस्राच्च देव्या नामैकमुत्तमम् ॥ ६९ ॥
देवीनामसहस्राणि कोटिशः सन्ति कुम्भज ।
तेषु मुख्यं दशविधं नामसाहस्रमुच्यते ॥ ७० ।

रहस्यनामसाहस्रमिदं शस्तं दशस्वपि ।
तस्मात् सङ्कीर्तयेन्नित्यं कलिदोषनिवृत्तये ॥ ७१ ॥
मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः ।
विष्णुनामपराः केचिच्छिवनामपराः परे ॥ ७२ ॥
न कश्चिदपि लोकेषु ललितानामतत्परः ।
येनान्यदेवतानाम कीर्तितं जन्मकोटिषु ॥ ७३ ॥
तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने ।
चरमे जन्मनि यथा श्रीविद्योपासको भवेत् ॥ ७४ ॥
नामसाहस्रपाठश्च तथा चरमजन्मनि ।
यथैव विरला लोके श्रीविद्याचारवेदिनः ॥ ७५ ॥
तथैव विरला गुह्यनामसाहस्रपाठकाः ।
मन्त्रराजजपश्चैव चक्रराजार्चनं तथा ॥ ७६ ॥
रहस्यनामपाठश्च नाल्पस्य तपसः फलम् ।
अपठन्नामसाहस्रं प्रीणयेद्यो महेश्वरीम् ॥ ७७ ॥
स चक्षुषा विना रूपं पश्येदेव विमूढधीः ।
रहस्यनामसाहस्रं त्यक्त्वा यः सिद्धिकामुकः ॥ ७८ ॥
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ।
यो भक्तो ललितादेव्याः स नित्यं कीर्तयेदिदम् ॥ ७९ ॥
नान्यथा प्रीयते देवी कल्पकोटिशतैरपि ।
तस्माद्रहस्यनामानि श्रीमातुः प्रयतः पठेत् ॥ ८० ॥

इति ते कथितं स्तोत्रं रहस्यं कुम्भसम्भव ।
नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन ॥ ८१ ॥
यथैव गोप्या श्रीविद्या तथा गोप्यमिदं मुने ।
पशुतुल्येषु न ब्रूयाज्जनेषु स्तोत्रमुत्तमम् ॥ ८२ ॥
यो ददाति विमूढात्मा श्रीविद्यारहिताय च ।
तस्मै कुप्यन्ति योगिन्यः सोऽनर्थः सुमहान् स्मृतः ॥ ८३ ॥
रहस्यनामसाहस्रं तस्मात् सङ्गोपयेदिदम् ।
स्वतन्त्रेण मया नोक्तं तवापि कलशीसुत ॥ ८४ ॥
ललिताप्रेरणेनैव मयोक्तं स्तोत्रमुत्तमम् ।
कीर्तनीयमिदं भक्त्या कुम्भयोने निरन्तरम् ॥ ८५ ॥
तेन तुष्टा महादेवी तवाभीष्टं प्रदास्यति ।

श्रीसूत उवाच –

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ॥ ८६ ॥

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्य संवादे
श्रीललितानामसहस्रफलनिरूपणं सम्पूर्णम् ॥

॥ उपदेशपञ्चकम् ॥ [56]

श्री शङ्कराचार्यकृतम्

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयताम्
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम्॥ १॥

सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढाऽऽधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम्।
सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥ २॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्।
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहम्मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥ ३॥

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन सन्तुष्यताम्।
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतां
औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४॥

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम्।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥ ५॥

यः श्लोकपञ्चकमिदं पठते मनुष्यः
सञ्चिन्तयत्यनुदिनं स्थिरतामुपेत्य।
तस्याशु संसृतिदवानलतीव्रघोरतापः
प्रशान्तिमुपयाति चितिप्रसादात्॥ ६॥

आदिदेव नमस्तुभ्यम् [57]

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥

शिव : सूर्याष्टकम्

O Thou premeval Being, Salutations to Thee. O Thou Being resplendent, be gracious unto me. O Thou Creator of day, I bow to Thee. O Thou divine illuminator, salutation to Thee.

॥ षट्पदीस्तोत्रम् ॥ [58]

श्री शङ्कराचार्यकृतम्

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम्।
भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥

दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥ २ ॥

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥ ३ ॥

उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे।
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥

मत्स्यादिभिरवतारै रवतारवतावता सदा वसुधाम्।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥ ५ ॥

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द।
भवजलधिमथनमन्दर परमं दरमपनय त्वं मे ॥ ६ ॥

नारायण करुणामय शरणं करवाणि तावकौ चरणौ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥

* * *

॥ पातञ्जल-योगसूत्रपाठः ॥ *

॥ प्रथमोऽध्यायः ॥

समाधि-पादः

अथ योगानुशासनम् ॥१॥ योगश्चित्तवृत्तिनिरोधः ॥२॥ तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥३॥ वृत्तिसारूप्यमितरत्र ॥४॥ वृत्तयः पंचतय्यः क्लिष्टा अक्लिष्टाः ॥५॥ प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः ॥६॥ प्रत्यक्षानुमानागमाः प्रमाणानि ॥७॥ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥८॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥९॥

अभाव-प्रत्ययालम्बना-वृत्तिर्निद्रा ॥१०॥ अनुभूतविषया-सम्प्रमोषः स्मृतिः ॥११॥ अभ्यासवैराग्याभ्यां तन्निरोधः ॥१२॥ तत्र स्थितौ यत्नोऽभ्यासः ॥१३॥ स तु दीर्घकाल नैरन्तर्य-सत्कारासेवितो दृढभूमिः ॥१४॥ दृष्टानुश्रविक-विषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥१५॥ तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥१६॥

वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः ॥१७॥ विरामप्रत्ययाभ्यासपूर्वः संस्कार-शेषोऽन्यः ॥१८॥ भव-प्रत्ययो विदेह-प्रकृतिलयानाम् ॥१९॥ श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञापूर्वक इतरेषाम् ॥२०॥ तीव्रसंवेगानामासन्नः ॥२१॥ मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥२२॥ ईश्वरप्रणिधानाद्वा ॥२३॥

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष-विशेष ईश्वरः ॥२४॥ तत्र निरतिशयं सर्वज्ञत्व-बीजम् ॥२५॥ स पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥२६॥ तस्य वाचकः प्रणवः ॥२७॥ तज्जपस्तदर्थभावनम् ॥२८॥

ततः प्रत्यक्-चेतनाधिगमोऽप्यन्तरायाभावश्च ॥२९॥ व्याधि-स्त्यान-संशय-प्रमादालस्याविरति-भ्रान्तिदर्शनालब्ध-भूमिकत्वानवस्थितत्वानि चित्त-विक्षेपास्तेऽन्तरायाः ॥३०॥

दुःख-दौर्मनस्याङ्गमेजयत्व-श्वासप्रश्वासा विक्षेपसहभुवः ॥३१॥ तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥३२॥ मैत्री करुणा-मुदितोपेक्षाणां सुख-दुःखपुण्यापुण्य-विषयाणां भावनातश्चित्तप्रसादनम् ॥३३॥ प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य ॥३४॥ विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थिति-निबन्धिनी ॥३५॥ विशोका वा ज्योतिष्मती ॥३६॥ वीतरागविषयं वा चित्तम् ॥३७॥

स्वप्ननिद्राज्ञानालम्बनं वा ॥३८॥ यथाऽभिमतध्यानाद्वा ॥३९॥ परमाणु परममहत्त्वान्तोऽस्य वशीकारः ॥४०॥ क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थ-तदञ्जनता समापत्तिः ॥४१॥ तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः ॥४२॥ स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥४३॥ एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥४४॥

सूक्ष्मविषयत्वञ्चालिङ्ग-पर्यवसानम् ॥४५॥ ता एवा सबीजः समाधिः ॥४६॥ निर्विचार-वैशारद्येऽध्यात्म-प्रसादः ॥४७॥ ऋतम्भरा तत्र प्रज्ञा ॥४८॥ श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥४९॥ तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥५०॥ तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥५१॥

॥ द्वितीयोऽध्यायः ॥
साधन-पादः

तपः-स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥१॥ समाधि-भावनार्थः क्लेश-तनूकरणार्थश्च ॥२॥ अविद्याऽस्मिता-रागः-द्वेषाभिनिवेशाः पञ्चक्लेशाः ॥३॥ अविद्या क्षेत्रमुत्तरेषां प्रसुप्त-तनु-विच्छिन्नोदाराणाम् ॥४॥ अनित्याशुचि-दुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥५॥ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥६॥

सुखानुशयी रागः ॥७॥ दुःखानुशयी द्वेषः ॥८॥ स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥९॥ ते प्रतिप्रसवहेयाः सूक्ष्माः ॥१०॥ ध्यानहेयास्तद्वृत्तयः ॥११॥ क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥१२॥ सति मूले तद्विपाको जात्यायुर्भोगाः ॥१३॥ ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥१४॥ परिणामताप-संस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥१५॥

हेयं दुःखमनागतम् ॥१६॥ द्रष्टृदृश्ययोः संयोगो हेयहेतु ॥१७॥ प्रकाश-क्रिया-स्थितिशीलं-भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥१८॥ विशेषाविशेष-लिङ्गमात्रा-लिङ्गानि गुणपर्वाणि ॥१९॥ द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥२०॥ तदर्थ एव दृश्यस्यात्मा ॥२१॥ कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥२२॥ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥

तस्य हेतुरविद्या ॥२४॥ तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥२५॥ विवेकख्यातिरविप्लवा हानोपायः ॥२६॥ तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥२७॥ योगाङ्गानुष्ठानाद्शुद्धिक्षये ज्ञानदीप्तिराविवेक-ख्यातेः ॥२८॥ यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥२९॥ अहिंसा-सत्यास्तेय-ब्रह्मचर्या-परिग्रहा यमाः ॥३०॥

एते जाति-देश-काल-समयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥३१॥ शौच-सन्तोष-तपः-स्वाध्यायेश्वर-प्रणिधानानि नियमाः ॥३२॥ वितर्कबाधने प्रतिपक्षभावनम् ॥३३॥ वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोध-मोहपूर्वका मृदुमध्याधि-मात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥३४॥ अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥३५॥

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥३६॥ अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥३७॥ ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥३८॥ अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः ॥३९॥ शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥४०॥

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रिय-जयात्मदर्शन-योग्यत्वानि च ॥४१॥ सन्तोषादनुत्तमः सुखलाभः ॥४२॥

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥४३॥ स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥४४॥ समाधिसिद्धिरीश्वरप्रणिधानात् ॥४५॥ स्थिरसुखमासनम् ॥४६॥ प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥४७॥ ततो द्वन्द्वानभिघातः ॥४८॥ तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥४९॥

बाह्याभ्यन्तरस्तम्भवृत्तिः देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥५०॥ बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥५१॥ ततः क्षीयते प्रकाशावरणम् ॥५२॥ धारणासु च योग्यता मनसः ॥५३॥ स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥५४॥ ततः परमा वश्यतेन्द्रियाणाम् ॥५५॥

* * *

॥ तृतीयोऽध्यायः ॥

विभूति-पादः

देशबन्धश्चित्तस्य धारणा ॥१॥ तत्र प्रत्ययैकतानता ध्यानम् ॥२॥ तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥३॥ त्रयमेकत्र संयमः ॥४॥ तज्जयात् प्रज्ञाऽऽलोकः ॥५॥ तस्य भूमिषु विनियोगः ॥६॥ त्रयमन्तरङ्गं पूर्वेभ्यः ॥७॥ तदपि बहिरङ्गं निर्बीजस्य ॥८॥ व्युत्थान-निरोध-संस्कारयोरभिभव-प्रादुर्भावौ निरोध-क्षणचित्तान्वयो निरोध-परिणामः ॥९॥ तस्य प्रशान्तवाहिता संस्कारात् ॥१०॥ सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि-परिणामः ॥११॥ शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता-परिणामः ॥१२॥ एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥१३॥ शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥१४॥ क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥१५॥ परिणामत्रयसंयमादतीतानागत-ज्ञानम् ॥१६॥

शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्-प्रविभाग-संयमात्-सर्वभूत-रुतज्ञानम् ॥१७॥ संस्कारसाक्षात्करणात्-पूर्वजातिज्ञानाम् ॥१८॥ प्रत्ययस्य परचित्तज्ञानम् ॥१९॥ न च तत् सालम्बनं तस्याविषयीभूतत्वात् ॥२०॥ कायरूपसंयमात्-तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्धानम् ॥२१॥

एतेन शब्दाद्यन्तर्धानमुक्तम् ॥२२॥ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्त ज्ञानमरिष्टेभ्यो वा ॥२३॥ मैत्र्यादिषु बलानि ॥२४॥ बलेषु हस्तिबलादीनि ॥२५॥ प्रवृत्यालोकन्यासात् सूक्ष्म-व्यवहित-विप्रकृष्टज्ञानम् ॥२६॥ भुवनज्ञानं सूर्ये संयमात् ॥२७॥ चन्द्रे तारव्यूहज्ञानम् ॥२८॥ ध्रुवे तद्गतिज्ञानम् ॥२९॥ नाभिचक्रे कायव्यूह-ज्ञानम् ॥३०॥

कण्ठकूपे क्षुत्पिपासा-निवृत्तिः ॥३१॥ कूर्मनाड्यां स्थैर्यम् ॥३२॥ मूर्धज्योतिषि सिद्ध-दर्शनम् ॥३३॥ प्रातिभाद्वा सर्वम् ॥३४॥ हृदये चित्त-संवित् ॥३५॥ सत्त्वपुरुषयो-रत्यन्तासंकीर्णयोः प्रत्ययाविशेषाद् भोगः परार्थत्वात् स्वार्थ-संयमात् पुरुषज्ञानम् ॥३६॥ ततः प्रातिभश्रावणवेदना-दर्शास्वादवार्ता जायन्ते ॥३७॥ ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥३८॥

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरा-वेशः ॥३९॥ उदानजयाज्जल-पङ्ककण्टकादिष्वसङ्ग उत्-क्रान्तिश्च ॥४०॥ समानजयात् प्रज्वलनम् ॥४१॥ श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ॥४२॥ कायाकाशयोः सम्बन्धसंयमाल्लघुतूल-समापत्तेश्चाकाश-गमनम् ॥४३॥ बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥४४॥

स्थूल-स्वरूप-सूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥४५॥ ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च ॥४६॥ रूप-लावण्य-बल-वज्रसंहननत्वानि कायसम्पत् ॥४७॥ ग्रहण-स्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥४८॥ ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४९॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वञ्च ॥५०॥

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥५१॥ स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥५२॥ क्षण-तत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥५३॥ जाति-लक्षण-देशैरन्यताऽनवच्छेदात्-तुल्ययोस्ततः प्रतिपत्तिः ॥५४॥ तारकं सर्वविषयं सर्वथाविषयमक्रमञ्चेति विवेकजं ज्ञानम् ॥५५॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥५६॥

॥ चतुर्थोऽध्यायः ॥

कैवल्य-पादः

जन्मौषधि-मन्त्र-तपः समाधिजाः सिद्धयः ॥१॥ जात्यन्तर-परिणामः प्रकृत्यापूरात् ॥२॥ निमित्तमप्रयोजकं प्रकृतीनां वरण भेदस्तु ततः क्षेत्रिकवत् ॥३॥ निर्माणचित्तान्यस्मितामात्रात् ॥४॥ प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥५॥ तत्र ध्यानजमनाशयम् ॥६॥

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥७॥ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥८॥ जाति-देश-काल-व्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥९॥ तासामनादित्वं चाशिषो नित्यत्वात् ॥१०॥ हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥११॥ अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ॥१२॥

ते व्यक्त-सूक्ष्मा गुणात्मानः ॥१३॥ परिणामैकत्वाद्वस्तुतत्त्वम् ॥१४॥ वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ॥१५॥ न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥१६॥ तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥१७॥ सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ॥१८॥ न तत् स्वाभासं दृश्यत्वात् ॥१९॥ एकसमये चोभयानवधारणम् ॥२०॥

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च ॥२१॥ चित्तेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥२२॥ द्रष्टृ-दृश्योपरक्तं चित्तं सर्वार्थम् ॥२३॥ तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् ॥२४॥ विशेषदर्शिन आत्मभाव-भावनानिवृत्तिः ॥२५॥ तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥२६॥ तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥ हानमेषां क्लेशवदुक्तम् ॥२८॥

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ॥२९॥ ततः क्लेशकर्मनिवृत्तिः ॥३०॥ तदा सर्वावरणमलापेतस्य ज्ञानस्याऽनन्त्यात्ज्ञेयमल्पम् ॥३१॥ ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥३२॥ क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३३॥ पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति ॥३४॥

दिव्यस्तोत्रम्] **॥ त्रिवेणीस्तोत्रम् ॥ [59]**

श्री शङ्कराचार्य-कृतम्

श्रीगणेशाय नमः । मुक्तामयालंकृतमुद्रवेणी भक्ताभयत्राण सुबद्धवेणी । मत्तालिगुञ्जन्मकरन्दवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥१॥

लोकत्रयैश्वर्यनिदानवेणी तापत्रयोच्चाटनबद्धवेणी ।
धर्मार्थकामाकलनैकवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥२॥

मुक्ताङ्गनामोहनसिद्धवेणी भक्तांतरानंदसुबोधवेणी ।
वृत्त्यन्तरोद्वेगविवेकवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥३॥

दुग्धोदधिस्फूर्जसुभद्रवेणी नीलाभ्रशोभाललिता च वेणी ।
स्वर्णप्रभाभासुरमध्यवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥४॥

विश्वेश्वरोत्तुङ्गकपर्दिवेणी विरिञ्चिविष्णुप्रणतैकवेणी ।
त्रयी पुराणा सुरसार्धवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥५॥

माङ्गल्य संपत्तिसमृद्धवेणी मात्रांतरन्यस्तनिदानवेणी ।
परम्परा पातकहारिवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥६॥

निमज्जदुन्मज्जमनुष्यवेणी त्रयोदयीभाग्यविवेकवेणी ।
विमुक्तजन्माविभवैकवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥७॥

सौन्दर्यवेणी सुरसार्धवेणी माधुर्यवेणी महनीयवेणी ।
रत्नैकवेणी रमणीयवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥८॥

सारस्वताकारविधातवेणी कालिन्दकन्यामयलक्ष्यवेणी ।
भागीरथीरूपमहेशवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥९॥

श्रीमद्भवानी भवनैकवेणी लक्ष्मीसरस्वत्यभिमानवेणी ।
माता त्रिवेणी त्रयीरत्नवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥१०॥

त्रिवेणीदशकं स्तोत्रं प्रातर्नित्यं पठेन्नरः ।
तस्य वेणी प्रसन्ना स्याद्विष्णुलोकं स गच्छति ॥११॥

दिव्यस्तोत्रम्] **॥ स्वरूपानुसन्धानम् ॥ [60]**

दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य मत्या विचार्य स्वरूपम्।
यदाप्नोति तत्त्वं निदिध्यास्य विद्वान् परं ब्रह्म नित्यं तदेवाहमस्मि॥

यदानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यम्।
अहं ब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म नित्यं तदेवाहमस्मि॥

यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे।
मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म नित्यं तदेवाहमस्मि॥

- स्वरूपानुसन्धानम् २, ३, ४
(श्रीशङ्कराचार्यः)

।। ब्रह्मकृतसरस्वतीस्तोत्रम् ।। [61]

ऐं ऐं ऐं इष्टमन्त्रे कमलभवमुखाम्भोजभूतिस्वरूपे ।
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ।।
न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे नापि विज्ञानतत्त्वे।
विश्वे विश्वान्तरात्मे सुरवरनमिते निष्कले नित्यशुध्दे ।।

Charmed greatly with beejakshara ऐं ऐं ऐं (a mystical syllable) you are the embodiment of all prosperity and riches for Brahma's Lotus face. Thou revealest both the form and the formless. Thou art the embodiment of all attributes. Thou, again, art without attributes and change. Thou art neither gross nor subtle, and Thy glory is incomprehensible. Thou art beyond knowledge. Thou art everything, the inmost self of everything, the object of adoration even to the chief of gods. Thou art indivisible and eternally pure.

ह्रीं ह्रीं ह्रीं जापतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते ।
मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशान्ताम् ।।
विद्ये वेदान्तवेद्ये परिणतपठिते मोक्षदे मुक्तिमार्गे ।
मार्गातीतस्वरूपे भव मम वरदा शारदे शुभ्रहारे ।।

You rejoice with beejakshara of ह्रीं ह्रीं ह्रीं. Adorned with a crown shining like sparkling snow, you are eagerly occupied in playing veena with your hands. Thou art knowledge supreme. Thou art known through the highest revelation and Thy glory is recited by the perfect ones. Thou art the giver of salvation, Thou art the way to salvation, but yet transcend it. Be propitious unto me, O Thou Goddess of learning. Be pleased to remove my dullness, and endow me with a keen and tranquil understanding.

नमस्ते परमं ब्रह्म नमस्ते परमात्मने ।
निर्गुणाय नमस्तुभ्यं सद्रूपाय नमो नमः ।।

महानिर्वाणतंत्रः (III, 74)

I bow to Thee, the supreme Brahman. I bow to Thee, the supreme Self. I bow to Thee who art above all qualities. I bow to Thee, the ever-existent, again and again.

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।।

देवीमाहात्म्यम् (XI, 23)

O Mother, Thou art in the form of all things. Thou dost control all. Thou art the embodiment of all power, do Thou protect us from all fear. O remover of all ills, salutations to Thee.

सत्संगत्वे निस्संगत्वं निस्संगत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः ।।

Association of virtuous people leading pure life results in detachment; Detachment leads to freedom from delusion; Undeluded, one contacts changeless Reality; Contact with Reality bestows Liberation-while-alive.

- Sri Sankaracharya

गीतागङ्गोदकम्

[श्रीमद्भगवद्गीता]

अध्यायः ४

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।३७।
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।३८।
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।३९।

अध्यायः ६

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।५।
बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ।६।
जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ।७।
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ।८।

अध्यायः १६

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थिति : ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।१।
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।२।
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ।३।

अध्यायः १८

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ।६१।
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।६२।

गीतामाहात्म्यम्

मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ।
सकृद्गीताम्भसि स्नानं संसारमलनाशनम् ।।
भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम् ।
गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ।।
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।

❀ ❀ ❀

पृष्ठम्

वेदमन्त्राः

1. अरुणप्रश्नः 365
2. ईशावास्योपनिषत् 7
3. ऐतरेयोपनिषत् 12
4. कठोपनिषत् 174
5. कलिसन्तरणोपनिषत् 306
6. केनोपनिषत् 206
7. कैवल्योपनिषत् 311
8. क्षमा प्रार्थना 448
9. गणपत्यथर्वशीर्षोपनिषत् 168
10. गायत्रीमन्त्रः 449
11. छान्दोग्योपनिषत् 209
12. तैत्तिरीयोपनिषत् 17
13. दशशान्तयः 440
14. नारायणोपनिषत् 10
15. पातञ्जल-योगसूत्रपाठः 588
16. पुण्याहवाचनम् 434
17. प्रश्नोपनिषत् 198
18. प्रार्थना 1
19. बृहदारण्यकोपनिषत् 65
20. मन्त्रपुष्पम् 446
21. महानारायणोपनिषत् 32
22. माण्डूक्योपनिषत् 196
23. मुण्डकोपनिषत् 187
24. वेदान्तमहावाक्यम् 448
25. श्रीरुद्रप्रश्नः (लघुन्यासः) 348
26. श्रीरुद्रप्रश्नः (संहितापाठः) 352
27. श्रीचमकप्रश्नः 360
28. श्वेताश्वतरोपनिषत् 294
29. शान्तिमन्त्राः 4
30. सं गच्छध्वं 438
31. सरस्वतीरहस्योपनिषत् 308
32. सूर्योपनिषत् 171

पृष्ठम्

सूक्तानि

33. अक्षीभ्यां ते सूक्तम् 419
34. अग्निसूक्तम् 420
35. आ नो भद्राः सूक्तम् 422
36. आयुष्यसूक्तम् 421
37. दुर्गासूक्तम् 409
38. देवीसूक्तम् 410
39. नक्षत्रसूक्तम् 426
40. नवग्रहसूक्तम् 423
41. नारायणसूक्तम् 400
42. नासदीयसूक्तम् 433
43. नीळासूक्तम् 408
44. पुरुषसूक्तम् 398
45. भाग्यसूक्तम् 439
46. भूसूक्तम् 407
47. मेधासूक्तम् 411
48. रात्रीसूक्तम् 416
49. रोगनिवारणसूक्तम् (अथर्वणवेदः) 436
50. विष्णुसूक्तम् 402
51. श्रीसूक्तम् 403
52. सरस्वतीसूक्तम् 412
53. हिरण्यगर्भःसूक्तम् 437

घनपाठमन्त्राः

54. ईशावास्योपनिषत् घनपाठः 315
55. गणपति-प्रार्थना घनपाठः 335
56. गायत्रीमन्त्रः घनपाठः 338
57. मृत्युञ्जयमहामन्त्रः घनपाठः 342
58. रुद्रनमस्कारमन्त्रः घनपाठः 343
59. शिवपञ्चाक्षरीमन्त्रः घनपाठः (पदपाठः क्रमपाठः जटापाठः) 341
60. शिवमन्त्राः घनपाठः 339
61. सरस्वती-प्रार्थना घनपाठः 337

	पृष्ठम्
सामवेदमन्त्राः	
62. आरण्यकगानम्	346
63. गायत्रीसामगानम्	345
64. बृहत्सामगानम्	346
65. रथन्तरसामगानम्	345
दिव्यस्तोत्रम्	
1. अर्धनारीश्वरस्तोत्रम्	473
2. अन्नपूर्णास्तोत्रम्	505
3. अम्बास्तोत्रम्	503
4. आदित्यहृदयम्	484
5. आदिदेव नमस्तुभ्यम्	586
6. इन्द्राक्षी स्तोत्रम्	508
7. उपदेशपञ्चकम्	586
8. उमामहेश्वरस्तोत्रम्	472
9. कनकधारास्तोत्रम् (कनकलक्ष्मीस्तवः)	514
10. कालभैरवाष्टकम्	482
11. कृष्णाष्टकम्	490
12. कैलासपति-प्रार्थना	471
13. गणपतिस्तोत्रम्	454
14. गणेशपञ्चरत्नम्	453
15. गङ्गास्तोत्रम्	520
16. गुरुस्तोत्रम्	454
17. गुर्वष्टकम्	455
18. जगद्धात्रीस्तोत्रम्	499
19. जगन्नाथाष्टकम्	492
20. त्रिवेणीस्तोत्रम्	597
21. दारिद्र्यदहन-शिवस्तोत्रम्	466
22. द्वादशज्योति-र्लिङ्गस्तोत्रम्	462
23. द्वादशज्योति-र्लिङ्गस्मरणम्	463
24. दुर्गादेवीध्यानम् (दुर्गापूजा)	531
25. दुर्गासहस्र-नामस्तोत्रम्	533
26. देवीप्रणामः (सर्वमङ्गलमाङ्गल्ये)	532
27. नर्मदाष्टकम्	524
28. नवग्रहदेवता प्रार्थना	487
29. निर्वाणषट्कम्	481
30. मदनमोहनाष्टकम्	494
31. महागणेश-पञ्चरत्नस्तोत्रम्	452
32. महामृत्युञ्जयस्तोत्रम्	474
33. महालक्ष्म्यष्टकम्	517
34. मृतसञ्जीवनस्तोत्रम्	477
35. मीनाक्षीपञ्चरत्नम्	500
36. मीनाक्षीस्तोत्रम्	502
37. यमुनाष्टकम्	522
38. रामकृष्णध्यानस्तोत्रम्	527
39. रामकृष्णप्रणाममन्त्रः	527
40. रामकृष्णस्तोत्रम्	526
41. रामचन्द्रस्तवः	488
42. ललितासहस्र-नामस्तोत्रम्	551
43. विवेकानन्दध्यानम्	530
44. विवेकानन्दपञ्चकम्	530
45. वेङ्कटेशप्रपत्तिः	495
46. वेङ्कटेशमङ्गला-शासनम्	497
47. वेदसारशिवस्तोत्रम्	464
48. शारदादेवीध्यानस्तोत्रम्	528
49. शारदादेवीस्तोत्रम्	528
50. शिवजयजयकार-ध्यानस्तोत्रम्	465
51. शिवताण्डवस्तोत्रम्	468
52. शिवपञ्चाक्षरस्तोत्रम्	459
53. शिवमानसपूजा	470
54. शिवषडक्षरस्तोत्रम्	459
55. शिवस्तोत्रम्	480
56. शिवाष्टकम्	460

	पृष्ठम्
57. षट्पदीस्तोत्रम्	587
58. ब्रह्मकृतसरस्वतीस्तोत्रम् (ऐं ऐं ऐं इष्टमन्त्रे...)	599
59. सरस्वतीस्तोत्रम् (या कुन्देन्दु...)	518
60. स्वरूपानुसन्धानम् (दयालुं गुरुं)	598
61. सुवर्णमालास्तुतिः	457

विविध श्लोकाः

1. अहं क्रतुरहं यज्ञः	336
2. आत्मस्वरूप कथनम् (किं ज्योतिस्तव)	9
3. एकं ब्रह्मैवाद्वितीयम्	310
4. ॐ तत्सत्	(viii)
5. गीतागङ्गोदकम्	600
6. जगद्गुरो नमस्तुभ्यम्	340
7. जननीं शारदां देवीं	450
8. त्वमेव माता च पिता	451
9. त्वं परं परमं तेजः	186
10. दुर्जनः सज्जनो भूयात्	605
11. देवद्विजगुरुप्राज्ञपूजनं	(x)
12. नमः श्रीयतिराजाय	606
13. नमस्ते परमं ब्रह्म	599
14. नमामीशमीशान-निर्वाणरूपम्	364
15. यथा बिम्बमेकम्	408
16. यस्मात् सर्वमिदम्	436
17. यं ध्यायन्ति बुधाः	347
18. यं ब्रह्मा वरुणेन्द्र	438
19. रामकृष्णनमनम् (श्रीरामाय श्रीकृष्णाय)	451
20. वाणी गुणानुकथने	307
21. शान्ताकारं -भुजगशयनम्	11
22. सत्यव्रतं सत्यपरम्	314
23. सत्संगत्वे निस्संगत्वं	599
24. सर्वशक्तीश्वरः सर्वः	305
25. सर्वस्तरतु दुर्गाणि	607
26. सर्वस्वरूपे सर्वेशे	599
27. सर्वे भवन्तु सुखिनः	(ix)
28. स्थापकाय च धर्मस्य	(i)
29. हरेर्नाम हरेर्नाम	307
30. हृदयकमलमध्ये	(ii)



स्वामी विवेकानन्द

नमः श्रीयतिराजाय विवेकानन्दसूरये ।
सच्चित्सुखस्वरूपाय स्वामिने तापहारिणे ।।

– स्वामी रामकृष्णानन्दः

Salutation to that king of renouncers and controller of passions, the sage, Vivekananda who is Sachchidananda, (Existence, Knowledge and Bliss Absolute) Itself, the spiritual preceptor, the remover of distress.



श्री रामकृष्ण मन्दिरम् - बेलूर मठ

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वस्सद्बुद्धिमाप्नोतु सर्वः सर्वत्र नन्दतु ॥

May all be freed from dangers. May all realise what is good. May all be actuated by noble thoughts. May all rejoice everywhere.

रामकृष्ण मठ, खार, मुम्बई